In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ISSN 2230-9551

अर्वाचीनं सु ते मनः (ऋग्वेदः ३/३७/२)

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

(विश्वविद्यालयानुदानायोगेनानुमोदितम्)

संस्कृतपत्रकारितासार्धशताब्दीपूर्तिविशेषांकः

१५ जुलाई २०१७ ई०

१५९ अतिरिक्ताङ्कः

केन कुत्र कथं किं किं संस्कृते रच्यतेऽधुना।
इति ज्ञातुं सखे! नूनं पठार्वाचीनसंस्कृतम्॥

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम०ए० (हिन्दीसंस्कृतयोः), पीएच०डी०, साहित्याचार्यः, सांख्ययोगाचार्यः

संयुक्तसम्पादकः

डा० अभिनव शुक्लः

एम०ए० (हिन्दीसंस्कृतयोः), एम०फिल्०, पीएच०डी० (संस्कृते)

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९ (भारतम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अर्वाचीनसंस्कृतम् (संस्कृतपत्रकारितासार्धशताब्दीपूर्तिविशेषांकः)
१५ जुलाई २०१७ ई०, १५९ अतिरिक्ताङ्कः

विषय-सूची

क्रमः	विषयः	लेखकः	पृष्ठाङ्कः
१.	सम्पादकीयम्	रमाकान्त शुक्लः	क - त
२.	अर्वाचीनसंस्कृतसर्वस्वम्	डॉ. अभिनवशुक्लः	१-१२०
३.	आक्रमणं कुरु	डॉ. रमाकान्तशुक्लः	१२१-१२८
४.	शोभनं कृतम्	डा. रमाकान्तशुक्लः	१२९-१३१
५.	दशमगुरुवरं नमामि	डॉ. रमाकान्तशुक्लः	१३२-१३३
६.	विमुद्रीकरणप्रश्नोत्तरम्	डॉ. रमाकान्तशुक्लः	१३३
७.	राजकवित्वाकांक्षा	डॉ. रमाकान्तशुक्लः	१३४-१३५
८.	राष्ट्रभाषासंस्कृतम्	डॉ. रमाकान्तशुक्लः	१३६-१३९
९.	सुन्दरी सा	डॉ. ऋषिराजपाठकः	१४०
१०.	कुण्डलियैकादशी	डॉ. देवीसहायपाण्डेयः(दीपः)	१४१-१४४
११.	चन्द्रिका	जि.एस. श्रीनिवासमूर्तिः	१४५-१६५
१२.	कालिदासकविता विजयते	डॉ. राधावल्लभशर्मा	१६६
१३.	आचार्यरमेशचन्द्रशुक्लः...	डॉ. राका शर्मा	१६७-१७४
१४.	नवप्रकाशनचर्चा	डॉ. रमाकान्तशुक्लः	१७५-२००
१५.	संस्कृतपत्रिका	डॉ. रमाकान्तशुक्लः	२०१-२१३
१६.	अर्वाचीनसंस्कृतस्य पञ्जीकरणपत्रम्		२१४
१७.	वार्षिकविवरणम्	डॉ. रमाकान्तशुक्लः	२१५-२२७
१८.	देववाणीपरिषद्वार्ता	डॉ. ऋषिराजपाठकः	२२८-२३२
१९.	संस्कृतजगद्वार्ता	जीवनशर्मा, हिमांशुजोशी	२३३-२३९
२०.	श्रद्धाञ्जलयः	सम्पादकः	२४०

Form IV अर्वाचीनसंस्कृतम् (पंजी. सं. 34554/79)

१. **प्रकाशनस्थानम्** - नयी दिल्ली ।

२. **प्रकाशनकालावधिः** - त्रैमासिकम् ।

३. **संकेतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च** - डॉ० रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

४. **पत्राधिकारिणां नाम्ना सह संकेतः** - देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली।

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

दिनाङ्कः २१-८-२०१७ ई. —रमाकान्तशुक्लः (प्रकाशकः, सम्पादकः)

1. अर्वाचीनसंस्कृते प्रकाशितेषु लेखेषु/रचनासु विचारा अभिप्रायाश्च तल्लेखकानामेव। इदमावश्यकं नास्ति यत्तैः अर्वाचीनसंस्कृतस्य सम्पादकः प्रकाशकश्च सहमतो भवेत्।

2. अर्वाचीनसंस्कृतसम्बद्धाः सर्वे विवादा दिल्लीन्यायालयाधीना एव विचारणीयाःस्युः।

राष्ट्रियसंस्कृतसंस्थानानुदानेन प्रकाशितं पत्रम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सम्पादकीयम्

अर्वाचीनसंस्कृतस्यायमतिरिक्तोऽङ्कः संस्कृतपत्रकारितासार्धशती-विशेषाङ्कत्वेन प्रकाश्यते। 01.06.1866तमे खैष्टेऽब्दे जूनमासे वाराणसीतः **'काशीविद्यासुधानिधि'**रित्येतन्नाम्नी पत्रिका प्रकाशिता जाता। इदं मासिकं पत्रं नैरन्तर्येण 1917 यावत् प्रकाशितं जातम्। अस्य प्रकाशनं वाराणसीतः समभवत्। अस्य प्रकाशनस्थानं राजकीयसंस्कृतमहाविद्यालयः, वाराणसी इत्यासीत्। अस्य प्रकाशकः आंग्लदेशीयः श्रीमान् ई.जे.लाजरूस आसीत्। 1876यावत् प्रकाशितान्यस्य पत्रस्य प्रतिरूपाणि प्राचीनसञ्चिका इत्यभण्यन्त, 1888तः 1917यावत् प्रकाशितानि नूतनसञ्चिका इत्यभण्यन्त। 1917तमे वर्षे मईमासतः अस्य पत्रस्य प्रकाशनमवसितम्।

अस्य पत्रस्य नामान्तरं **'पण्डित'** इत्यासीत्। अस्योद्देश्यम् अप्रकाशितानामप्राप्याणां च ग्रन्थानां प्रकाशनमासीत्। अस्मिन्ननेके उत्कृष्टाः प्रामाणिकाश्च संस्कृतग्रन्थाः प्राकाश्यमलभन्त। विवादास्पदनिबन्धा अप्यत्र प्रसिद्धा जाताः।

काशीविद्यासुधानिधेः प्राचीनसञ्चिकासु प्रायः प्राचीना एव ग्रन्थाः प्रकाशिताः जाताः किन्तु नूतनसञ्चिकासु समकालीनानां विदुषां निबन्धा अपि प्राकाश्यन्त। अनेकेषाम् आंग्लभाषाग्रन्थानां संस्कृतानुवादाः संस्कृतग्रन्थानां च आंग्लभाषानुवादा अप्यत्र प्रकाशिता जाताः। पञ्चाशत्प्रायवर्षावधौ प्रकाशितस्यास्य प्रत्येकमङ्केऽयं श्लोकः प्रकाश्यते स्म-

श्रीमद्विजयिनीविद्यापाठशालोदयोदितः।
प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः।
प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ततः परमद्यावधि संस्कृतस्य दैनिक-साप्ताहिक-पाक्षिक-मासिक-द्वैमासिक-त्रैमासिक-चातुर्मासिक-षाण्मासिक- वार्षिकादिपत्रिकाणां प्रकाशनं भवत्येव, यासु समसामयिकं चिरन्तनञ्च संस्कृतभाषानिबद्धं साहित्यं समीक्षणं वृत्तञ्च गद्यपद्यात्मकरूपेण प्रकाश्यते। काश्चन पत्रिकाः स्वल्पमेवावधिं सम्पूर्य विश्रान्तिं लेभिरे। काश्चन अर्धशतकमपि अतिक्रम्य प्रकाश्यन्ते। सुधर्मा, शारदा, विश्वसंस्कृतम्, संस्कृतभवितव्यम्, संस्कृतप्रतिभा, गाण्डीवम्, संगमनी, भारती, संस्कृतरत्नाकरः, भारतोदयः, दूर्वा, गुञ्जारवः अन्याश्च नैकाः पत्रिकाः प्रगतिपथे सञ्चरन्त्योऽभिनन्दार्हाः सन्ति। 2017 तमे खैष्टेऽब्देऽपि कासाञ्चित् संस्कृत- पत्रिकाणां पञ्जीकरणं प्रवर्तनञ्चाभूत्।

भारतीयसंस्कृतपत्रकारसंघेन 2015तमे खैष्टेऽब्दे दिसम्बरमासस्य 11-12दिनाङ्कयोः दिल्लीस्थे अक्षरधाम्नि समायोजिते अधिवेशने सङ्कल्पितं यत् संस्कृतपत्रकारितायाः वर्षावधिकः सार्धशताब्दीसमारोहः समायोजनीयः। एतत्कृते विविधाभिः पत्रिकाभिः संस्थाभिश्च यथाशक्ति आयोजनं करणीयमासीत्। 06.02.2016तमे दिनांके नागपुरस्थ-संस्कृतभाषाप्रचारिसभायां, मार्तण्डरावजवाइकरस्मृतिव्याख्यानमालायां, कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालये च 21.08.2016तमे दिनाङ्के दिल्लीस्थ-देववाणीपरिषदः एकचत्वारिंशत्तमे सङ्कल्पनादिवससमारोहे डॉ.चन्द्रभूषणझा-महाभागस्य संस्कृतपत्रकारितापरकं व्याख्यानं समायोज्यत। अखिलभारतीयसंस्कृतसाहित्य-सम्मेलनेन दिल्ल्यां, उत्तरप्रदेशसंस्कृतसंस्थानेन च लखनऊनगरे संस्कृतपत्रकारितायाः दशां दिशञ्चावलम्ब्य एका सङ्गोष्ठी समायोजिता। दिल्ल्यां संस्कृतसंवादपक्षतः एकदिवसीया संगोष्ठी समायोज्यत। सर्वास्वेव गोष्ठीषु देशस्य विविधैः भागैः सम्प्राप्तैः शोधकर्तृभिः पत्रकारैः विद्वद्भिश्च लिखित-मौखिकवक्तव्यरूपेण स्वतथ्यपरा विचाराः प्रकटिताः। डॉ.बलदेवानन्दसागरस्य **'वैविध्य-समावेशिनी संस्कृतपत्रकारिता'** इति शीर्षको लेखः संस्कृतवाणी-पत्रस्य 78तमेऽङ्के प्रकाशितो जातः। डॉ.लक्ष्मीशर्ममहाभागायाः आचार्यजीवन-शर्मवर्यस्य च संस्कृतपत्रपत्रिकाः अवलम्ब्य लेखाः प्राकाश्यं गताः।

अस्मिन्नन्तराले संस्कृतपत्रकारितामवलम्ब्य डॉ.नित्यानन्दमिश्रस्य **संस्कृतपत्रकारिते**'ति शीर्षकः प्रकाशनाधीनः शोधप्रबन्धः मदक्षिलक्ष्यीभूतः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

डॉ.रामगोपालमिश्रेण हिन्दीभाषायां चतुर्दशकपूर्वं ग्रथितस्य 'संस्कृतपत्रकारिता का इतिहास' इत्यस्य ग्रन्थस्य शृंखलायां बहुमूल्यं योगदानं कुर्वाणः डॉ. नित्यानन्दमिश्रस्य ग्रन्थोऽयमस्ति।

अयं ग्रन्थः वर्ण्यदृशा शैलीदृशा चोल्लेखनीयं महत्वं बिभर्ति। अत्र संस्कृतसाहित्यस्य पत्रकारितापरंपरा तत्त्वसम्बलिता गुरुत्वपूर्णा च। संस्कृतसाहित्ये निहितानां गभीरशास्त्ररहस्यानामालोचना अस्यां परम्प्रायां यथैव अवलोक्यते तथैवापि युगधर्मसम्बलतिस्य आधुनिकसाहित्यस्यापि महती चर्चा पत्रपत्रिकादीनां पृष्ठानलंकरोति। विश्वस्य संवादः पत्रपत्रिकादिषु अन्यतमविभवत्वेन परिगणितः भवति। एतस्मात् कारणात् वक्तुं शक्यते यत् संस्कृतपत्रिकादीनामुपस्थितिः निश्चितरूपेण इमां देवभाषां परिप्रचारयति। संस्कृतभाषायां बहुपत्रपत्रिकाः प्रकाश्यन्ते। सहृदयाः विद्वांसः स्वकीयलब्धज्ञानेन लेखान् विलिख्य भाषाजगति अहरहः नवीनमान्दोलनं सृजन्ति। अत्र पूर्वोपस्थापितसूच्यनुसारं निम्नोक्ताः विषयाः आलोचिताः। ग्रन्थोऽयं द्वादशसु परिच्छेदेषु विभक्तोऽस्ति। प्रथमपरिच्छेदे प्राचीनयुगे व्यवहृतानां अग्निवाद्य-दूतादिव्यवस्थानाम् उल्लेखनपूर्वकं दैनिक-साप्ताहिक-पाक्षिकादिपत्रपत्रिकादीनां विषये चर्चा कृतास्ति। ''प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते''। अत एव यदेव गुरुत्वपूर्णं प्रयोजनं समाश्रित्य संस्कृतभाषायां पत्रपत्रिकाः प्रकाशिताः तस्मिन् विषये द्वितीयपरिच्छेदे आलोचना कृता। विशेषतः संस्कृतभाषा मृतभाषा इति वदताम् असंस्कृतज्ञानां मन्दविचारः अत्र खण्डितः एवं चापि संस्कृतशिक्षणे धर्मप्रचारे दर्शनप्रचारे, साहित्यसर्जनायाम्, हास्यरसपरिवेषणे, ग्रन्थप्रकाशने, संस्कृतप्रचारे इत्यादिषु विषयेषु पत्रपत्रिकादीनां योगदानं विस्तृततया आलोचितम्। अन्तर्निहितायां संस्कृतभाषायां यदेव विपुलं भाषासाहित्यं परिचर्चितं तस्य काव्यिक-प्राचीन-आधुनिक-कथितभाषारूपाणां सम्यक् चर्चा तृतीयपरिच्छेदे कृता। संस्कृतपत्रपत्रिकादिषु वर्तमानघटनासाहित्य-प्राचीनसाहित्य-आधुनिकसाहित्य-बालसाहित्य-समाचारप्रभृतितत्त्वनिष्ठं विषयवस्तु कथं तिष्ठति, तस्मिन् विषये चतुर्थपरिच्छेदे आलोचितम्। संस्कृतभाषायाः संरक्षणे पत्रकारितायाः भूमिका अतीव गुरुत्वपूर्णा। व्याकरणशुद्धतासम्पन्नं संस्कृतं प्रतिगृहं प्रापयितुं संस्कृतपत्रपत्रिकाः यथा यतमानाः सन्ति, तस्मिन् प्रसङ्गे पञ्चमपरिच्छेदे आलोचना विहिता। गवेषणा लुक्कायितं रहस्यं जनसमाजे समुपस्थापयति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अत एव संस्कृतपत्रकारितायाः उपरि यदेव शोधकार्यं कृतं विद्यते तस्मिन् विषये षष्ठपरिच्छेदे चर्चितम्। येन अत्रेतिहासे मेक्समुलर-एल्.डि. वर्णेट-अप्पाशास्त्रिराशिवडेकर-विण्टरनित्स-गुरुप्रसादशास्त्रि-प्रभृतीनां विदुषां शोधकार्यमवलम्ब्य विरचितानां प्रबन्धानामुपरि षष्ठपरिच्छेदे आलोचितम्। संस्कृतपत्रपत्रिकाः येन उत्साहेन प्रकाश्यन्ते, विभिन्नाभिः समस्याभिः समाक्रान्तः स उत्साहः दीर्घस्थायी न भवति। येन संस्कृतपत्रिका अल्पदिनाभ्यन्तरे पिहिताः भवन्ति। अत एव तासां समस्यानामुपस्थापनपूर्वकं दूरीकरणाय सप्तमपरिच्छेदे विचारः कृतः। सम्पादकाः पत्रपत्रिकादीनां जनकाः भवन्ति। तेषां व्यक्तित्वं पाण्डित्यं च आश्रित्य पत्रपत्रिकाः गौरवान्विताः भवन्ति। यद्यपि पत्रपत्रिकाः संसारे लोकप्रियाः आदृताश्च भवन्ति तथापि संपादकानां विषये जनाः यथापेक्षं परिचयं न प्राप्नुवन्ति। एतदर्थमष्टमपरिच्छेदे सम्पादकानां व्यक्तित्वस्य पाण्डित्यस्य चोपरि आलोचना कृता। अखिलः संसारः कालस्य अधीनः। अत एव पत्रपत्रिकादीनामुपरि कालस्यापि महान् प्रभावः पतति। एतदर्थं एकोनविंशशताब्द्याः प्रकाश्यमानानां पत्रिकाणामध्ययनं कृतम्। येन काशीविद्यासुधनिधि-प्रत्नकम्रनन्दिनी-विद्योदय-प्रभृत्यः पत्रपत्रिकाः नवमपरिच्छेदे अत्रालोचिताः। ऊनविंशशताब्दी इव विंशशताब्द्याः उपरि दशमपरिच्छेदे विचारः कृतः। फलतः जयन्ती संस्कृति-सुधर्मा-सूनृतवादिनी-देववाणी-सम्भाषणसन्देश-लोकभाषासुश्री-अमृतभाषाप्रभृतयः पत्रपत्रिकाः अत्र स्थापिताः। "संघे शक्तिः कलौ युगे"। अत एव संस्कृतपत्रपत्रिकादीनां संघस्थापनं नितरामनिवार्यम् इति विचार्य कतिपयैः विद्वद्भिः संस्कृतपत्रपत्रिकासंघः स्थापितः। तेषां संघानां संस्थानां चोपरि यथासाध्यम् एकादशपरिच्छेदे विचारः कृतः। कठिनपरिश्रमेण महता अनुशीलनेन च प्रस्तुतोऽयं शोधप्रबन्धः। विशेषतः सम्पादकैः सह आलोचनां विधाय पाठकानामभिमतं चाश्रित्य संस्कृतपत्रपत्रिकादीनां स्थायित्वप्रसङ्गे लोकादरविषये च परामर्शः द्वादशपरिच्छेदे प्रदत्तः। आशासे संस्कृतपत्रकारिताविषये जिज्ञासवः अनेन ग्रन्थेन नूनमुपकृताः भविष्यन्ति। पुनश्च आशासे यदनेन ग्रन्थेन प्रेरिताः सन्तः अन्येऽपि विद्वांसः संस्कृतपत्रकारितायाः नैकान् आयामान् उद्घाटयितुं प्रवृत्ताः भवेयुरिति। अहमस्य ग्रन्थस्य प्रणयनार्थं डॉ. नित्यानन्दमिश्रमहाभागाय भूयो भूयोऽभिनन्दनानि व्याहरामि।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अर्वाचीनसंस्कृतस्य एकः अतिरिक्तो विशेषाङ्कः सार्धशताब्दसम्पूर्त्यवसरे प्रकाशयितुमिष्ट आसीत्। जुलाईमासस्य पञ्चदशतारिकायाम् अर्वाचीनसंस्कृतस्य अयं विशेषाङ्कः प्रकाशनीयः आसीत्। प्रायः सामग्री संयोजिताप्यासीत् किन्तु अपरिहार्यकारणैः जुलाईमासस्य 15तारिका अतिक्रान्ता। अङ्के लघूनि संशोधनानि अपेक्ष्यन्ते स्म। अक्षरयोजकानां च दौर्लभ्यमासीत्। अतः जुलाईमासस्य अयं विशेषाङ्कः देववाणीपरिषदः द्विचत्वारिंशत्ततमे सङ्कल्पनादिवससमारोहे 21.08.2017तमे दिनाङ्के प्रकाशयितुमिष्यते।

अर्वाचीनसंस्कृतस्याऽस्मिन्नतिरिक्ते विशेषाङ्के अकारादिक्रमेण संस्कृतपत्रपत्रिकाणामेका सूची प्रदीयते। पत्रिकाणां प्रकाशनवर्षं क्वचित् पञ्जीकरणसंख्यायां प्रदत्तं वर्षमनुसृत्य संकेतितमस्ति। वस्तुतः पञ्जीकरणात्प्रागपि पत्रिकाणां प्रकाशनं प्रारभ्यते तत ऊर्ध्वं पञ्जीकरणसंख्या लभ्यते। कदाचित् पत्रिकायाः प्रकाशनं तु भवति किन्तु तस्याः पञ्जीकरणं बहुषु वर्षेषु सत्सु भवति। अस्यां स्थितौ पञ्जीकरणसंख्यायां प्रदत्तं वर्षं तस्याः पत्रिकायाः प्रकाशनस्य आद्यं वर्षं न भवति, केवलं पञ्जीकरणवर्षस्य सूचकमेव भवति। अस्माभिर्या सूची अस्मिन्नङ्के दीयते तत्र संशोधनं परिवर्धनञ्च कर्तुं विद्वांसः शोधकर्तारश्च सम्प्रार्थ्यन्ते। इयं सूची संस्कृतपत्रिकाकोशस्य आधाररूपेण स्वीकर्तुं शक्यते। आशासे, विदुषां सहयोगोऽत्र लभ्येत।

'अर्वाचीनसंस्कृत-सर्वस्वम्' इत्यस्मिन् लेखे अर्वाचीनसंस्कृतस्य त्रैमासिकपत्रस्य 15.07.1979तमे दिनांके प्रकाशितात् प्रवेशाङ्कात् 15.10.2018यावत् अग्रिमरूपेण प्रकाशितेषु अङ्केषु संकलितानां रचनानां, लेखानां, वार्तानां पाठकपत्राणां च परिचयः डा. अभिनवशुक्लेन दीयते। अस्मिन् विशिष्टाङ्के प्रकाशिता सामग्री अपि अस्मिँल्लेखे संयोज्यते। अस्याः सामग्र्याः परिचयार्थम् आदौ एका तालिकापि प्रदत्तास्ति या एतत्पङ्क्तिलेखकेन सज्जीकृतासीत्। तदनुसारं प्रथमं रचनायाः/लेखस्य शीर्षकं, तदनु कूटाङ्कः, तदनु लेखकनाम, तदनु अर्वाचीनसंस्कृतस्य वर्षाङ्कसंख्या तदनु च प्रकाशनदिनांकः दीयते। एतेन कूटाङ्केन ज्ञातुम् शक्यते यत् शीर्षकं मौलिकी रचनास्ति उताहो लेखोऽस्ति अथवा वार्तास्ति, किंवा पाठकपत्रमस्ति। अस्यां तालिकायां बहूनि काव्यरूपाणि तादृशाण्यपि सन्ति यानि भाषान्तरे व्यवहितानि किन्तु अनुकृत्य संस्कृतेऽपि व्यवह्रियन्ते। इयम् तालिका अधस्तादपि प्रस्तूयते–

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वर्गीकरण-तालिका

(१) मौलिकरचना:

1.01 महाकाव्यम्/ पुराणकाव्यम्/ बृहत्काव्यम्

1.02 खण्डकाव्यम् / लघुप्रबन्धकाव्यम्/ एकार्थकाव्यम्

1.03 शतककाव्यम्/ पञ्चाशत्/ अष्टकं/ सप्तशती

1.04 स्तोत्रकाव्यम्/ प्रशस्तिकाव्यम्/ वन्दना/ प्रार्थना

1.05 कविता/ रचना/ वार्ता-संग्रह:

1.06 गीतम्/ गीतिका/ गीत-संग्रह:/ घोषगीतम्

1.07 गजलगीति:/ दीर्घगजलगीति:

1.08 गद्यगीतम्

1.09 लोकगीति:

1.10 मुक्तकम्

1.11 सुभाषितम्/ उपदेशपद्यानि / सूक्तय:

1.12 समस्यापूर्ति:/ प्रहेलिका:/ चित्रकाव्यम्

1.13 पत्रकाव्यम्

1.14 शुभकामना/ अभिनन्दनम्/ आत्मनिवेदनम्/श्रद्धाञ्जलि:

1.15 छन्दोमुक्तं काव्यम्

1.16 प्रतिकाव्यम्

1.17 विवरणकाव्यम्/ पद्यमयं समीक्षणम्/ पद्यमयं व्याख्यानम्

1.18 दण्डककाव्यम्

1.19 नाटकम् / दशरूपकान्तर्गतानि रूपकाणि उपरूपकाणि च/ संलाप:

1.20 गीतिनाटिका

1.21 नृत्यनाटिका

1.22 एकांकरूपकम्/ प्रहसनम्

1.23 वीथी (नुक्कड़ नाटकम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

1.24 लघुनाटकम्
1.25 ध्वनिरूपकम्
1.26 कथा/ कथाकाव्यम्/ संवादकथा/ लोककथा
1.27 आत्मकथा
1.28 लघुकथा
1.29 बालकथा:/ शिक्षाकथा/ बोधकथा
1.30 उपन्यास:
1.31 दैनन्दिनी
1.32 आख्यानं/ आख्यायिका
1.33 क्षणिका
1.34 हास्य-व्यङ्ग्यविनोदा:/ विडम्बनकाव्यम्
1.35 ललितनिबन्ध:/ निबन्ध:
1.36 यात्रा-घटना-स्थान-संस्था-विवरणम् (गद्ये) तत्परकं संस्मरणम्
1.37 जीवनचरितम् / व्यक्तिपरिचय:
1.38 व्यक्तिविषयकं संस्मरणम्
1.39 हैकू/लघिष्ठा/बिल्वपत्रम्/सीज़ो/तान्का
1.40 अन्यत्/ चम्पू/ प्रबन्ध:

(२) अभिभाषणम्

(३) प्रसारितरचना:/ कविसम्मेलनेषु पठितरचना:

(४) पुरातनवाङ्मयत उद्धृता अंशा:

(५) अनूदितरचना/ रूपान्तरितरचना

5.01 पद्यम्
5.02 गद्यम्
5.03 चम्पू:
5.04 रूपकम्
5.05 अन्यत्

Pandit Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

(६) **लेखाः**

6.01 वैदिक-वाङ्मयम्
6.02 भाषाविज्ञानं, व्याकरणं, निरुक्तम्
6.03 दर्शनानि, तन्त्राणि, आगमाः, धर्मः, अर्थः, कामः, मोक्षः, संस्कृतिः
6.04 स्मृतयः, कर्मकाण्डम्
6.05 गणितं, ज्योतिषम्
6.06 आयुर्वेदः, चिकित्सा, स्वास्थ्यम्
6.07 मनोविज्ञानं, व्यक्तित्वविकासः, चरित्रनिर्माणम्
6.08 विज्ञानं, शिल्पम्
6.09 कलाः
6.10 साहित्येतिहासः, साहित्यालोचना, साहित्यकार-वृत्तम्, संस्कृतसाहित्य-परिचयः
6.11 साहित्यशास्त्रम्, नाट्यशास्त्रम्, सौन्दर्यशास्त्रम्, अलंकारशास्त्रम्
6.12 छन्दःशास्त्रम्
6.13 इतिहासः, भूगोलः, पुरातत्त्वविद्या
6.14 राष्ट्रं, राजनीतिः, सामयिक-समस्या
6.15 समाजः, परिवारः, आचार-व्यवहार-रीतयः, वेशभूषा
6.16 नारी, बालकल्याणम्, परिवारकल्याणं, दुर्बलविमर्शः मानवाधिकाराः, जीवनमूल्यानि, पयार्वरण-चेतना
6.17 शिक्षा
6.18 संस्कृतभाषा, संस्कृतपत्रकारिता
6.19 पुराणानि
6.20 संगणकविज्ञानम्
6.21 कल्पः
6.22 कोषशास्त्रम्
6.23 मातृकाशास्त्रम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

6.24 शोधसम्बद्धः
6.25 वास्तुशास्त्रम्
6.26 अन्यत्

(७) **पुस्तकसमीक्षा/ नवप्रकाशनचर्चा/ पुस्तकविमर्शः**
(८) **पाठकपत्राणि/ शुभकामना/ पत्राणि**
(९) **वार्ताः/ समाचारः**
(१०) **सम्पादकीयम्**
(११) **श्रद्धाञ्जलिः**
(१२) **विविधाः/ लेखक-परिचयः**

अस्यास्तालिकायाः संक्षेपोऽपि कर्तुं शक्यते। यथा मौलिकरचनाः दृश्यश्रव्यभेदेन वर्गद्वय एव स्थापयितुं शक्यन्ते। अथवा श्रव्यरचना गद्यपद्यमिश्ररूपेणापि स्थापयितुं शक्यन्ते। एवमेव लेखाः शास्त्रीय-सामयिकभेदेन द्विधैव वर्गीकर्तुं शक्यन्ते। तथापि काव्यरूपाणां भाषान्तरानुकरणात् संस्कृतेऽपि विषयशैल्यनुरोधेन विविधानि नामानि क्रियन्ते इत्यस्माद्धेतोः तालिकायां विस्तारो दृश्यते।

यदि विविधपत्रिकाणां सम्पादकाः स्वपत्रिकासु प्रकाशितायाः समग्रयाः उपर्यङ्कितरतालिकानुसारं सूचीं निर्माय स्व-स्व पत्रिकायाः विशेषांके प्रकाशयितुं सानुक्रोशा भवेयुस्तर्हि संस्कृतपत्रकारिताविषये जिज्ञासूनां उपकारः स्यादित्याशास्यते।

गतवर्षे एतत्पङ्क्तिलेखकेन काश्चन रचना प्रणीता आसन्। यासु **'आक्रमणं कुरु'**, **'शोभनं कृतम्'**, इत्याद्या रचनाः संस्कृतवाणी, संस्कृतसंवादः, प्राचीप्रज्ञा, इत्यादिषु पत्रिकासु प्रकाशिता जाताः। ईमेल-फेसबुक माध्यमेनापि एताः रचनाः शतशो जनैः पठिताः प्रशंसिताश्च। उर्याक्रमणानन्तरं राष्ट्रस्य कोटि-कोटि जनानां क्षोभं व्यञ्जयन्ती संस्कृतस्यैव रचना पप्रथममाविरभूत्। अस्याः प्राकट्यात् षड्दिनानन्तरं भारतेन शल्यचिकित्साक्रमणं कृत्वार्तंकिनां दुर्गाणि ध्वस्तानि। संस्कृतप्रतिभायां तत्सहसम्पादकानुरोधात् 'आक्रमणं कुरु' इत्याद्याः चतस्रः रचनाः प्रकाशनाय मया प्रेषिता आसन्। सम्भवतः चतस्रोऽपि रचनाः प्रकाशनार्थं स्वीकृताः स्युः किन्तु मन्ये सम्पादकस्य निर्देशात् अथवा

Pandit Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्थानानुरोधात् 'आक्रमणं कुरु' इतीयं रचना तत्र प्राकाश्यं नालभत। तत्र 'शोभनं कृतम्' इत्याद्याः तिस्रः रचनाः प्रकाशिताः जाताः। पत्रिकायां शीर्षकमासीत् काव्यचतुष्टयम्(द्र.उन्मेषः 61,पृ.44) किन्तु अनुक्रमे शीर्षकमासीत् काव्यत्रयम्। सम्पादकीये विदुषा सम्पादकेन एका टिप्पणी प्रदत्ता- **'राष्ट्रवादेन प्रेरितानि तात्कालिकानि त्वरितकाव्यानि बहुभिरिदानीं लिख्यन्ते। तत्र कवित्वं शून्यप्रायं भवति, क्षुद्रायाः भावुकताया उद्गारः प्रचुरं भवति। अयं साहित्यस्य पन्थाः नास्ति। आक्रमस्व आक्रमस्व इत्याद्याह्वानेन तात्कालिकी स्वार्थसाधनपरायणा राजनीतिस्तु भवति, कविता न भवति।'**(7)

अत्र किञ्चित् विमृश्यते- यदि राष्ट्रकल्याणकामनया प्रेरितानि तात्कालिकानि त्वरितकाव्यानि जनैर्लिख्यन्ते तर्हि का क्षतिर्भवति साहित्यस्य? तत्र कवित्वं शून्यप्रायं कथं भवति? क्षुद्रायाः भावुकतायाः उद्गारेण का हनिर्भवति लेखनकर्मणः? अयं साहित्यस्य पन्थाः कथं नास्ति? एवं कतमा तात्कालिकी स्वार्थसाधनपरायणा राजनीतिः क्रियते रचनाकारेण कथञ्च सा कविता न भवति? 'आक्रमणं कुरु' इतीमां रचनां परीक्षणाय गृह्णन्तु। किमत्र इष्टार्थव्यवच्छिन्ना पदावली नास्ति? किमत्र अदोषौ सगुणौ सालंकारौ शब्दार्थौ न स्तः? किमत्र वीररसात्मकं वाक्यं नास्ति? किमत्र रमणीयार्थप्रतिपादकः शब्दो नास्ति? किमत्र सहजभावानां समुच्छलनं नास्ति? किमत्र कोटिशो जनानां तात्कालिकभावानां अभिव्यक्तिरूपम् लोकानुकीर्तनं नास्ति? किमु शिवेतरक्षतिरूपं प्रयोजनम् नास्ति? किमु देशस्य शत्रूणां विनाशाय प्रेरणाप्रदानं कवेरकर्तव्यमस्ति? यदि शिशुपालवधे नारदस्य कृष्णं प्रति शिशुपालवधस्य प्रार्थना काव्यत्वेन स्वीक्रियते, यदि च 'अरातिसैन्यसिन्धु में सुवाडवाग्नि से जलो प्रवीर हो जयी बनो बढ़े चलो बढ़े चलो' इत्यत्रापि काव्यत्वं स्वीक्रियते, यदि च 'जहि शत्रुं महाबाहो' इत्यत्र काचित् विप्रतिपत्तिर्नास्ति तर्हि 'आक्रमणं कुरु' इत्यस्माद् वाक्यात् उद्वेगः किमिति अनुभूयते? किमिति शिरोवेदना जायते? किमु देशे आक्रमणे जाते बद्धाञ्जलिना कविना शत्रुः सादरं प्रार्थनीयः स्यात् -'कृपालो बन्धो! अस्माकं वीराणां शिरांसि छिन्धि देशवासिनः पददलितान् कुरु' इति। स्वार्थसाधनपरायणा कतमा राजनीतिरत्रावलोक्यते? किमु कस्यचित् राजनीतिकदलस्य सदस्यता कांक्ष्यते उताहो निर्वाचनटिकटमभिलष्यते उताहो मन्त्रिपदं कांक्ष्यतेऽनया रचनया।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अस्माभिस्तु आपातकाले कारागारयात्रां कृत्वापि कश्चित् स्वार्थो न साधितः। न कस्यचिद् राजनीतिकदलस्य सदस्यता स्वीकृता। अस्माकं पन्था अस्ति साहित्यस्य। तेनैव पथा चलामः चलिष्यामश्च। फतवादानेन साहित्यपथश्च्युता न भविष्यामः।

स्वार्थसाधनपरायणायाः राजनीतेः कृते एतादृशी रचना औपयिकी न भवति। तदर्थमन्ये उपायाः अवलम्बयितुं शक्यन्ते। तदर्थं कस्यचिद् सत्तारूढस्य मन्त्रिणो भाषान्तरनिबद्धस्य पुस्तकस्य संस्कृतरूपान्तरणं विधाय कस्मिंश्चिद् अवसरविशेषे तस्यानुकूल्यं प्रसादं वा कांक्षितुं कश्चित् प्रयतेत। कश्चित् कस्यचित् सत्तारूढस्य राजनेतुर्जीवनचरितात्मकं गद्यपद्यात्मकं प्ररोचरात्मकं ग्रन्थं विलिख्य सुविधाविशेषलाभाय लोकनिस्पृहः सन् प्रयतेत अथवा विनापि किञ्चिद् विलिख्य तत्समर्थने जयघोषान् कृत्वा वृत्तपत्रेषु सञ्चारमाध्यमेषु च तस्य समर्थनं प्रदर्श्य तद्वल्लभतां प्राप्य कमपि मनोगतं स्वार्थं साधयितुं कदाचित् प्रभवेत्। अथवा सततपरपैशुन्येन कुतर्काभ्यासेन च कस्यापि राजनीतिकदलस्य प्रवक्ता सन् कमपि स्वार्थं साधयेत्। संस्कृतेन कः स्वार्थः साध्येत? विशेषतः तद्रचनाभिः कतमः स्वार्थः संसिद्ध्येत का च स्वार्थसाधन-परायणा राजनीतिः कर्तुं शक्यते? मया मनोगतो भावः प्रकटितः स च सहस्रैर्जनैः श्रुत्वा हृदयसंवादेन संयोजितः। सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते इत्यानन्दवर्धनाचार्योक्तिश्चरितार्थीकृता। अत्र द्वाभ्यां तृतीयस्य कस्यचित् साहित्यिक-फतवादायिनोऽपेक्षैव नास्ति। कविना स्थाने सरस्वती प्रयुक्ता। तथा च सहृदया लब्धाः। इदमेव प्रमुखं प्रयोजनं रचनायाः। कविनेयं वाणी न तु स्वदेशखण्डनार्थमाह्वानं कर्तुं प्रयुक्ता नापि कस्यचित् राजनीतिकविचारधारायाः मुखं भूत्वा योजनाबद्धसामूहिकप्रयासेन प्रचारिता, नापि व्यूहं निर्माय प्रसारिता, इयं वाक्तु सहसैव शुद्धेन चेतसाविरभूत्। कोटिशो जना यदिच्छन्ति स्म तदेव मन्मुखान्निर्गतम्।

18.09.2016तमे दिनांके शत्रुणा उरीक्षेत्रे आक्रमणं कृतम् तस्माद्दिनादेव सम्पूर्णदेशः (मुष्टिमेयान् कांश्चित् जनान् विहाय) क्षुब्धः सन् शत्रोरुपरि प्रत्याक्रमणं विधातुं शासनं प्रचोदयति स्म। इयं लोकाकांक्षैव 23.09.2016तमे दिनांके 'आक्रमणं कुरु' इत्येवंरूपेणाक्षरबद्धा जाता। 'द्वितीय ग्लोबल लिटरेरी फेस्टिवल' इत्यत्र मन्मुखेन अभिव्यक्ता सती तत्रोपस्थितैः सर्वैरेव

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रोतृभिरास्वादिता अभिनन्दिता च। डॉ.बलरामशुक्लेन तस्यामेव तिथौ फेसबुकेऽस्य वृत्तस्य सूचना प्रदत्ता यत्र बहुभिः सुहृद्भिर्हर्षोऽभिव्यक्तः। पुनश्च 29.09.2016तमे दिनांके दिल्लीस्थे पी.जी.डी.ए.वी.(सान्ध्य)कॉलेजे सायं 4:00वादनकाले मया श्राविता। काव्यपाठावसाने तत्रत्यसंस्कृतविभागाध्यक्षेण डा. सत्यकाम शर्मणाहं ज्ञापितो यत् दूरदर्शने एवं वृत्तं प्रसार्यते यत् आक्रमणं जातम्। शत्रोश्च महती हानिर्जाता। इदमेवाभिलक्ष्य मन्ये 'संस्कृतवाणी' पत्रसम्पादकेन सम्पादकीये लिखितं **'ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति' इति भवभूतिवचनमनुसरन्ती समसामयिकी प्रत्यग्रा रचना 'आक्रमणं कुरु आक्रमणं कुरु' इत्याख्या डा.रमाकान्तशुक्लस्य रचना अस्मिन्नङ्के शिरोमौलिरूपा। अस्याः कवितायाः पाठानन्तरं भारतेन पाकिस्तानं प्रति आक्रमणं कृतम्। (संस्कृतवाणी १-१५ अक्टूबर २०१६, पृष्ठ.४)**

शल्यचिकित्साक्रमणानन्तरं(सर्जिकल स्ट्राइकानन्तरं) वृत्तं परिज्ञाय मया **'शोभनं कृत'**मितीयं रचना मनस्तोषाभिव्यञ्जनाय कृता। अस्यां रचनायामस्मद्देशवीराः समभिनन्दिताः।

द्वे अपि रचने मया अनेकत्र श्राविते यथा देववाणीपरिषदि, लखीमपुर खीरी नगरे 17.10.2016तमे दिनाङ्के समायोजिते दशहरामेलासंस्कृतकविसम्मेलने अन्येषु स्थानेषु च। सर्वत्र सर्वैरपीयं आत्मसात्कृता। कविसहृदयानामैक्यं तत्रादृश्यत। अपरं किं काम्यते साहित्यिकमार्गेण? किं कविः काव्यं पठतु, श्रोतारश्च मुद्गफलिका-चवर्णे व्यस्ताः स्युः? साहित्यं यदि भवति वक्तृश्रोत्रोस्तर्हि साहित्यस्य पन्था अन्वर्थितः। असूयकाय यदीदं न रोचते तर्हि कोऽत्र किं कर्तुं शक्नोति! मत्सरिणे यदि कस्यचित् वाणी न रोचते तर्हि कस्तस्य पुच्छमुत्पाटयेत्? पण्डितराजोक्तिरत्र स्मृतिपथमायाति-

'मद्वाणि मा कुरु विषादमनादरेण........'

सहित्यपथि चलन्ती काचिद्रचना उत्तमोत्तमकाव्यत्वेन स्वीकृता भवेत्, काचिदुत्तमत्वेन, काचित् मध्यमत्वेन, काचिदधमत्वेन, काचिदधमाधमत्वेन स्वीकर्तुं शक्यते परं सा साहित्यमार्गादेव प्रभ्रंशयितुं न शक्यते। यदि किञ्चिदभूतपूर्वं काव्यरूपं दृष्टिपथमायाति तदा तस्य नाम निर्धारणीयम्। तत्काव्यं आह्वानं भवतु, अन्याभिधानं वा भवतु तस्य लक्षणानि निर्धार्यन्ताम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'आक्रमणं कुरु' इतीयं रचना प्रस्थानकाव्यकोटिं गता यतो हि डा.सुरेन्द्रमोहनमिश्रेण 'कुर्वाक्रमणं कुर्वाक्रमण'मिति शीर्षकेण एकोनषष्टिपद्यात्मिका रचनामुमेव विषयमवलम्ब्य अनेनैव छन्दसा कैश्चिदेवाहोभिः प्रणीता। डॉ.राकेशरविणेयं रचना द्रागेव हिन्दीभाषया काव्यरूपान्तरं लम्भिता। काव्यप्रयोजनेषु अर्थलाभोऽप्यन्यतममस्ति अतो यदि कस्यचित् अर्थपूर्तिर्भवति तथापि का हानिः? तदापीयं कवितैवास्ति न तु राजनीतिः। यदि कविः स्वप्रेरणया किमपि रचयति तदा कविता। यदि सः कयापि राजनीतिकविचारधारया नियन्त्रितः सन् लिखति तदा कथञ्चित् राजनीतिः स्यात्। यदि रचनाकारः कमपि स्वार्थं लिप्सते, तदा स्वार्थसाधनपरा राजनीतिः कथयितुं शक्यते।

यद्यप्यत्र सम्पादकीयटिप्पण्यां 'केचिद्' इत्यनेन पदेन मन्नाम्न उल्लेखोऽभिधया न कृतः न च 'आक्रमस्व आक्रमस्व' इति पदेन मद्रचितायाः 'आक्रमणं कुरु आक्रमणं कुरु' इत्यस्याः रचनायाः अभिधानं क्रियते तथापि 'चौरस्य कूर्चे तृण'मितिन्यायेनात्र स्वतां पश्यता मया किमपि विमृश्यते।

पुनरेनां रचनां पर्यालोच्य अन्वीक्षकाः परीक्षकाः समीक्षका वा वदन्तु किमत्र कस्यापि राजनेतुः नामोल्लेखोऽस्ति यस्य कीर्तनेन कोऽपि स्वार्थः साधयितुं शक्यते? अत्राभिधया तस्य स्वदेशस्य कल्याणकामना कृतास्ति यस्मिन् बहुभाषाभाषिणोऽनेकवेशभूषिणोऽनेकसंस्कारयुक्ता बहुलतापोषिणो जनाः स्वराष्ट्रमङ्गलकामनां विश्वस्य च कल्याणकामनां कुर्वाणाः निवसन्ति। किंप्रणीतं साहित्यशास्त्रमनुसृत्येयं व्यवस्था दीयते यत् आक्रमस्वेति साहित्यस्य पन्था नास्ति?

अत्र स्वार्थसाधनमिदमेव यत् मनोगतस्य भावस्य वाचि निवेशनं स्यात्। नात्र राजनीतिर्मार्गणीया। अत्र स्पष्टमेव कविनीतिरन्विष्या। केचन रचनाकाराः परोक्षरूपेण किञ्चित् कथयितुम् अवसरं प्रतीक्षन्ते। केचन पुनः साक्षादेव स्वमनोगतं झटिति उद्गिरन्ति। यथा आदिकविना क्रौञ्चवधं कुर्वन्तं निषादं प्रति शापः प्रदत्तः। एवमेव यद्यस्मत्पुरः पैशाचिककृत्यानि कुर्वन् कारयन् वा अस्माकं प्रतिवेशी शत्रुतामाचरति तर्हि तस्य दण्डनार्थं स्वदेशं प्रेरयितुं वाक्प्रयोगः किमु पापमस्ति? साहित्यस्य पन्थाः स एव भवति यत्र स्वार्थं परित्यज्य भावुकतया हृदयमुद्घाट्यते। तथापि राष्ट्रस्य रक्षार्थं प्रयुक्ता

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वाणी यदि भवत उद्वेगं जनयति तर्हि किं कर्तुं शक्यते! एतादृशी रचना क्षणमात्रं पर्यवसायिनी स्यात् कल्पान्तस्थायिनी वा स्यात् यदि कर्तारं श्रोतारं वा समानानुभूत्या संयोजयति अथ च तेषां चेतःसु स्वराष्ट्ररक्षणभावनां जागरयितुं चेष्टते तर्हि अस्मादृशां क्षुद्रभावुकतापूरितानां तोष एव स्यात्। ये राजनीत्युपनेत्रेणैव साहित्यं दिदृक्षन्ति ते तथा कर्तुं स्वतन्त्राः। अस्तु वाग्विकल्पानामनन्तता केनापि एकेन दण्डाघातेन गड्डलिकाप्रवाहेण कस्मिंश्चिन् मार्गविशेष एव नेतुं न शक्यते। आकाशे गरुडोऽपि उत्पतति मशकोऽपि उत्पतति। यद्यपि सम्पादकीये एवम्भूता क्षुद्रटिप्पणी प्रायो न विमृश्यते तथापि मम प्रणम्यस्य सम्पादकमहोदयस्य शब्देभ्यः आदरं प्रदातुमस्माभिः किमपि विलिख्य सम्पादकीयस्यायं नूतनः पन्थाः प्रवर्त्यते। पुराणरीतिव्यतिक्रमोऽपि कदाचित् भवत्येव – 'लीक छोड़ तीनों चलें सायर सिंह सपूत।' अत्र प्रकाशितां 'आक्रमणं कुरु' इत्येतां रचनां अवलम्ब्य पाठकानां विचाराः सादरं आमन्त्र्यन्ते।

अस्मिन्नङ्के श्री जी.एस.श्रीनिवासमूर्तिमहाभागेन रचिता 'चन्द्रिका' नाम्नी खण्डकाव्यात्मिका रचनापि प्रकाश्यते। श्री जि.एस.श्रीनिवासमूर्तिमहोदयः भारतस्य कर्णाटकराज्ये गोरूरनाम्नि ग्रामे 02.11.1937 तमे दिनांके जनकात् श्रीसेल्वपिल्लै अय्यङ्गारात् जनन्यां श्रीमत्यां सीतम्मादेव्यां सञ्जातः। श्रीनिवासमूर्तिः एस् एस् एल् सि परीक्षापर्यन्तं गोरूरग्रामे शिक्षणं प्राप्य हासननाम्नि नगरे इंटर्मीडियट् कालेज्, बेंगलूरुनगरे सेंट्रल् कालेज् तथा इण्डियन् इन्स्टिट्यूट ऑफ् साइन्स् शिक्षणसंस्थासु उच्चशिक्षणं प्राप्य केन्द्रसर्वकारेण स्पर्धात्मकपरीक्षायां चितः केन्द्रसर्वकारस्य दूरसञ्चारविभागे उद्योगमवाप। नैकस्थलेषु नैकस्थानेषु भारते सर्वकारसेवां कृत्वा अन्ते दूरसञ्चारविभागस्य मन्त्रदातृपदे कार्यं कृत्वा निवृत्तः सन् अधुना बेंगलूरुनगरे '491 7th cross, 4th main, J.P.Nagar, 3rd Phase, Bangalore 560078' इत्यस्मिन् संकेते स्वभार्यया श्रीमत्या मैथिल्या सह निवसति। संस्कृतप्रेमिणा पित्रा प्राचोदितः अयं बाल्ये एव संस्कृतविपश्चिद्भिः अध्यापितः संस्कृताध्ययनं प्रारभत। परं तु सर्वकारस्य उद्योगं प्राप्य अनवधानात् निवृत्त्यनन्तरमेव पुनः संस्कृताध्ययनं कर्तुमशक्नोत्। अयम् अध्ययनाङ्ग इव अन्तर्जाले स्थानं निर्माय संस्कृते किमपि सर्जनात्मकं विलिख्य अन्तर्जालस्थाने प्राकटयत्। अनेन निर्मितः वृत्तनामलक्षणसूचकः तन्त्रांशः 'http://www.mediafire.com/?p21yo45io80ii5o' इत्यस्मिन्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जालपुटे लभ्यते। अनेन अनुष्टुब्लक्षणमधिकृत्य कृतं शोधपत्रं "Annals of Bhandarkar Oriental Research Institute" नाम्नि नियतकालिके ईसवी 2004 वर्षे प्रकटितम्। अस्य कविता: 'अर्वाचीनसंस्कृत'-'संस्कृतसंवाद'-'संस्कृतवाणी'प्रभृतिषु संस्कृतपत्रिकासु प्रकाशिता:। अस्य कवित्वेन सहृदया: सत्प्रेरणाम्, एकाग्रताम्, आनन्दं च लभन्ते। अस्य कर्तृत्वे विज्ञानाध्यात्ममैत्री साक्षात्कर्तुं शक्यते। अस्य संक्षिप्त: परिचय: 4.1.2016 तमे दिनांके देववाणी-परिषदा प्रकाशिते श्रीहीरकप्राभृतचतुर्थखण्डे 597 तमे पृष्ठे प्रकाशितोऽस्ति। श्री जि.एस.श्रीनिवासमूर्तिना '**चन्द्रिका**'भिधायामस्यां रचनायां सुप्रसिद्धाया: 'सिन्डरेला' कथाया: स्वमनोनुकूलं रम्यं रूपान्तरं विहितम्। कवे: छन्दोऽधिकार: भाषाधिकार: अभिव्यक्तिकौशलञ्च अभिनन्दनमर्हन्ति।

10.06.1939तमे दिनांके उत्तरप्रदेशस्य फैजाबादजनपदस्य पण्डितपुरग्रामे लब्धजन्मना अनेककाव्यकर्त्रा अयोध्यावासिना डा. देवीसहायपाण्डेय दीपेन कुण्डलियावृत्ते रचितान्येकादश पद्यानि विविध-साम्प्रतिकविषयानवलम्ब्य रचितानि। कुण्डलिया दोहा-रोला-संयोगरूपं वृत्तम्।

13.07.2017तमे दिनांके नवदिल्ल्यामेकस्य सांसदस्य आवासे कैश्चित् अत्युत्साहिभि: संस्कृताभिमानिभि: संस्कृतभाषायै भारतस्य राष्ट्रभाषापदं दातुं सर्वकार: निवेदनीय: इति विचार्य तत्सम्बद्ध: प्रस्ताव: हस्ताक्षरित:। तै: प्रधानमन्त्रिणे अस्मिन् विषये ज्ञापनपत्रं प्रदातुमपि निश्चितम्। अस्मिन्विषये का प्रगतिर्जाता इति तु न ज्ञायते अस्माभि: किन्तु अस्मिन् प्रसङ्गे **'राष्ट्रभाषा संस्कृतम्'** इति शीषकान्वितम् एकं घोषगीतम् एतत्पङ्क्तिलेखकेन तस्मिन्नेव दिने विरचितं यद्गातुम् आबालवृद्धा: जना: प्रभवन्ति। इदम् गीतम् 04.08. 2017तमे दिनांके लखनऊत: फेसबुके डा.जगदानन्दझामहोदयेन सजीवतया प्रसारितम् पुन: देववाणी'परिषदा समायोजिते श्रावणीकार्यक्रमे श्रावितं पुनश्च 12.08.2017तमे दिनांके दिल्ली-संस्कृत-अकादम्या समायोजिते राष्ट्रियसंस्कृतकविसम्मेलने श्रोतृभि: साकं गीतम्। अस्मिन्नङ्के इदमपि संयोज्यते।

आचार्यरमेशचन्द्रशुक्लस्य संस्कृतसाहित्यं प्रति योगदानमवलम्ब्य डा. राका शर्मा स्वलेखे विचारं करोति। आचार्यरमेशचन्द्रशुक्ल: देववाणी-परिषद: संस्थापकाध्यक्ष: अर्वाचीनसंस्कृतस्य परामर्शदाता किञ्च अनेकेषां ग्रन्थानां

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कर्ता आसीत्। तस्य ग्रन्थानां संक्षिप्तः परिचयः डा. राका शर्ममहाभागया प्रस्तूयते। एतेन पाठकानां चेतसि आचार्यशुक्लस्य कर्तृत्वं प्रति जिज्ञासा समुदीयेत इत्याशास्यते।

नवप्रकाशनचर्चायां केषाञ्चित् नवप्रकाशितग्रन्थानां संक्षिप्तचर्चा यथासम्भवं उदाहरणमुखेन क्रियते। अत्र विस्तृतसमीक्षायाः अवसरो न लभ्यते। यदि पाठकाः संकेतितग्रन्थानधीत्य तेषां समीक्षां कुर्वन्ति तर्हि स्वागतं तेभ्यो ब्रूमहे। अत्र तु स्थानानुरोधात् केवलं ग्रन्थस्य, ग्रन्थकर्तुः, ग्रन्थप्रकाशकस्य ग्रन्थविषयस्य च दिङ्मात्रम् संकेत एव कर्तुं शक्यते। अकरणान्मन्दकरणं श्रेयः। देववाणी 'परिषद्वार्तायां संस्कृतजगद्वार्तायां च तत्तत्सम्बद्धाः गतिविधयः संसूच्यन्ते।

2017 तमे वर्षे विश्वविद्यालयानुदानायोगेन अनेकाः संस्कृतपत्रपत्रिका अनुमोदिता यासु 'अर्वाचीनसंस्कृतम्' अप्यन्यतमास्ति। अस्मादङ्कात् आचार्यराधावल्लभत्रिपाठी आचार्यगिरीशचनद्रपन्तश्च अर्वाचीनसंसकृतस्य परामर्शदातृमण्डलस्य सदस्यत्वेन सादरमभिनन्द्येते।

अस्मादङ्कात् अर्वाचीनसंस्कृतस्य उद्देश्यप्रत्यायनपरकः सोपज्ञः एकः श्लोको अपि संयोज्यते। तद्यथा-

केन कुत्र कथं किं किं संस्कृते रच्यतेऽधुना।
इति ज्ञातुं सखे! नूनं पठार्वाचीनसंस्कृतम्॥

एकसप्ततितमे स्वातन्त्र्यदिवसे न तु दूरदर्शनतः संस्कृतवार्तानां प्रसारणमभूत्, न चापि राष्ट्रपतिसम्मानपत्रार्थं चितानां विदुषामधिसूचना प्रकाशिताभूत्। स्वातन्त्र्य दिवसस्य कृते सर्वेभ्यः शुभकामनाः।

कृपालवः पाठकाः अनवधानाज्जातानां अक्षरयोजनास्खलितानां संशोधनार्थं सादरमनुरुद्ध्यन्ते।

(रमाकान्तशुक्लः)
प्रधानसम्पादकः
अर्वाचीनसंस्कृतम्

दिनांकः 21.08.2017

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अर्वाचीनसंस्कृत - सर्वस्वम्

(अर्वाचीनसंस्कृते 15.10.2018 यावत्प्रकाशिता रचना, लेखाः, पत्राणि, वार्ताश्च)

- डॉ० अभिनव शुक्लः

आर 6 वाणी विहारः, नयी दिल्ली -110059

'देववाणी-परिषद्, दिल्ली' संस्थायाः त्रैमासिकं पत्रम् **'अर्वाचीनसंस्कृतम्'** 1979 तमे खैष्टेऽब्दे प्रारब्धम्। 01.02.1979 ई० तारिकायामस्य पञ्जीकरणार्थमावेदनपत्रं प्रस्तुतम्। 06.04.1979 तारिकायां च एफ-2 (ए/339) प्रेस/सी०सी०एस०/79 संख्यकं घोषणापत्रमनुमभूत्। अर्वाचीनसंस्कृतस्य प्रवेशाङ्कः 05.06.1979 तारिकायां मुद्रितः 15 जुलाई 1979 तारिकायां च प्रकाशितोऽभूत्। तदनु 15.10.1979 तारिकायां प्रथमवर्षस्य द्वितीयोऽङ्कः प्रकाशितो जातः। इत्थं प्रथमवर्षे केवलमङ्कद्वयमेव प्रकाशितमभूत्। अतः परं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबर-मासानां प्रत्येकं 15 तमे दिनांकेऽस्य प्रकाशनं भवति। कदाचित् कारणविशेषात्पत्रस्य नियततारिकासु प्रकाशनं न भूत्वा विलम्बेनापि भवति। एतादृशानामङ्कानां प्रकाशनतिथेरुल्लेखः पत्रे क्रियते। सप्तमवर्षीयश्चतुर्थोऽङ्कः 31अक्टूबर 1985 तारिकायां, अष्टमवर्षीयः प्रथमोऽङ्क 30 जनवरी 1986 ई० तारिकायाम्, नवमवर्षीयः प्रथमोऽङ्क 26 जनवरी 1987 ई० तारिकायाम्, द्वादशवर्षीय श्चतुर्थोऽङ्कः 7 जनवरी 1990 ई० तारिकायाम्, चतुर्दशवर्षीयस्तृतीयोऽङ्कः 15 अगस्त 1992 ई० तारिकायाम्, चतुर्दशवर्षीयश्चतुर्थोऽङ्कः 7 नवम्बर 1992 ई० तारिकायाम्, पञ्चदशवर्षीयः प्रथमोऽङ्कः 26.01.1993 तारिकायां, पञ्चदशवर्षीयस्तृतीयोऽङ्कः 21.08.1992 तारिकायां, षोडशवर्षीयः प्रथमोऽङ्कः 26.01.1994 तारिकायां, षोडशवर्षीयतृतीयोऽङ्कः 31.07.1994 तारिकायां, सप्तदशवर्षीयः प्रथमोऽङ्कः 15.02.1995 तारिकायां, सप्तदशवर्षीयो द्वितीयोऽङ्कः 15.05.1995 तारिकायां,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सप्तदशवर्षीयस्तृतीयोऽङ्कः 31.08.1995 तारिकायां, विंशवर्षीयः प्रथमोऽङ्कः 26.01.1998 तारिकायाम्, एकविंशवर्षीयस्तृतीयोऽङ्कः 31.07.1999 तारिकायां, द्वाविंशवर्षीयो द्वितीयोऽङ्कः 15.05.2000 तारिकायाम्, द्वाविंशवर्षीयस्तृतीयोऽङ्कः 31.08.2000 तारिकायाम्, त्रयोविंशवर्षीयो द्वितीयोऽङ्कः 30.04.2001 तारिकायाम्, त्रयोविंशवर्षीयस्तृतीयोऽङ्कः 15.08.2001 तारिकायाम्, चतुर्विंशवर्षीयः प्रथमोऽङ्कः 25.02.2002 तारिकायाम्, चतुर्विंशवर्षीयस्तृतीयोऽङ्कः 21.08.2002 तारिकायाम्, चतुर्विंशवर्षीयश्चतुर्थोऽङ्कः 25.10.2002 तारिकायाम्, पंचविंशवर्षीयश्चतुर्थोऽङ्कः 25.10.2003 तारिकायाम् च प्रकाशिता जाताः। कदाचित्संयुक्ताङ्का अपि प्रकाश्यन्ते। उदाहरणार्थं सप्तमवर्षीयौ द्वितीयतृतीयावङ्कौ संयुक्तरूपेण 15 अप्रैल 1985 तारिकायां प्रकाशितावभूताम् । अष्टादशवर्षीयाः प्रथम-द्वितीय-तृतीया अङ्का एकस्मिन् पुटबन्धे संयुक्ताङ्करूपेण 27.05.1996 तारिकायां प्रकाशिता जाताः। एकोनविंशे वर्षे द्वितीयतृतीयचतुर्था अङ्का एकस्मिन् पुटबन्धे संयुक्ताङ्करूपेण 15.10.1997 तारिकायां प्रकाशिता अभूवन्। विंशे वर्षे द्वितीयतृतीयचतुर्था अङ्का संयुक्ताङ्करूपेण 15.10.1998 तारिकायां प्रकाशिता जाताः । एकविंशे वर्षे प्रथम-द्वितीययोरङ्कयोः प्रकाशनं संयुक्तरूपेण 15.4. 1999 तारिकायां जातम्। 15.07.2004तमे दिनांके षड्विंशवर्षीयद्वितीयाङ्कादेकोनत्रिंशवर्षीयश्चतुर्थोऽङ्कः संयुक्तरूपेण(100-114) चतुर्षु खण्डेषु (पुटबन्धेषु)प्रकाशितोऽभूत्। यत्र पं.प्रेमनारायणद्विवेदिप्रणीतं 'श्रीमद्रामचरितमानसम्' प्रकाशितमभूत्। 15.07.2008तमे दिनांके त्रिंशत्तमे वर्षे तृतीयचतुर्थावङ्कौ संयुक्तरूपेण(117-118) प्रकाशितौ जातौ। 15.01. 2009तमे दिनांके एकत्रिंशद्वर्षीया प्रथमद्वितीयतृतीयचतुर्थाः अङ्काः संयुक्तरूपेण(119-122) प्रकाशिता जाताः। 15.10.2009तमे दिनांके द्वात्रिंशत्तमवर्षीया द्वितीयतृतीयचतुर्था अंका त्रयस्त्रिंशद्वर्षीयः प्रथमश्चाङ्कः संयुक्तरूपेण(124-127) प्रकाशिता जाता। 15.01.2009तमे दिनांके त्रयस्त्रिंशद्वर्षीया द्वितीयतृतीयचतुर्थाङ्का चतुस्त्रिंशद्वर्षीयः प्रथमश्चाङ्कः (128-131) प्रकाशिता जाताः। 15.04.2012तमे दिनांके चतुस्त्रिंशत्तमवर्षस्य द्वितीयाङ्कात् पञ्चत्रिंशद्वर्षस्य चतुर्थाकं यावत् सप्त अङ्काः संयुक्तरूपेण प्रकाशिताः। 15. 07.2014तमे दिनांके षट्त्रिंशद्वर्षस्य तृतीयायाङ्कात् चत्वारिंशद्वषीयचतुर्थमङ्कं यावत् 18 अङ्काः (141-151) संयुक्तरूपेण प्रकाशितः। केचन अतिरिक्ताः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अङ्काः अपि प्रकाशिता। 25.08.2000तमे दिनांके त्रिंशद्वर्षीयश्चतुर्थोऽतिरिक्ताङ्कः (118)अङ्करूपेण प्रकाशितः। 15.04.2000तमे दिनांके अप्रैलमासस्य अतिरिक्ताङ्कः 123क्रमाङ्करूपेण प्रकाशितः। 15.10.2010तमे दिनांके द्वात्रिंशद्वर्षीया द्वितीयतृतीयचतुर्था (124-126) अङ्काः अतिरिक्तरूपेण प्रकाशिताः। 15.01.2012तमे दिनांके त्रयस्त्रिंशद्वर्षीयश्चतुर्थोऽङ्कः अतिरिक्ताङ्कत्वेन प्रकाशितः। अस्मादङ्कात् अर्वाचीनसंस्कृतस्य मुखपृष्ठे 'अर्वाचीनम् सु ते मनः' इति वेदवाक्यं तथा आइ.एस.एस.एन नं. 2230-9551 अपि समायोज्यत। 15 जुलाई 2017तमे दिनांके अतिरिक्ताङ्करूपेण संस्कृतपत्रकरितासार्धशतीपूर्त्यवसरे प्रकाशितः। शेषे सर्वेऽप्यङ्का यथातिथि प्रकाशिता जाताः। अस्य पञ्जीकरणसंख्या आर.एन. 34554/79 (R.N. 34554/79) अस्ति। घोषणापत्रमनुरुध्य अंग्रेजी-हिन्दी-संस्कृत-भाषासु रचिता लेखाः संस्कृतभाषानिबद्धा रचनाश्चात्र प्रकाश्यन्ते । प्राधान्यं संस्कृतभाषाया एवास्ति। 15.10.2018 यावत् 111 पुटबन्धेषु, 159 अङ्काः प्रकाशिता जाताः येषां प्रायः 9000 पृष्ठेषु विज्ञापनानि तथा च सम्पादकीयान्यतिरिच्य 229 समीक्षकात्मकाः शोधपराः सूचनापराश्च लेखाः 1167 संख्याकाश्च संस्कृतरचनाः प्रकाशिताः। रचनासु महाकाव्य-खण्डकाव्य-पुराणकाव्य-गद्यकाव्य-गद्यप्रबन्ध-नाटक-ध्वनिनाटक-अष्टक-शतककाव्य-स्तोत्रकाव्य-दण्डक-गीत-गजल- मुक्तक-कथा-ललितनिबन्ध -अनुवादकाव्य-समस्यापूर्ति-यात्राकाव्य- स्फुटकवितादिविविध-काव्यरूपाणि विद्यन्ते । अर्वाचीनसंस्कृते प्रकाशिता नैका रचनाः स्वतन्त्रग्रन्थरूपेणापि प्रकाशिताः जाताः। अर्वाचीन- संस्कृतस्यावैतनिकः संस्थापकप्रधानसम्पादको डॉ.रमाकान्त शुक्लोऽस्ति यो हि 1979 तः पत्रमिदमग्रे नयति। अभिनवशुक्लः 2002 तः सहसम्पादकत्वेन 2003 तश्चोपसम्पादकत्वेन पत्रमिदं सेवते। 1979 तः 1984 पर्यन्तं डॉ०रामसुरेशपाण्डेयमहाभागाः पत्रस्य परामर्शदातृमण्डलं सदस्यत्वेन समलंकृतवन्तः। 1979 तः 9.9.1995 पर्यन्तम् आचार्यरमेशचन्द्रशुक्लमहाभागाः 1979 तः 21.5.1997 पर्यन्तं च डॉ.कृष्णकान्तशुक्लमहाभागाः पत्रस्य परामर्शदातृमण्डलस्य सदस्य- रूपेण स्वसेवाः समर्पितवन्तः। डा.रामसुरेशपाण्डेयः डा.ओमनाथबिमली च 15.10.2002 तः परामर्शदातृमंडले सदस्यत्वेन मनोनीतौ। 15.01.2008तः डा.हरिनारायणदीक्षितः परामर्शदातृमंडलस्य सदस्यत्वेन मनोनीतः। 3.12.2008तमे दिनांके डा.भास्कराचार्यत्रिपाठी दिवंगतः। 15.01.2009तः प्रा.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

किरणटण्डनमहोदया परामर्शदातृमंडलस्य सदस्यत्वेन मनोनीता। 13.06. 2014तमे दिनांके आचार्यश्रीनिवासरथः दिवंगतः। 15.07.2014तमे संयुक्ताङ्के स्थानाभावात् परामर्शदातृमण्डलसदस्यानां नामानि न प्रकाशितानि। डा.रामसुरेश-पाण्डेयः 24.11.2016तमे दिनांके दिवङ्गतः। अस्य पत्रस्य परामर्शदातृमण्डलस्य वर्तमानसदस्याः सन्ति- डॉ.अभिराजराजराजेन्द्रमिश्रः, डॉ.उमाकान्तशुक्लः, डॉ. विष्णुकान्तशुक्लः, डॉ.हरिनारायणदीक्षितः, डॉ.किरणटण्डनः, डॉ.इच्छारामद्विवेदी 'प्रणवः', डॉ.राधावल्लभत्रिपाठी, डॉ.गिरीशचन्द्रपन्तश्च। अस्मिन् पत्रे अर्वाचीनसंस्कृतरचनास्तत्सम्बद्धा लेखाश्च प्रकाश्यन्ते। साम्प्रतिकैरनेकैलेखकै रचनाकर्तृभिश्चात्र सहयोगः क्रियते। 15.10.2018 ई. पर्यन्तमर्वाचीनसंस्कृते प्रकाशितानां लेखानां, पत्राणां, वार्तानां, मौलिकरचनानां च कालक्रमानुसारं सूची लेखकनामनिर्देशपुरस्सरम् अत्र प्रस्तूयते। अस्यां सूच्यां भवतां पत्रम्, देववाणीपरिषद्वार्ता, संस्कृतजगद्वार्ता, श्रद्धाञ्जलश्चैति शीर्षकेषु अनेकेषानामङ्कानां सामग्री एकत्रैव दीयते। विस्तरशः पृथगगणनायां कृतायां त्वियं संख्या वर्धेत। रचना-विषयाणां वर्गीकरणं यथाक्रमम् अधो निर्दिश्यते-

वर्गीकरण-तालिका

(१) मौलिकरचनाः

1.01 महाकाव्यम्/ पुराणकाव्यम्/ बृहत्काव्यम्
1.02 खण्डकाव्यम् / लघुप्रबन्धकाव्यम्/ एकार्थकाव्यम्
1.03 शतककाव्यम्/ पञ्चाशत्/ अष्टक/ सप्तशती
1.04 स्तोत्रकाव्यम्/ प्रशस्तिकाव्यम्/ वन्दना/ प्रार्थना
1.05 कविता/ रचना/ वार्ता संग्रह
1.06 गीतम्/ गीतिका/ गीत-संग्रहः/ घोषगीतम्
1.07 गजलगीतिः/ दीर्घजगलगीतिः
1.08 गद्यगीतम्
1.09 लोकगीतिः
1.10 मुक्तकम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

1.11 सुभाषितम्/ उपदेशपद्यानि / सूक्तयः
1.12 समस्यापूर्तिः/ प्रहेलिकाः/ चित्रकाव्यम्
1.13 पत्रकाव्यम्
1.14 शुभकामना/ अभिनन्दनम्/ आत्मनिवेदनम्/ श्रद्धाञ्जलिः
1.15 छन्दोमुक्तं काव्यम्
1.16 प्रतिकाव्यम्
1.17 विवरणकाव्यम्/ पद्यमयं समीक्षणम्/ पद्यमयं व्याख्यानम्
1.18 दण्डककाव्यम्
1.19 नाटकम् / दशरूपकान्तर्गतानि रूपकाणि उपरूपकाणि च/ संलापः
1.20 गीतिनाटिका
1.21 नृत्यनाटिका
1.22 एकांकरूपकम्/ प्रहसनम्
1.23 वीथी (नुक्कड़) नाटकम्
1.24 लघुनाटकम्
1.25 ध्वनिरूपकम्
1.26 कथा/ कथाकाव्यम्/ संवाद कथा/ लोककथा
1.27 आत्मकथा
1.28 लघुकथा
1.29 बालकथाः/ शिक्षाकथा/ बोधकथा
1.30 उपन्यासः
1.31 दैनन्दिनी
1.32 आख्यानं/ आख्यायिका
1.33 क्षणिका
1.34 हास्य-व्यङ्ग्यविनोदाः/ विडम्बनकाव्यम्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

1.35 ललितनिबन्धः/ निबन्धः
1.36 यात्रा-घटना-स्थान-संस्था-विवरणम् (गद्ये) तत्परकं संस्मरणम्
1.37 जीवनचरितम् / व्यक्तिपरिचयः
1.38 व्यक्तिविषयकं संस्मरणम्
1.39 हैकू/लघिष्ठा/बिल्वपत्रम्/सीज़ो/तान्का
1.40 अन्यत्/ चम्पू/ प्रबन्धः

(२) अभिभाषणम्

(३) प्रसारितरचनाः/ कविसम्मेलनेषु पठितरचनाः

(४) पुरातनवाङ्मयतः उद्धृता अंशाः

(५) अनूदितरचना/ रूपान्तरितरचना

5.01 पद्यम्
5.02 गद्यम्
5.03 चम्पूः
5.04 रूपकम्
5.05 अन्यत्

(६) लेखाः

6.01 वैदिक-वाङ्मयम्
6.02 भाषाविज्ञानं, व्याकरणं, निरुक्तम्
6.03 दर्शनानि, तन्त्राणि, आगमाः, धर्मः, अर्थः, कामः, मोक्षः, संस्कृतिः
6.04 स्मृतयः, कर्मकाण्डम्
6.05 गणितं, ज्योतिषम्
6.06 आयुर्वेदः, चिकित्सा, स्वास्थ्यम्
6.07 मनोविज्ञानं, व्यक्तित्वविकासः, चरित्रनिर्माणम्
6.08 विज्ञानं, शिल्पम्
6.09 कलाः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

6.10 साहित्येतिहासः, साहित्यालोचना, साहित्यकार-वृत्तम्, संस्कृतसाहित्य-परिचयः
6.11 साहित्यशास्त्रम्, नाट्यशास्त्रम्, सौन्दर्यशास्त्रम्, अलंकारशास्त्रम्
6.12 छन्दःशास्त्रम्
6.13 इतिहासः, भूगोलः, पुरातत्त्वविद्या
6.14 राष्ट्रं, राजनीतिः, सामयिक-समस्या
6.15 समाजः, परिवारः, आचार-व्यवहार-रीतयः, वेषभूषा
6.16 नारी, बालकल्याणम्, परिवारकल्याणं, मानवाधिकाराः, जीवनमूल्यानि, पयार्वरण-चेतना
6.17 शिक्षा
6.18 संस्कृतभाषा, संस्कृतपत्रकारिता
6.19 पुराणानि
6.20 संगणकविज्ञानम्
6.21 कल्पः
6.22 कोषशास्त्रम्
6.23 मातृकाशास्त्रम्
6.24 शोधसम्बद्धः
6.25 वास्तुशास्त्रम्
6.26 अन्यत्

(७) पुस्तकसमीक्षा/ नवप्रकाशनचर्चा/ पुस्तकविमर्शः
(८) पाठकपत्राणि/ शुभकामना/ पत्राणि
(९) वार्ताः/ समाचारः
(१०) सम्पादकीयम्
(११) श्रद्धाञ्जलिः
(१२) विविधाः/ लेखकपरिचयः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मौलिकरचनाः

'अर्वाचीनसंस्कृतम्' इत्यस्य कृते 'अर्वासं' इति संक्षिप्तरूपं सूच्यां स्वीकृतमस्ति।

1. सप्तपदी(1.05) (पं० क० न० वरदराज अयंगारः) अर्वासं 2/2, 15 अप्रैल, 1980
2. भूतले भाति मेऽनारतं भारतम् (1.02)(संक्षेपः) (डॉ० रमाकान्त शुक्लः) अर्वासं 2/2, 15 अप्रैल, 1980
3. देववाणी-वसन्तः(1.05) (पं० बटुकनाथ शास्त्री खिस्ते) अर्वासं 2/2, 15 अप्रैल, 1980
4. भारतवन्दनम्(1.05) (डॉ० वासुदेवकृष्ण चतुर्वेदः) अर्वासं 2/2, 15 अप्रैल, 1980
5. राजधान्याः सुषमावर्णनम्(1.05) (डॉ० जगदीशदत्त दीक्षितः) अर्वासं 2/2, 15 अप्रैल, 1980
6. महामाये!(1.06) (डॉ० राजेन्द्र मिश्रः) अर्वासं 2/2, 15 अप्रैल, 1980
7. अहम् नेता(1.15,1.34) (पण्डितविष्णुकान्तशुक्लः) 2/2, 15 अप्रैल, 1980,
8. ते के न जानीमहे(1.12) ! (डॉ० कृष्णकान्त शुक्लः) अर्वासं 2/2, 15 अप्रैल, 1980
9. दुराशा(1.15) (डॉ० शिवप्रसाद भारद्वाजः) अर्वासं 2/2, 15 अप्रैल, 1980
10. अयि केसरिन् !(1.15) (डॉ० सुधाकराचार्य त्रिपाठी) अर्वासं 2/2, 15 अप्रैल, 1980
11. शिक्षा च का यत्र न संस्कृतं स्यात्?(1.05) (वैद्य रामस्वरूप शास्त्री) अर्वासं 2/2, 15 अप्रैल, 1980
12. आचाररूपकम्(1.05) (पं० रघुनाथप्रसादचतुर्वेदः) अर्वासं 2/2, 15 अप्रैल, 1980
13. रसिकता सिकता कणिका कुतः(1.12) (आचार्य आनन्द झा) अर्वासं 2/2, 15 अप्रैल, 1980

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

14. **गीर्वाणवाणीस्तवः**(1.04) (श्री विशुद्धानन्दशास्त्री) अर्वासं 2/2, 15 अप्रैल, 1980
15. **कर्णभूषणम्**(1.19) (नाटकम्) (डॉ० सी०आर० स्वामिनाथन्) अर्वासं 2/3, 15 जुलाई, 1980
16. **ध्वस्तं कुसुमम्**(1.02) (डॉ० सी० आर० स्वामिनाथन्) अर्वासं 2/3, 15 जुलाई, 1980
17. **नरबलिप्रबन्धः**(1.40) (डॉ० सी० आर० स्वामिनाथन्) अर्वासं 2/3, 15 जुलाई, 1980
18. **'भूतले भाति मेऽनारतं भारतम्'**(1.03) (काव्यम्)(डॉ० रमाकान्त शुक्लः) अर्वासं 2/4, 15 अक्टूबर, 1980
19. **श्रीमदप्पयदीक्षितचरितम् (गद्यकाव्यं)**(1.37) (डॉ० हरिनारायण दीक्षितः) अर्वासं 3/1, 15 जनवरी, 1981
20. **सदाशयसमुच्चयः**(5.01) (पं० टी०वी० परमेश्वर अय्यरः) अर्वासं 3/2, 15 अप्रैल, 1981
21. **आभाणकमञ्जरी**(5.01) (पं० टी० वी० परमेश्वर अय्यरः) अर्वासं 3/3, 15 जुलाई, 1981
22. **सुरभारती विजयते**(1.06) (डॉ० रमाकान्त शुक्लः) अर्वासं 3/3, 15 जुलाई, 1981
23. **संस्कृतवागष्टकम्**(1.05) (डॉ० उमाकान्त शुक्लः) अर्वासं 3/4, 15 अक्टूबर, 1981
24. **अन्योक्तिस्तबकम्**(1.10) (कविरत्नश्रीकृष्णसेमवालः) अर्वासं 4/2, 15 अप्रैल, 1982
25. **जीवनं सारभूतम्**(1.12) (डॉ० कृष्णकान्त शुक्लः) अर्वासं 4/2, 15 अप्रैल, 1982
26. **संवेदनं निवेदनं च**(1.05) (श्री मथुरादत्त जोशी) अर्वासं 4/2, 15 अप्रैल, 1982
27. **अन्धकारः**(1.15) (श्री हर्षदेव 'माधवः') अर्वासं 4/2, 15 अप्रैल, 1982
28. **भारते भासतां भारती संस्कृतिः**(1.05) (डॉ० वनेश्वर पाठकः) अर्वासं 4/3, 15 जुलाई, 1982

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

29. **अभिनवहनुमन्नाटकम्**(1.19) (नवाङ्केषु नाटकम्) (डॉ० रमेशचन्द्र शुक्ल:) अर्वासं 4/4, 15 अक्टूबर, 1982
30. **भाति मे भारती भारतेऽनारतम्**(1.05) (आचार्य वेदानन्द झा) अर्वासं 4/4, 15 अक्टूबर, 1982
31. **व्यवधानम्**(1.15) (अध्यापक: केशवचन्द्र दाश:) अर्वासं 4/4, 15 अक्टूबर, 1982

पं0 टी॰वी॰ परमेश्वर अय्यर-प्रणीतानि स्तबकाष्टके वर्गीकृतानि चतुस्त्रिंशदष्टकानि (साहित्यकौतुकम्)

32. **श्रीरुद्राष्टकम्**(1.03) (पं॰टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
33. **श्रीकृष्णाष्टकम्**(1.03) (पं॰टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
34. **श्रीमद्भारताष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
35. **राष्ट्रनेत्रष्टकम्**(1.03) (पं॰टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
36. **सैनिकाष्टकम्**(1.03) (पं॰टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
37. **विद्वदष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
38. **भिक्षुकाष्टकम्**(1.03)(पं॰टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
39. **द्रविणाष्टकम्**(1.03) (पं॰टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
40. **वस्त्राष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
41. **भोजनाष्टकम्**(1.03) (पं॰टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
42. **वेश्माष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

43. **खिस्तुदेवाष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
44. **श्रीकालिदासाष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
45. **श्रीरामाष्टकम्**(1.03) (पं॰टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
46. **श्रीगान्ध्यष्टकम्**(1.03) (पं॰टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
47. **श्रीदयानन्दाष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
48. **श्रीविनोबाष्टकम्**(1.03) (पं॰टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
49. **चलचित्राष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
50. **पत्रिकाष्टकम्**(1.03) (पं॰टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
51. **निद्राष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
52. **प्रेमाष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
53. **योषाष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
54. **पादपाष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
55. **ग्रामाष्टकम्**(1.03)(पं॰ टी॰ वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
56. **पुर्यष्टकम्**(1.03) (पं॰ टी॰ वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983
57. **सिंहाष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यरः) अर्वासं 5/1 जनवरी 1983

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

58. **हंसाष्टकम्**(1.03) (पं॰ टी॰ वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
59. **गर्दभाष्टकम्**(1.03) (पं॰ टी॰वी॰ परमेश्वर अय्यर:) अर्वासं 5/1 जनवरी 1983
128. **शारदाकाराणामनुमतिपत्रम्**(8) (सम्पादकः वसन्त अनन्त गाडगील:) अर्वासं, 16/4, 15 अक्टूबर, 1994

129. **गुजरात संस्कृतसाहित्य-अकादमी-सोमनाथ-रसोत्सव-स्वागतव्याहृतिः**(1.14) (डा॰ गौतम पटेल:) अर्वासं, 17/2, 15 मई, 1995

130. **अर्वाचीनशिक्षापद्धत्यां नैतिकी शिक्षा**(6.10) (डा॰ शशि तिवारी) अर्वासं, 17/2, 15 अप्रैल, 1995

131. **'प्रणव' कवेः इच्छारामद्विवेदस्य सत्प्रेरणानाटकस्य समीक्षणम्**(6.10) (डा॰ रमाकान्त शुक्लः) अर्वासं, 17/2, 15 मई, 1995

132. **नैवेद्यम्**(6.10) (डा॰ जनार्दनप्रसाद पाण्डेय 'मणिः') अर्वासं, 17/3 31 अक्टूबर 1995

133. **विष्णुकाव्यस्य कर्त्ता श्री 108 पं॰ सत्यदेवो वासिष्ठः**(1.37) (डा॰ रमाकान्त शुक्लः) अर्वासं, 18/1-3, 27 मई, 1996

134. **संस्कृते शपथग्रहणार्थं सांसदा वर्धाप्यन्ते!**(8) (सम्पादकः) 18/1-3, 27 मई, 1996

135. **कं वा दयालुं शरणं व्रजेम**(11) (डा॰ बटोही झा) अर्वासं, 18/4, 15 अक्टूबर, 1996

136. **देववाणी-परिषदो वार्षिकं विवरणम्**(9) (15.2.1993-8.9.1996) (डॉ॰ रमाकान्त शुक्लः) अर्वासं, 18/4, 15 अक्टूबर, 1995

137. **शोकवृत्तम्**(11) (सम्पादकः) अर्वासं, 18/4, 15 अक्टूबर 1996

138. **आधुनिसंस्कृतकाव्योपलब्धयः**(6.10) (डॉ॰ राधावल्लभ त्रिपाठी) अर्वासं, 19/1, 15 जनवरी, 1997

139. **दशमविश्वसंस्कृतसम्मेलनावसरे संस्कृतकविसम्मेलनम्**(9) (डॉ॰ रमाकान्त शुक्लः) अर्वासं, 19/1, 15 जनवरी, 1997

140. **दशमविश्वसंस्कृतसम्मेलने व्यवस्था**(9) (डॉ॰ रमाकान्त शुक्लः) अर्वासं, 91/1, 15 जनवरी 1997

141. **लब्धं भवतीनां पत्रम्**(8) (डॉ॰ कुमुद कान्हे) अर्वासं, 19/1, 15 जनवरी, 1997

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

142. **कीर्तिशेषेभ्यो दवेवाणी-परिषत्सदस्येभ्यः श्रद्धाञ्जलिः**(11) (डॉ० रमाकान्त शुक्लः) अर्वासं, 19/1, 15 जनवरी 1997

143. **पत्रम्**(8) (श्री जगदीशः शास्त्री) अर्वासं, 21/1, 26 जनवरी, 1998

144. **सत्याग्रहनीतिकाव्यसमीक्षणम्**(10) (सत्याग्रहनीतिकाव्यस्य चतुर्थसंस्करणस्य सम्पादकीयम्) (डॉ० रमाकान्त शुक्लः) अर्वासं, 21/1-2, 15 अप्रैल, 1999

145. **'भाति मे भारते' प्राक्तनकाव्यप्रतिबिम्बनम्**(6.10) (डॉ० ललित कुमार गौडः) अर्वासं, 21/3, 31 जुलाई, 1999

146. **भवतां पत्रम्**(8) (प्रो० रेवाप्रसाद द्विवेदी, म० अ० लक्ष्मीताताचार्यः, राधावखभः) अर्वासं, 21/3, 31 जुलाई, 1999

147. **पटेलमञ्जरी - एकं निरीक्षणम्**(6.10) (श्री गिरिशः जानी) अर्वासं, 21/4, 15 अक्टूबर, 1999

148. **सुधर्मायाः साहित्यसेवा**(6.10) (डॉ० बा० श्री० रामकृष्णरावः) अर्वासं, 21/4, 15 अक्टूबर, 1999

149. **व्योमशेखर की 'अहं राष्ट्री' : शिल्प और संवेदन**(6.10) (श्रीमती शशि चौहान) अर्वासं, 21/4, 15 अक्टूबर, 1999

150. **अर्वाचीनसंस्कृते** 1999 **यावत्प्रकाशिता सामग्री (लेखाः, पत्राणि, वार्ता रचनाश्च)**(10) (डा० चन्द्रमौलिशुक्लः) अर्वासं, 21/4, 15 अक्टूबर, 1999

151. **अ0भा0संस्कृतपद्यपाठ प्रतियोगिता-सूचना**(9) (डॉ० रमाकान्त शुक्लः) अर्वासं, 22/1, 15 जनवरी, 2000

152. **किमर्थं संस्कृतवर्षम्**(1.35) (डॉ० नोदनाथमिश्रः 'यशस्वी') अर्वासं, 22/2, 15 मई, 2000

153. **देववाणी-परिषद्, दिल्ली** 25.2.2000 **तारिकायाम् 'अ.भा. संस्कृतपद्यपाठप्रतियोगितामयोजितवती**(9) (डॉ० रमाकान्त शुक्लः) अर्वासं, 22/2, 15 मई, 2000

154. **उद्घाटन-भाषणम्**(2) (पद्मभूषणडॉ० बिन्देश्वरपाठकः) अर्वासं, 22/2, 15 मई, 2000

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

155. **एकादशं विश्वसंस्कृतसम्मेलनम्**(9) (डॉ० कमला भारद्वाजः) अर्वासं, 22/2, 15 मई, 2000

156. **इटलीदेशे एकादशं विश्वसंस्कृतसम्मेलनम्**(9) (डॉ० शशि तिवारी) अर्वासं, 22/2, 15 मई, 2000

157. **विश्वशान्त्यै संस्कृतमेव**(1.5) (प्रो० रमेशकुमार पाण्डेयः) अर्वासं, 22/2, 15 मई, 2000

158. **आचार्यरामकृपालुद्विवेदिनः संस्कृतसाहित्यम्**(6.10) (डॉ० कैलाशनाथ द्विवेदी) अर्वासं, 22/3, 31 अगस्त, 2000

159. **देववाणी-परिषदो रजतजयन्तीवर्षे आमन्त्रणम्**(9) (डॉ० रमाकान्त शुक्लः) अर्वासं, 22/4, 15 अक्टूबर, 2000

160. **संस्कृते विज्ञानम् (समीक्षा)**(7) (डॉ० रमाकान्त शुक्लः) अर्वासं, 23/2, 15 अप्रैल, 2001

161. **अवस्थिनो बच्चूलालस्य प्रतानिनी**(6.10) (डॉ० धर्मेन्द्रकुमारसिंह-देवः) अर्वासं, 23/3, 15 अगस्त, 2001

162. **विंशशताब्दीये संस्कृतकाव्ये प्रतिबिम्बितं भारतम्**(6.10) (डॉ० रमाकान्त शुक्लः) अर्वासं, 23/3, 15 अगस्त, 2001

163. **डॉ0 वर्णेकरमहोदयानां शिवराजनिष्ठसाहित्ये राष्ट्रियविचाराः**(6.10) (प्रा० सौ० उर्मिला अराणके) अर्वासं, 24/1, 15 जनवरी, 2002

164. **किं कुर्युः संस्कृतज्ञाः?**(1.35) (आचार्य जग औतार शर्मा) अर्वासं, 24/1, 15 जनवरी, 2002

165. **लघ्वी कथा**(1.28) (श्री प्रकाशचन्द्र मिश्रः) अर्वासं, 24/2, 15 अप्रैल, 2002

166. **विज्ञापनस्य भाषा संस्कृतमपि**(1.35) (डॉ० प्रवेश सक्सेना) अर्वासं, 24/3, 15 जुलाई, 2002

167. **मासद्वयेन व्याकरणमधीयताम्**(9) (लुब्ना मरियम) अर्वासं, 24/3, 15 जुलाई, 2002

168. **आयुर्यज्ञेन कल्पताम्**(1.35) (देवर्षि कलानाथ शास्त्री) अर्वासं, 24/3, 15 जुलाई, 2002

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

169. **साकेतसौरभस्य भूमिका**(10) (डॉ० भास्कराचार्य त्रिपाठी) अर्वासं, 24/4, 15 अक्टूबर, 2002

170. **अर्वाचीनसंस्कृतसाहित्यसर्वेक्षणम्**(12) (डॉ० रमाकान्त शुक्लः) अर्वासं, 24/4, 15 अक्टूबर, 2002

171. **अर्वाचीनसंस्कृतसाहित्यसंगोष्ठीप्रतिवेदनम्**(9) (डॉ० मञ्जुलता शर्मा) अर्वासं, 24/4, 15 अक्टूबर, 2002

172. **रामायणेषु मानवाधिकारः**(1.35) (आचार्य पं० आद्याचरणझा) अर्वासं, 25/3, 15 जुलाई, 2003

173. **अर्वाचीनसंस्कृतसाहित्ये आध्यात्मिकी चेतना**(1.35) (डॉ० (श्रीमती) शैल वर्मा) अर्वासं, 25/4, 15 अक्टूबर, 2003

174. **कुलपतिकुटुम्बशास्त्रिणां पत्रम्**(8) (प्रो० वें० कुटुम्बशास्त्री) अर्वासं, 25/4, 15 अक्टूबर, 2003

175. **शारदाकाराणामुत्साहः**(9,10) (डा० रमाकान्त शुक्लः) अर्वासं, 25/4, 15 अक्टूबर, 2003

176. **राष्ट्रियसंहतिः संस्कृतं च**(1.35) (श्री० सुन्दरराजः) अर्वासं, 26/1, 15 जनवरी, 2004

177. **अर्वाचीनसंस्कृतस्य** 25 **वर्षाणि : अर्वाचीनसंस्कृते** 15.1.2004 **यावत्प्रकाशिता सामग्री (लेखाः, पत्राणि, वार्ता रचनाश्च)** (12) (डा० चन्द्रमौलिशुक्लः) अर्वासं, 26/1, 15 जनवरी, 2004

178. **संदेशः**(8) (श्री महाराज कृष्ण कावः) अर्वासं, 22/2, 15 मई, 2000

179. **स्वस्तिवाक्**(8) (कुलपतिः 'अभिराज' राजेन्द्र मिश्र) अर्वासं, 26/2. 29/4 संयुक्तांक- प्रथम खण्डः, 100-103 अंका 15 अप्रिल 2004-15 जनवरी 2005

180. **स्वस्तिवाक्**(8) (पं. आद्याचरण झा) अर्वासं, 26/2 . 29/4 संयुक्तांक - प्रथम खण्डः, 100-103 अंका 15 अप्रिल 2004-15 जनवरी 2005

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

181. **शुभकामनासंदेशः**(8) (डा. मधुर शास्त्री.) अर्वासं, 26/2.29/4 संयुक्तांक-प्रथम खण्डः, 100-103 अंका 15 अप्रिल 2004-15 जनवरी 2005

182. **शुभकामनासंदेशः**(8) (डा. विश्वासः) अर्वासं, 26/2.29/4 संयुक्तांक - प्रथम खण्डः, 100-103 अंका 15 अप्रिल 2004-15 जनवरी 2005

183. **शुभकामनासंदेशः**(8) (डा. सुदीप जैन) अर्वासं, 26/2.29/4 संयुक्तांक - प्रथम खण्डः, 100-103 अंका 15 अप्रिल 2004-15 जनवरी 2005

184. **शुभकामनासंदेशः**(8) (श्री रमाकांत गोस्वामी) अर्वासं, 26/2.29/4 संयुक्तांक- प्रथम खण्डः, 100-103 अंका 15 अप्रिल 2004-15 जनवरी 2005

185. **शुभकामनासंदेशः**(8) (प्रो. परमानन्द शास्त्री) अर्वासं, 26/2.29/4 संयुक्तांक- प्रथम खण्डः, 100-103 अंका 15 अप्रिल 2004-15 जनवरी 2005

186. **शुभकामनासंदेशः**(8) (डा. कमल अभ्यंकरः) अर्वासं, 26/2.29/4 संयुक्तांक- प्रथम खण्डः, 100-103 अंका 15 अप्रिल 2004-15 जनवरी 2005

187. **शुभकामनासंदेशः**(8) (डा. कुलानन्द भारतीयः) अर्वासं, 26/2.29/4 संयुक्तांक- प्रथम खण्डः, 100-103 अंका 15 अप्रिल 2004-15 जनवरी 2005

188. **श्रीमद्रामचरितमानसस्य पद्यानां वर्णानुपूर्व्या सूची**(12) (डा. रमाकान्त शुक्लः) अर्वासं, 30/1 15 जनवरी 2008

189. **श्रीमद्रामचरितमानसस्य संख्याशुद्धिपत्रम्**(12) (डा. रमाकान्त शुक्लः) 30/1 15 जनवरी 2008

190. **श्रीमद्रामचरितमानसस्य शुद्धिपत्रम्**(12) (डा. रमाकान्त शुक्लः) अर्वासं, 30/1 15 जनवरी 2008

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

191. **जाबालिपुरं चल (एक समीक्षा)**(6.10) (डा. श्रीमती सावित्री गुप्ता) अर्वासं, 30/2 15 अप्रैल 2008

192. **भारतजनताहम् की राष्ट्रीय भावना**(6.10) (डॉ० श्रीमती शैल वर्मा) अर्वासं, 30/3.4 15 जुलाई 2008

193. **पाश्चात्त्यकाव्यांगविम्बदृष्टया वीरकुमारसिंहचरितमहाकाव्यस्य समीक्षणम**(6.10) (प्रो. डॉ० भारतीबेन जे सोलंकी) अर्वासं, 30/3.4 15 जुलाई 2008

194. **साध्यसाधनयोरेकरूपता**(1.35) (डॉ० विनोद चौधरी) अर्वासं, 30/3.4 15 जुलाई 2008

195. **एकंसद् बहुधा विलोक्यते भारतम् : एक समीक्षण**(6.10)(डॉ० कृष्णमोहन पाण्डेय) अर्वासं, 30/3.4 15 जुलाई 2008

196. **रौति ते भारतम् (समीक्षा)**(6.10) (डा. पुष्पा गुप्ता) अर्वासं, 30/3.4 15 जुलाई 2008

197. **भारतजनताहम् कविता का संक्षिप्त समीक्षण**(6.10) (डा. रामेश्वर प्रसाद गुप्तः) अर्वासं, 30/3.4 15 जुलाई 2008

198. **आयुर्वेदशास्त्रस्य परिप्रेक्ष्ये सत्याग्रहनीतिकाव्यस्य अनुशीलनम्** (6.10, 6.24)(डॉ० चन्द्रमौलि शुक्लः) अर्वासं, 31/1.4 15 जनवरी-15 अक्टूबर 2009 संयुक्तांकः

198. **स्रग्विणी छन्द और अर्वाचीन संस्कृत कविता** (6.10)(डॉ० दुर्गा प्रसाद सिंह) अर्वासं, 31/1.4 15 जनवरी -15 अक्टूबर 2009 संयुक्तांकः

200. **स्वामिदयानन्दस्य चिन्तने सामाजिकी व्यवस्था**(6.24) डा. सुन्दरलाल कथूरिया, पृष्ठ 32, अर्वासं, 32/1 (123) 15 जनवरी 2010

201. **'जय भारतभूमे' में राष्ट्रीय भावना**(6.10) डा. राजशेखर मिश्र, पृष्ठ 43, अर्वासं, 32/1 (123) 15 जनवरी 2010

202. **सत्यमेव रसवत्फलम्**(1.35) डा. रामेश्वरप्रसाद गुप्तः, पृष्ठ 61, अर्वासं, 32/1 (123) 15 जनवरी 2010

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

203. **श्रीधर भास्कर वर्णेकर-कृत श्रीशिवराज्योदयम् महाकाव्य का साहित्यशास्त्रीय अध्ययन (अध्याय 1-3)**(6.24) (डॉ०अभिनव शुक्ल) अर्वासं, 32/1.4 15 अप्रैल-15 अक्टूबर 2010 संयुक्तांकः

204. **श्रीधर भास्कर वर्णेकर-कृत श्रीशिवराज्योदयम् महाकाव्य का साहित्यशास्त्रीय अध्ययन (अध्याय 4-8)**(6.24)(डॉ० अभिनव शुक्ल) अर्वासं, 33/1. 4 15 जनवरी - 15 अक्टूबर 2011 संयुक्तांकः

205. **श्रीमद्भगवद्गीतायां कर्मयोगः तथा वर्तमानकाले तस्य उपयोगिता**(1.35) डा. वसन्ता एम., पृष्ठ 17, अर्वासं 32/2 (123 अतिरिक्तांकः) 15 अप्रैल 2010

206. **प्रो. त्र्यम्बक आत्माराम भण्डारकर**(1.37) डा. रेवती साकलकर, पृष्ठ 27, अर्वासं 32/2 (123 अतिरिक्तांकः) 15 अप्रैल 2010

207. **मानवाधिकारविधायिन्यः हिन्दूविधेः शाखाः**(1.35) प्रो. अगम कुलश्रेष्ठः, पृष्ठ 31, अर्वासं 32/2 (123 अतिरिक्तांकः) 15 अप्रैल 2010

208. **'भाति मे भारतम्' भारत देश की दृश्यावलि,** (6.10)प्रो. सत्यदेव चौधरी, पृष्ठ 35, अर्वासं 32/2 (123 अतिरिक्तांकः) 15 अप्रैल 2010

209. **'शशिभूषणचरित'- समीक्षा**( ) आचार्य अनिल कुमार दाशः, पृष्ठ 37, अर्वासं 32/2 (123 अतिरिक्तांकः) 15 अप्रैल 2010, 6.10

210. **दूतकाव्यपरम्परायां श्रीहनुमद्दूतगीतिकाव्यस्य महत्त्वम्**(6.10) डा. मङ्गलारामः, पृष्ठ 35, अर्वासं 32/2.4 (124.126 अतिरिक्तः संयुक्तोऽङ्कः) 15 अक्टूबर 2010

211. **संस्कृत भाषा में अन्तर्राष्ट्रिय प्रयोग**(6.18) प्रो. अगम कुलश्रेष्ठ, पृष्ठ 40, अर्वासं 33/1 (अतिरिक्तोऽङ्कः), 15 जनवरी 2011

212. **संस्कृत पत्रकारिता-एक विमर्श**(6.18) शास्त्री कोसलेन्द्रदास, पृष्ठ, 44, अर्वासं 33/1 (अतिरिक्तोऽङ्कः), 15 जनवरी 2011

213. **संस्कृत पुस्तकों का पहला विश्व महाकुंभ**(9)डा. अजय कुमार मिश्र, पृष्ठ 49, अर्वासं 33/1 (अतिरिक्तोऽङ्कः), 15 जनवरी 2011

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

214. **भारतीयसंस्कृतपत्रकारसङ्घस्य पञ्जीकरणम्**(9) डा. बलदेवानन्द सागरः, पृष्ठ 4ए अर्वासं 33/2.3 (अतिरिक्तोऽङ्कः),15 अप्रैल 2011

215. **काव्यदृष्ट्या प्रसन्नराघवम्**(6.10) डा. रमेशचन्द्र पाण्डेयः, पृष्ठ 54, अर्वासं, 33/2.3 (अतिरिक्तोऽङ्कः), 15 अप्रैल 2011

216. **संस्कृत वाङ्मय और मानव-मन**(1.35) डा. (श्रीमती) सुकेश शर्मा, पृष्ठ 62, अर्वासं, 33/2.3 (अतिरिक्तोऽङ्कः), 15 अप्रैल 2011

217. **आधुनिक संस्कृत कविता की लोकधर्मी परम्परा**(6.10) कौशल तिवारी, पृष्ठ 70, अर्वासं 33/2.3 (अतिरिक्तोऽङ्कः), 15 अप्रैल 2011

218. **विश्वसंस्कृतसम्मेलनस्य समापनवक्तव्यम्**(2) (आचार्य राधावल्लभः त्रिपाठी), पृष्ठ १४५, अर्वासं(३३/४-३४/१ अतिरिक्त- संयुक्ताङ्कः १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012

219. **पञ्चदशे विश्वसंस्कृत-सम्मेलने आधुनिक-संस्कृत-साहित्यम्**(6.10) (डा. अभिनव शुक्लः) पृष्ठ १५२, अर्वासं(३३/४-३४/१, अतिरिक्तसंयुक्ताङ्कः १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012

220. **कवित्वं मे तिरोभूतं : समीक्षा**(6.10) (डा. जनार्दन प्रसाद पाण्डेय 'मणिः'), पृष्ठ १६४, अर्वासं (३३/४-३४/१ अतिरिक्त- संयुक्ताङ्कः १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012

221. **देववाणी-परिषन्महासचिवेन प्रस्तुतं वार्षिक-विवरणम्**(9) (डा. रमाकान्त शुक्लः), पृष्ठ १६५, अर्वासं (३३/४-३४/१ अतिरिक्तसंयुक्ताङ्कः १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012

222. **'श्रीस्वामिविवेकानन्दचरितम्' और 'विश्वभानुः'**(6.24) (डा. रवीन्द्र नागर) पृष्ठ १, अर्वासं (३४/२-३५/४ संयुक्ताङ्कः १३२-१३८), 15 अप्रैल 2012-15 अक्टूबर 2013

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

223. **संस्कृतसमुपासकाः पं. छज्जूरामशास्त्रिणः**(1.37) (अनिलकुमारः (शोधच्छात्रः)) पृष्ठ ३५०, अर्वासं (३४/२-३५/४ संयुक्ताङ्कः १३२-१३८), 15 अप्रैल 2012-15 अक्टूबर 2013

224. **संस्कृतसेवी आचार्यबाबूराम अवस्थी**(1.14) (डा. रमाकान्त शुक्लः) पृष्ठ ३५४, अर्वासं (३४/२-३५/४ संयुक्ताङ्कः १३२- १३८), 15 अप्रैल 2012-15अक्टूबर 2013

225. **श्रावणीपर्व रक्षाबन्धञ्च**(1.35) (डा. सच्चिदानन्द तिवारी) पृष्ठ ३५९, अर्वासं (३४/२-३५/४ संयुक्ताङ्कः १३०-१३१), 15 अप्रैल 2012

226. **'अर्वाचीनसंस्कृत' पत्रिकायां प्रकाशिताः दिल्लीवर्णनपराः रचनाः**(6. 10) (अविनाशपाण्डेयः) पृष्ठ ३६४, अर्वासं(३४/२-३५/४ संयुक्ताङ्कः १३२-१३८), 15 अप्रैल 2012- 15 अक्टूबर 2013

227. **दिल्लीतः प्रकाशिताः संस्कृत पत्र-पत्रिकाः**(6.10) (डॉ. अभिनवशुक्लः) पृष्ठ ३६९, अर्वासं(३४/२-३५/४ संयुक्ताङ्कः १३२-१३८), 15 अप्रैल 2012- 15 अक्टूबर 2013

228. **शृङ्गेरी ऋक्पाठ के साम्प्रतिक स्वर व उनका सांगीतिक उच्चारण** (ऋषिराज पाठक), पृष्ठ 15-24, अर्वासं (३६/१ १३९), 15 जनवरी 2014

229. **समष्टि-समीक्षणम्** (प्रो. भागीरथिनन्दः), पृष्ठ 109-112, अर्वासं (३६/२ १४०), 15 अप्रैल 2014

230. **राष्ट्रियसंस्कृतसंस्थानस्याधोगतिः**() (सम्पादकः, रमाकान्त शुक्ल), (तृतीये आवरणपृष्ठे), अर्वासं (३६/३-४०/४) संयुक्ताङ्कः १४१-१५८), 15 जुलाई 2014

231. **आचार्यरमेशचन्द्रशुक्लस्तत्कृताः ग्रन्थाश्च**(6.10) (डॉ० राका शर्मा)अर्वासं, संस्कृतपत्रकारितासार्धशताब्दपूर्तिविशेषाङ्कः (अतिरिक्ताङ्कः 159) 15 जुलाई 2017

232. **भवतां पत्रम्**(8) ('अभिराज' डॉ० राजेन्द्र मिश्रः, श्री श्री० सुन्दरराजः, श्रीकान्त 'कुशलः', डॉ० सरिता पाण्डेय, आचार्य मूँगाराम त्रिपाठी)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अर्वासं, 21/4, 15 अक्टूबर, 1999। डॉ० पेन्ना मधुसूदनः, डॉ० बलवीर दत्त शास्त्री, 21/2, 30 अप्रैल, 2001। डॉ० रेवाप्रसाद द्विवेदी, प्रा० हरिश्चन्द्र रेणापुरकरः 24/1, 15 फरवरी, 2002। पं० आद्याचरण झा 24/2, 15 अप्रैल, 2002। डॉ० गौतम वाडीलाल पटेलः, आचार्य प्रभुदत्त शर्मा, डॉ मिथिलेश कुमारी मिश्रा, डॉ० इन्द्रमोहन सिंहः अर्वासं, 24/3, 21 अगस्त, 2002। डॉ० शिवशरण शर्मा द्विवेदी, डॉ० भास्कराचार्य त्रिपाठी, डॉ० शंकरदेव अवतरे, डॉ० श्रीरंजनसूरिदेवः अर्वासं, 24/4, 25 अक्टूबर, 2002। पं० प्रकाशचन्द्रो मिश्रः, डॉ० रूपनारायण पाण्डेयः, डॉ अमियचन्द्र 'सुधेन्दुः', पं० प्रभुदत्त शर्मा, डॉ० शंकरदेव अवतरे अर्वासं, 25/4, 25 अक्टूबर, 2003, रहस बिहारी द्विवेदी अर्वासं, 30/2, 30/3.4, पं० आद्या चरण झा अर्वासं, 30/2, 30/3.4, प्रो. संघसेनः अर्वासं, 30/4 (अतिरिक्तांकः)

233. **देववाणी-परिषत्समाचाराः**(9) (सम्पादकः) अर्वासं, 4/1,15 जनवरी, 1982

234. **अर्वाचीनसंस्कृतस्य तृतीयवर्षपूर्तिः**(9) (सम्पादकः) अर्वासं, 4/1, 15 जनवरी, 1982

235. **देववाणी-परिषद्वार्ता**(9) (डॉ० रमाकान्त शुक्लः) 4/4, 15 अक्टूबर, 1982, 15/4, 15 अक्टूबर, 1993; (श्रीमती रमा शुक्ला) 5/1, 11/1, 11/3, 12/2, 13/2, 14/3, 14/4, 15/1, 2, 3, 18/1-3, (डॉ० रवीन्द्र नागरः) 11/2, 11/4, (आनन्दवर्धन शुक्लः) 13/3, 13/4, 14/1, 14/2, 16/1, 16/3, 16/4, 17/3, 19/1, 21/4, 22/1 (डॉ० इच्छाराम द्विवेदी) 12/1, (श्रीमती सरोज व्यासः) 20/1, (अभिनव शुक्लः) 16/3, 18/4, 20/2-4, 21/1-2, 21/3, 22/3, 22/4, 23/2, 23/3, 23/4, 24/1, 24/2, 24/3, 24/4, 25/1, 25/2, 25/3, 25/4, 26/1.26/2.29/4 संयुक्तांक - प्रथम खण्डः, 100 . 103 अंक 15 अप्रिल 2004 . 15 जनवरी 2005, 30/1, 15 जनवरी 2008, 30/2 15 अप्रैल 2008, 30/3 . 4 15 जुलाई 2008, (ऋषिराज पाठकः) पृष्ठ 77, अर्वासं 32/1 (123) 15 जनवरी 2010, पृष्ठ 55, अर्वासं 32/2 (123 अतिरिक्तांकः) 15 अप्रैल 2010, पृष्ठ 52, अर्वासं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

32/2.4 (124.126 अतिरिक्त: संयुक्तोऽङ्क:) 15 अक्टूबर 2010, (डा. अभिनव शुक्ल:), पृष्ठ 56ए अर्वासं 33/1 (अतिरिक्तोऽङ्क:), 15 जनवरी 2011, (डा. अभिनवशुक्ल:), पृष्ठ 94, अर्वासं 33/2.3 (अतिरिक्तोऽङ्क:), 15 अप्रैल 2011, (अभिनवशुक्ल:, विपिन द्विवेदी), पृष्ठ १९४, अर्वासं (३३/४-३४/१ अतिरिक्तसंयुक्ताङ्क: १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012, (डा. अभिनवशुक्ल:), पृष्ठ ३७७, अर्वासं(३४/२-३५/४ संयुक्ताङ्क: १३०-१३१), 15 अप्रैल 2012, डा. अभिनव शुक्ल: पृष्ठ 30-46, अर्वासं(३६/१ १३९), 15 जनवरी 2014, डा. अभिनव शुक्ल: 120 अर्वाचीनसंस्कृतम् (३६/२ १४०), 15 अप्रैल 2014, डा. अभिनव शुक्ल: ८८५ अर्वासं(३६/३-४०/४) संयुक्ताङ्क: १४१-१५८), 15 जुलाई 2014, डॉ.ऋषिराजपाठक:, अर्वासं(संस्कृतपत्रकारितासार्धशताब्दपूर्तिविशेषाङ्क: अतिरिक्ताङ्क: 159)

236. **संस्कृत-वार्ता**(9) (रमा शुक्ला) 6/3, 6/4, 7/2-3, (डॉ० विन्ध्येश्वरी प्रसाद मिश्र: 'विनय:') 6/4

237. **संस्कृत-जगद्वार्ता**(9) (रमा शुक्ला) 6/2, 7/1, 7/4, 8/1, 10/4, 11/2, 12/2, 13/4, 14/2, (डॉ० रामेश्वरदत्त शर्मा) 12/3, (आनन्दवर्धन शुक्ल:) 12/4, 13/1, 13/2, 13/3, 14/3, 14/4, 15/1, 2, 3, 4, 18/4, (डॉ० रवीन्द्र नागर:) 13/1, (डॉ० पतंजलिकुमार भाटिया) 17/3, (श्रीमती सरोज व्यास:) 20/2-4, 21/1-2, 21/3, (अभिनव: शुक्ल:) 17/4, 18/1-3, 19/1, 20/1, 21/4, 22/1, 22/2, 22/3, 22/4, 23/2, 23/3, 23/4, 24/1, 24/2, 24/3, 24/4, 25/1, 25/2, 25/3, 25/4, 26/1 26/2.29/4 संयुक्तांक - प्रथम खण्ड:, 100 . 103 अंका 15 अप्रिल 2004 - 15 जनवरी 2005, 30/1, 15 जनवरी 2008, 30/2 15 अप्रैल 2008, 30/3.4 15 जुलाई 2008, (साधना शर्मा) 20/1.2; (प्रभाकर रामरत्न शास्त्री) 21/1.2; (डॉ० आशा शर्मा) 21/1.2; (डॉ० श्रीमती स्वराज गुप्ता) 21/1.2; (डॉ० चन्द्रभूषण झा) 21/1.2, (राधावल्लभ 'राजीव:') 22/1, (ओंकारसिंह त्यागी) 22/2, (डॉ० इच्छाराम द्विवेदी) 22/3, (डॉ० रमाकान्त शुक्ल:) 22/3ए (डॉ० अशोक कुमार झा) 23/2, (डॉ० अमियचन्द्र 'सुधेन्दु:')

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

23/2 (श्रीमती शशिप्रभा गोयल) 23/2, (अपर्णा पाण्डेय) 25/2. (डा. मनमोहन कृष्ण त्रिखा) 26/2.29/4 संयुक्तांक - प्रथम खण्डः, 100. 103 अंक 15 अप्रैल 2004 - 15 जनवरी 2005, (डा. रमाकांत पाण्डेयः) 26/2.29/4 संयुक्तांक - प्रथम खण्डः, 100.103 अंका 15 अप्रैल 2004 - 15 जनवरी 2005, (डा. गोकुलेन्द्र नारायण गोस्वामी) 26/2.29/4 संयुक्तांक - प्रथम खण्डः, 100.103 अंका 15 अप्रैल 2004 - 15 जनवरी 2005ए (डा. रामकृष्ण शर्मा) 30/3.4, 15 जुलाई 2008, (डा. अभिनवः शुक्लः) पृष्ठ 87, अर्वासं 32/1 (123) 15 जनवरी 2010, पृष्ठ 57, अर्वासं 32/2 (123 अतिरिक्तांकः) 15 अप्रैल 2010, पृष्ठ 57, अर्वासं 32/2.4 (124.126 अतिरिक्तः संयुक्तोऽङ्कः) 15 अक्टूबर 2010, (डा. अभिनव शुक्लः), पृष्ठ 59, अर्वासं 33/1 (अतिरिक्तोऽङ्कः), 15 जनवरी 2011, (डा. अभिनवशुक्लः, डा. रत्नमोहन झा), पृष्ठ 95, अर्वासं 33/2.3 (अतिरिक्तोऽङ्कः), 15 अप्रैल 2011, (अभिनवः, डा. रवीन्द्रनागरः, विपिनः), पृष्ठ २०७, अर्वासं (३३/४-३४/१ अतिरिक्तसंयुक्ताङ्कः १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012 (विपिन द्विवेदी) पृष्ठ ३८१, अर्वासं (३४/२-३५/४ संयुक्ताङ्कः १३२-१३८), 15 अप्रैल 2012-15अक्टूबर 2013 विपिन द्विवेदी 47-55 अर्वासं (३६/१ १३९), 15 जनवरी 2014, लक्ष्मीशर्मा 120.127 अर्वासं (३६/२१४०),15 अप्रैल 2014, डा. अभिनव शुक्लः ८८६, अर्वासं (३६/३-४०/४), संयुक्ताङ्कः १४१-१५८), 15 जुलाई 2014, जीवनशर्मा, अर्वासं(संस्कृतपत्रकारितासार्धशताब्दपूर्तिविशेषाङ्कः अतिरिक्ताङ्कः 159),हिमांशु जोशी, अर्वासं (संस्कृतपत्रकारितासार्धशताब्दपूर्तिविशेषाङ्कः अतिरिक्ताङ्कः 159)

238. **श्रद्धाञ्जलय**(1.1) डॉ० रणजीत शास्त्रिणे 22/2, स्व० डॉ० श्यामदेव पाराशराय 23/2, स्व० प्रभाकररामरत्न शास्त्रिणे 23/2, स्व० कृष्णदत्त शर्मणे 23/2, स्व० पं० ओगेटिपरीक्षित् शर्मणे 23/2, स्व० पं० रतिराम शास्त्रिणे 24/1, स्व० डॉ० मण्डन मिश्राय 24/1, स्व० प्रो० रामचन्द्रनारायण दाण्डेकराय 24/1, स्व० डॉ० श्रीधरवासुदेव सोहोनी-स्व० डॉ० वसन्तकृष्णराव कान्हे-श्रीमती शान्ति अवस्थिभ्यः 24/2, स्व० वि०

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वेंकटाचलाय 24/3, स्व० डॉ० के०पी०ए० मेननाय 24/4, स्व० वैद्यभीमसेनशास्त्रिणे 24/4, स्व० डॉ० विद्याधरगुलेरिमहाभागाय 25/4, स्व. महेशकुमाराय 26/2.29/4 संयुक्तांक - प्रथम खण्ड:, 103 अंका 15 अप्रिल 2004 - 15 जनवरी 2005, आचार्यश्रीलालबिहारीद्विवेदाय 30/2 15 अप्रैल 2008, डा. रमाकान्तशुक्ल:, पृष्ठ 103, अर्वाचीनसंस्कृतम् 33/2.3 (अतिरिक्तोऽङ्क:), 15 अप्रैल 2011,डा. नरदेव शास्त्री दिवंगत:, पृष्ठ ३८५ अर्वा ३४/२-३५/४ संयुक्ताङ्क: १३२-१३८ 15अप्रैल 2012-15 अप्रैल 2012, डा. देवीदत्तशर्मा कीर्तिशेष: संवृत्त:!, डा. रमाकान्तशुक्ल:, पृष्ठ ३९२, अर्वासं (३४/२-३५/४ संयुक्ताङ्क: १३२-१३८), 15 अप्रैल 2012-15 अक्टूबर 2013, डा. सत्यदेव चौध री१८.८.२०१४, डा. अमियचन्द्र शास्त्री, सम्पादक:, ८८७, अर्वासं(३६/३-४०/४) संयुक्ताङ्क: १४१-१५८), 15 जुलाई 2014, प्रो.श्रीधरवासिष्ठ:, डॉ.प्रभाकरशास्त्री, डॉ.रामसुरेशपाण्डेय:, प्रो. रामानुजदेवनाथन्, डॉ.जगन्नाथपाठक:, प्रो.एन.एस.रामानुजताताताचार्य:, अर्वासं(संस्कृतपत्रकारितासार्धशताब्दपूर्तिविशेषाङ्क: अतिरिक्ताङ्क: 159)

239. **पुस्तकपरिचय:/नवप्रकाशनचर्चा** (7) 3/2 15 अप्रैल 1981 सुभाषितसुमनोऽञ्जलि:, सागरिकाया: अर्वाचीनसंस्कृतमहाकाव्यविशेषाङ्क: (रमाकान्तशुक्ल:), 3/4 15 अक्टूबर 1981 सुषमा (रमाकान्तशुक्ल:), 6/1 15 जनवरी 1984 हरियाणासंस्कृतवृत्तम् (रमाकान्त शुक्ल)6/2 15 अप्रेल 1984 रामकविविरचितं संगीतराघवम्, श्रीगुरुनानकदेव-चरितम्(डा. रमाकान्त शुक्ल), 6/3 15 जुलाई 1984 परीक्षित्नाटकचक्रम्, संस्कृतगीतमाला, विघ्नाधिराजशतकम्, शीतलतृष्णा(डा. रमाकान्त शुक्ल), 6/4 15 अक्टूबर 1984 रञ्जनकथामाला(डा. रमाकान्त शुक्ल), 7/1 15 जनवरी 1985 राजेन्द्र'चन्द्रोदयचम्पू:, गुरुमाहात्म्यशतकम्, अग्निशिखा, संस्कृतशिक्षणसरणी (डा. रमाकान्त शुक्ल), 10/2 15 अप्रेल 1988 कथामृतम्(डा. प्रभाकर नारायण कवठेकर:), 10/3 15 जुलाई 1988 श्रीरेवाभद्रपीठकाव्यम् (सदाशिवकुमारद्विवेदी), 12/2 15 अप्रेल 1990 स्वरमंगलाया: श्रीनेहरुविशेषांक:(अरविन्दनाभशुक्ल:), काव्योन्मेष:(श्री. भी. वेलणकर:), जीवनमुक्तकम्(डा. रमाकान्तशुक्ल:), दक्षिणावर्त-विलासम् (अभिनव: शुक्ल:) 24/1 गीतानन्तरसम् (रमाकान्त शुक्ल:)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

25/4, 15 अक्टूबर 2003, गीत माधुरी, श्रीरामाभिरामीय-महाकाव्यम्, संस्कृतमधुगीतगुञ्जनम्, नतितति, महाभारत की बोधकथाएं, नारीकथामृतम्, सैरन्धीनाटकम्, सारस्वत-सौरभम्, अर्वाचीनकविमाला, भाति ते भारतम् (डा. रमाकांत शुक्ल)30/2 15 अप्रैल 2008, ईसप-कथा-निकुञ्जम्, 'शारदा'पत्रिकाया: ऊनपञ्चाशद्वर्षारम्भदीपावलीविशेषांक:, मृगमृगेन्द्रान्योक्ति-शतकम्, कौटिलीय राज्यशास्त्र, सुधर्मा, कथासरित्, वाजिराउत:, आह्वानम्, विवेकमञ्जरी, भारतीय संस्कृति में मानव मूल्य और लोककल्याण (डा. रमाकांत शुक्ल)30/4 (अतिरिक्तांक:)15 अक्टूबर 2008, मनुजाश्शृणुत गिरं मे (डा. रमाकांत शुक्ल)31/1.4 (संयुक्तांक:), 15 जनवरी 2009, 32/2.4, 33/2.4, प्रशान्तराघवम्, श्रीगणेशशतकम्, स्तोत्रस्तवकम्(डा. रमाकान्त शुक्ल:) पृष्ठ 95, अर्वासं 32/1 (123) 15 जनवरी 2010, पृष्ठ 42, अर्वासं 32/2 (123 अतिरिक्तांक:) संसरणम्, अभिनवकाव्यालंकारसूत्रम्, हिमाचलवैभवम्, कारगिलकाव्यम्, मञ्जूनाथग्रन्थावलि:, मूलशंकरनाट्यत्रयी, सुरभारतीसपर्या- कुसुमाञ्जलि:, शेमुषी, बुद्धोदयकाव्यम्, बौद्धपरम्पराया: वैश्विक संन्देश:(रमाकान्त शुक्ल) 15 अप्रैल 2010, पृष्ठ 41, राष्ट्रचिन्तनम्, अभिराजयशोभूषणम्, संस्कृतकाव्यशास्त्र का आलोचनात्मक इतिहास, काव्यतत्वालोक:, श्रीगोस्वामि तुलसीदासचरितम्, टाइटैनिकजलयानम्, प्रबुद्धभारतम्, दुघुक्षा, काव्यलतामञ्जरी, तीर्थभारतम्, रंगवीथि:(डा. रमाकान्त शुक्ल) अर्वासं 32/2.4 (124.127 अतिरिक्त: संयुक्तोऽङ्क:) 15 अक्टूबर 2010, अटलबिहारीवाजपेयिशतकम् (डा. रमाकान्त शुक्ल:), पृष्ठ 63, अर्वासं 33/2-34/1(संयुक्ताङ्क), 33/1 15 जनवरी 2011 काव्यनिर्झरी(डा. रमाकान्त शुक्ल), 15 अप्रेल 2011 से 15 जनवरी 2012 चन्द्रचरितम् (128 से 131 संयुक्ताङ्क:(डा. रमाकान्तशुक्ल:), पृष्ठ 77, अर्वाचीन-संस्कृतम् 33/2.3 (अतिरिक्तोऽङ्क:), 15 अप्रैल 2011, सर्वं सहा, वन्दना, वाङ्मती, भारतायनम्, नगाधिराज:, लघुनाट्यचय:, कविताञ्जलि:, पत्रचम्पू:, श्रीस्तन्यधारास्तव:, गीतमञ्जरी, श्रीहरिचरितम्, तथापि सत्यस्य मुखम्, परशुरामोदयम् महाकाव्यम्, व्रडोरूढ: ग्रन्थि:, नाचिकेतकाव्यम्, धर्मपदीयम्, वज्रमणि:, आधुनिकसंस्कृतसाहित्यसंदर्भसूची, वागीश्वरी-कण्ठसूत्रम्, जगन्नाथसुभाषितम् चलदूरवाणी, नातिचरामि अन्याश्च कथा:,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीकृष्णलीलामृतम्, मूको रामगिरिर्भूत्वा, आधुनिक संस्कृत काव्य की परिक्रमा, कौमारम्, तारा अरुन्धती, अलिविलासिसंलापस्य गंगा टीका, आदिशंकरलघुप्रबन्धावलिः (डा. रमाकान्तशुक्लः), पृष्ठ १६९, अर्वासं(३३/४-३४/१ अतिरिक्तसंयुक्ताङ्कः १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012, सौम्यवदनाकाव्यम्, स्मृतिस्तवकम्, आदिशंकरलघुप्रबन्धावलिः, अलिविलासिसंलापस्य अभिनवा टीका, संस्कृतविद्वत्परिचायिका, स्वातन्त्र्यसम्भवम्(डा. रमाकान्तशुक्लः), पृष्ठ ३८६, अर्वासं(३४/२-३५/४ संयुक्ताङ्कः १३२-१३८), 15 अप्रैल 2012-15 अक्टूबर 2013 राष्ट्रसूक्तम्, प्रसन्नभारतम् महाकाव्यम्, संस्कृत-मधुशाला (रमाकान्त शुक्लः), 56. अर्वासं(३६/१ १३९), 15 जनवरी 2014, चमत्कारिकः चलदूरभाषः, देवभूमिग्रामशतकम्, ऋग्वेदसंहिता, यजुर्वेदसंहिता, सामवेदसंहिता, अथर्ववेदसंहिता, वेदमञ्जरी, साहित्यमञ्जरी, नाट्यनिर्झरी, व्याकरणमञ्जरी, संस्कृतवाक्यप्रबोधः, वद्तुसंस्कृतम्, संस्कृतसूक्तिसमुच्चयः (षोडशो भागः) काव्य-महाकाव्य-खण्डः, संस्कृतसूक्तिसमुच्चयः (सप्तदशो भागः) काव्यशास्त्रखण्डः, संस्कृतसूक्तिसमुच्चयः (अष्टादशो भागः) गद्यखण्डः, संस्कृतसूक्ति-समुच्चयः (नवदशो भागः-प्रथमखण्डः) काव्य-महाकाव्यखण्डः, संस्कृतसूक्तिसमुच्चयः (नवदशो भागः-द्वितीयखण्डः) आधुनिकसंस्कृत-नाट्यखण्डः, संस्कृतसूक्तिसमुच्चयः (विंशो भागः) आधुनिककाव्यखण्डः, संस्कृतसूक्तिसमुच्चयः (एकविंशो भागः) मुक्तकखण्डः, संस्कृतसूक्ति-समुच्चयः (द्वाविंशो भागः) व्याकरणखण्डः(रमाकान्त शुक्लः) 113-117, अर्वासं(३६/२ १४०), 15 अप्रैल 2014ए कल्पवल्ली, दोहावली-संस्कृतम्, प्रकाशात्म : अयं मे नूतनः पन्थाः, (रमाकान्तशुंक्ल), ८८८, अर्वासं 141 से 158 संयुक्तांक चत्वारिंशद्वर्षपूर्त्यङ्क(३६/३-४०/४) संयुक्ताङ्कः १४१-१५८), 15 जुलाई 2014- 15 अक्टूबर 2018, वन्दनावितानम्, दामिनी पर्यस्फुरत्, रात्रिर्गमिष्यति, वनवैभवम्, सौन्दर्यपञ्चाशिका, परिवर्तनकाव्यम्, विश्वेतिहासस्य तिथिक्रमः, संरक्ष्या दुहिता सदा, सुदर्शनविजयम्, महाकविर्बाणभट्टः, काक्षेण वीक्षितम्, पं.दीनदयाल उपाध्यायचरितम्,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मानसी, श्रीशतस्तोत्री, कपिः कूर्दते शाखायाम्, शिशुस्वान्तम्, सासहसे श्रीः, अन्योक्तिनिर्झरः, काव्यसञ्चयनम्, परीवाहः, द्राक्षावल्ली, राजस्थानीयदेववाणीवाङ्मयम्, एकविंशशताब्द्याः राजस्थानस्य संस्कृतसाहित्यम्, श्रीमद्भगवद्गीताधर्मदर्शनभाष्यम्, आख्यायिका (संस्कृत-राष्ट्रभाषा कथासंग्रहः), शनैः शनैः बालगीतावलिः, पलायितः चणकः, संस्कृतभक्तमाला, असमा वाङ्मञ्जरी, बलाका, स्वामी विवेकानन्दः, कालं न निद्रापयाणि, पितामहपौत्रयोः लघुकथासंग्रहः, गुरुवाणी, Bhagavan Sridhara Swami as Sakshi, शास्त्रपरिचयः, गुलिका, महाबोधिद्रुमविजयम्, वाग्विलासिनी, नमोनिर्वाचनम् (मोदीविजयपञ्चशती), चारुवसन्तीयम्, द्विपथम् (डॉ० रमाकान्त शुक्लः) संस्कृत पत्रकारिता सार्धशती सम्पूर्ति अतिरिक्त विशेषांक 15 जुलाई 2017

240. **चित्राणि**(12) पृष्ठ 69, अर्वासं 33/1 (अतिरिक्तोऽङ्कः), 15 जनवरी 2011

241. **चित्राणि**(12) पृष्ठ १६८, अर्वासं (३३/४-३४/१ अतिरिक्तसंयुक्ताङ्कः १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012

242. **चित्राणि**(12) पृष्ठ २१३, अर्वासं(३३/४-३४/१ अतिरिक्तसंयुक्ताङ्कः १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012

243. **पञ्चदशविश्वसंस्कृत-सम्मेलनस्य चित्राणि**(12) पृष्ठ २१५, अर्वासं(३३/४-३४/१ अतिरिक्तसंयुक्ताङ्कः १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012

244. **पञ्चदशविश्वसंस्कृत-सम्मेलनस्य 'शारदा' अंकः**(12) पृष्ठ २१६, अर्वासं(३३/४-३४/१ अतिरिक्तसंयुक्ताङ्कः १३०-१३१), 15 अक्टूबर 2011.15 जनवरी 2012

245. **चित्राणि**(12) पृष्ठ ३८०, अर्वासं(३४/२-३५/४ संयुक्ताङ्कः १३२-१३८), 15 अप्रैल 2012- 15 अक्टूबर 2013

246. **चित्राणि**(12) अर्वासं (३६/३-४०/४) संयुक्ताङ्कः १४१-१५८), 15 जुलाई 2014

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

247. **संस्कृतपत्र-पत्रिका:(अकारादिक्रमेण)**(6.18) (डॉ० रमाकान्त शुक्ल:) अर्वासं, संस्कृतपत्रकारितासार्ध- शताब्दपूर्तिविशेषाङ्कः (अतिरिक्ताङ्कः 159) 15 जुलाई 2017

248. **देववाणी-परिषद्- दिल्ली 'ति संस्थायाः षट्त्रिंशत्तमात् चत्वारिंशत्तमे संयुक्ते वार्षिकाधिवेशने प्रस्तुतं वार्षिकविवरणम्**(9) (डॉ० रमाकान्त शुक्ल:)अर्वासं, संस्कृतपत्रकारितासार्धशताब्दपूर्तिविशेषाङ्कः (अतिरिक्ताङ्कः 159) 15 जुलाई 2017

249. **देववाणीपरिषदः ३६-४० तमं संयुक्तं वार्षिकाधिवेशनम्**(9) (डॉ० ऋषिराज पाठक:)अर्वासं, संस्कृतपत्रकारितासार्ध- 'शताब्दपूर्तिविशेषाङ्कः (अतिरिक्ताङ्कः 159) 15 जुलाई 2017

250. **अर्वाचीनसंस्कृतस्य पञ्जीकरणपत्रम्** (12) अर्वासं, संस्कृतपत्रकारितासार्धशताब्दपूर्तिविशेषाङ्कः (अतिरिक्ताङ्कः 159) 15 जुलाई 2017

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आक्रमणं कुरु

-डॉ. रमाकान्तशुक्लः
sarvashukla@gmail.com

उत्तिष्ठ वीर भारत सत्वर -
मातंकवादराक्षसवधाय ।
हन्तरि निर्दोषजनानां त्वम्
आक्रमणं कुरु, आक्रमणं कुरु॥१॥

येनोर्याक्रमणव्याजेना -
मन्त्रितमास्ते निजदौर्भाग्यम्।
अविलम्बं निर्लज्जे तस्मिन्
आक्रमणं कुरु, आक्रमणं कुरु॥२॥

इदमुर्याक्रमणस्यामन्त्रण -
मास्ते तव रणप्रयाणार्थम्।
दण्डनं दण्डनीयस्यास्ताम्
आक्रमणं कुरु, आक्रमणं कुरु॥३॥

आक्रमणं न कुरु त्वं पूर्वम्
किन्त्वाक्रमणं त्वं नो सहस्व।
त्वययाऽक्रमणं जातं सम्प्रति
आक्रमणं कुरु, आक्रमणं कुरु॥४॥

ऋजुतां यो मनुते मूर्खत्वम्
मैत्रीप्रस्तावं दुर्बलताम्।
पातकिनि कृतघ्ने धृष्टेऽस्मिन्
आक्रमणं कुरु, आक्रमणं कुरु॥५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

य: सारमेय इव सिंहे त्वयि
धृष्टतां प्रदर्श्य मनोमुग्धः।
तस्याहङ्कारनिरासार्थम् ,
आक्रमणं कुरु, आक्रमणं कुरु॥६॥

वार्ताः सञ्जाताः बहुवारं
हस्तमेलनं बहुधा जातम्।
दुर्जनकृत्यं दृष्ट्वा तस्मिन्
आक्रमणं कुरु, आक्रमणं कुरु॥७॥

अलमलं हस्तमेलनैरलं
वार्ताभिरलं भाषणैरलम्।
अवशिष्टो नास्तेऽपर उपाय
आक्रमणं कुरु, आक्रमणं कुरु॥८॥

दुर्जन उपकारान्नो शाम्यति
प्रत्यपकारात्तस्य चिकित्सा।
प्रतिवेशिविषस्य विनाशार्थं
आक्रमणं कुरु, आक्रमणं कुरु॥९॥

आस्ते य आततायी स रिपु-
स्तत्संरक्षकोऽपि भवति रिपुः।
जृम्भस्व वीर रिपुनाशार्थम्
आक्रमणं कुरु, आक्रमणं कुरु॥१०॥

शिशुपालो गालीं दत्तवान्
शतमीं ते कृष्ण सभामध्ये।
अरिणारिमस्तकं पातय भुवि
आक्रमणं कुरु, आक्रमणं कुरु॥११॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सेनाया मनोबलं रक्ष्यं
तस्याः सम्मानोऽथो रक्ष्यः।
आचर शठेषु शाठ्यं धीमन्
आक्रमणं कुरु, आक्रमणं कुरु॥१२॥

शस्त्रेण रक्षिते राष्ट्र एव
जीवन्ति शास्त्रसाहित्यकलाः।
बलहीनाद्रिपवो नो बिभ्यति
आक्रमणं कुरु, आक्रमणं कुरु॥१३॥

साहाय्यकारिणः शत्रूणाम्
आक्रामकशक्तिं सम्परीक्ष्य।
अवलम्बन्तेऽन्ते ताटस्थ्यम्
आक्रमणं कुरु, आक्रमणं कुरु॥१४॥

शोभते क्षमाऽथो कूटनीति-
रिह बलशालिने न निर्बलाय।
ख्यापय निजबलं प्रचण्डं त्वम्
आक्रमणं कुरु, आक्रमणं कुरु॥१५॥

सोढापमानततिरनेकधा ,
दर्शितमातिथ्यं बहुवारम्।
मैत्रीप्रस्तावो वृथा कृतः
आक्रमणं कुरु, आक्रमणं कुरु॥१६॥

अपहृतं विमानं भटशिरांसि
छिन्नानि येन तस्मिन् दुष्टे।
प्रस्थानकोट-मुम्बइ-दोषिणि ,
आक्रमणं कुरु, आक्रमणं कुरु॥१७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

त्वं शान्तस्तिष्ठसि सम्प्रति यदि
कोटिशो जनानामपमानम्।
जागृहि जागृहि रे सुप्त सिंह
आक्रमणं कुरु, आक्रमणं कुरु॥१८॥

पूरितो घटः पापानां वै
नैव प्रमाणमधुनाऽपेक्ष्यम्।
अवलोक्य पुरो विजयादशमीम्
आक्रमणं कुरु, आक्रमणं कुरु॥१९॥

दुर्दृष्ट्या पश्येद्यदि राष्ट्रं
कुत्रापि कश्चिदप्यस्माकम्।
तत्कृते भव त्वं वज्रपात
आक्रमणं कुरु, आक्रमणं कुरु॥२०॥

ऋणशेषं रिपुशेषं पावक-
शेषञ्च न कुर्यादिति श्रुतिः।
मा त्वय्याक्रमणं रिपुः क्रियात्
त्वं पूर्वं तत्राक्रमणं कुरु॥२१॥

सत्याहिंसाकरुणामैत्री –
रक्षार्थमुपाया अवलम्ब्याः ।
अनिवार्या चेद्धिंसालम्ब्या
आक्रमणं कुरु, आक्रमणं कुरु॥२२॥

सिन्धुजा बलोचाः स्वातन्त्र्यं
प्राप्नुयुराप्त्वा ते साहाय्यम्।
नाशय नाशय देशकण्टकान्
आक्रमणं कुरु, आक्रमणं कुरु॥२३॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अग्नित्रिशूलनागादीनां -
द्रष्टुं शक्तिं क्षण उपस्थितः ।
शान्तिं स्थापय हत्वा शत्रून्
आक्रमणं कुरु, आक्रमणं कुरु॥२४॥

अस्त्र-प्रहार-तेजस्-सुखाइ -
ब्रह्मोसादीनां परिचयाय।
अवसर आस्ते समुपस्थितोऽयम्
आक्रमणं कुरु, आक्रमणं कुरु॥२५॥

अक्रमणं त्वया कृतं न पूर्व-
माक्रमणं त्वयि जातं सुधीर!
क्षमयालमस्तु दर्शय शौर्यम्
आक्रमणं कुरु, आक्रमणं कुरु॥२६॥

भारतस्य सर्वे नागरिकाः
नेतारः कृषकाः वीरभटाः।
सम्भूय कुरुध्वं सिंहनाद-
माक्रमणं कुरु, आक्रमणं कुरु॥२७॥

छात्राः शिक्षकास्तथा श्रमिकाः,
वाणिज्योद्योगकृतोऽधिकृताः ।
सर्वे सम्भूय कुरुत हुंकृति -
माक्रमणं कुरु, आक्रमणं कुरु॥२८॥

बालकाः किशोराः अथ युवकाः
बालिकाः किशोर्यो युवतिगणाः।
प्रौढाः वृद्धाः सम्भूय वद-
न्त्वाक्रमणं कुरु, आक्रमणं कुरु॥२९॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अधिवक्तारः कवयश्च नटाः
साहितीकलासङ्गीतकराः ।
सञ्चारमाध्यमीयाश्च वद -
न्त्वाक्रमणं कुरु, आक्रमणं कुरु॥३०॥

हे वैज्ञानिकाः शोधकाराः
दार्शनिकाः संन्यासिनः समे
कुरुतोच्चैःस्वरंण सिंहनाद-
माक्रमणं कुरु आक्रमणं कुरु॥३१॥

अभिनेतारः क्रीडकास्तथा
धार्मिकाः कार्मिकाः शिल्पकराः।
सर्वे सम्भूय संवदध्वम्
आक्रमणं कुरु आक्रमणं कुरु॥३२॥

मानवता जयिनी जगति स्यात्
दानवता क्षीणबला च भवेत्।
सर्वत्र सन्तु सर्वे सुखिनः
आक्रमणं कुरु, आक्रमणं कुरु॥३३॥

प्रथमं दृश्यान् शत्रूंस्त्वं जय
तदनु च गूढान् शत्रूंस्त्वं जय।
अन्तर्लीनेष्वपि रिपुषु त्वम्
आक्रमणं कुरु, आक्रमणं कुरु॥३४॥

पार्थिवाः जलीयास्तैजस्काः
वायव्या नभोगता रिपवः।
तव सन्तु विजेतव्या नूनम्
आक्रमणं कुरु, आक्रमणं कुरु॥३५॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राष्ट्रस्वरेण यद् व्यक्तमस्ति
तन्मतमङ्गीकुरु आशु वीर!
निद्रां जागृहि, जहि आतंकिन-
माक्रमणं कुरु आक्रमणं कुरु॥३६॥

अशनाया वृत्तेर्न्यूनत्वं
दारिद्र्यं स्वास्थ्यहीनता च।
सर्वेऽपीमे रिपवस्तेष्वपि
आक्रमणं कुरु, आक्रमणं कुरु॥३७॥

अन्तरपि सन्ति बहिरपि च सन्ति
सर्वत्रात्मानं त्रासयन्ति।
तेषां समूलमुन्मूलनार्थ-
आक्रमणं कुरु, आक्रमणं कुरु॥३८॥

ज्ञानाभयसाम्यत्यागानाम् -
स्मृतिधृतिमेधानां रक्षार्थम् ।
एतद्विरुद्धरिपुनाशार्थम् ,
आक्रमणं कुरु, आक्रमणं कुरु॥३९॥

दुर्जेयाः षड् रिपवो जेयाः
गूढप्रवेशिनो हन्तव्याः।
उपकृतिरक्षार्थं त्वमपकृतौ
आक्रमणं कुरु, आक्रमणं कुरु॥४०॥

अथवा किं बहुना रमाकान्त
उन्नमय्य भालं चिरञ्जीव।
विजयस्व रिपून् अव निजराष्ट्रम्
आक्रमणं कुरु, आक्रमणं कुरु॥४१॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राष्ट्रस्वर एष समुद्घुष्टः
राष्ट्रस्वर एष श्रोतव्यः।
उच्चैः स्वरेण सर्वे वदन्तु
आक्रमणं कुरु आक्रमणं कुरु॥४२॥

रचनातिथिः-२३.९.२०१६

इयं रचना सर्वप्रथमं २३.९.२०१६ तमे दिनांके नोएडास्थे इण्टरनेशलन चैम्बर ऑफ मीडिया एण्ड एण्टरटैनमैण्ट इण्टस्ट्री एण्ड एशियन एकेडेमी ऑफ आर्ट' द्वारा समायोजिते द्वितीयग्लोबललिटरेरीफेस्टिबल इत्यत्र संस्कृतकविसम्मेलने पठिता।।

29.09.2016तमे दिनांके दिल्लीस्थे पी.जी.डी.ए.बी (सान्ध्ये) महाविद्यालये श्राविता। तदनु 19.10.2016तमे दिनांके लखीमपुर खीरी दशहरा संस्कृत कविसम्मेलने श्राविता।

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शोभनं कृतम्

डॉ. रमाकान्तशुक्लः

जय जय भारतभट! साधु साधु
शोभनं कृतं शोभनं कृतम्।
आतङ्कवादशाला ध्वस्ता
शोभनं कृतं शोभनं कृतम्॥

शल्यचिकित्साक्रमणं कृत्वा
कल्पनातीतकौशलं कृतम्।
आशीविषस्य दंष्ट्रोत्खाता
शोभनं कृतं शोभनं कृतम्॥

आतङ्कवाद-शिक्षण-शाला
ध्वस्ता निहता आतङ्किनश्च।
हेलया निशीथेऽस्मद्वीरैः
शोभनं कृतं शोभनं कृतम्॥

अष्टाविंशे सैतम्बरेऽह्नि
शास्त्रेन्दुखाक्षि(२०१६)वर्षे रात्रौ।
अस्मद्वीरैर्यत्कृतं तद्धि
शोभनं कृतं शोभनं कृतम्॥

कः कदा कुत्र वा कथं गतः
किं कर्तुमना इति न ज्ञातम्।
केनापि कार्यपूर्तेः पूर्वं
शोभनं कृतं शोभनं कृतम्॥

निर्दोषजना नो हता भटै-
स्तेषां सम्पत्तिर्नो ध्वस्ता।
आगस्कृत एव जना निहताः
शोभनं कृतं शोभनं कृतम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परिणामानुमेयकार्या ये
भारतवीरास्तेऽस्मद्वन्द्याः।
आतङ्किनागनकुलैर्वीरैः,
शोभनं कृतं शोभनं कृतम्॥

सेनापराक्रमो जयत्यसौ
गरिमा देशस्यावितो येन।
सर्वे वदन्ति 'भारतवीरैः
शोभनं कृतं शोभनं कृतम्॥

ज्ञातं न मया त्वयका न तेन
ज्ञातं न केनचन किं ज्ञातम्।
विद्युद्गत्या सैनिकैर्जितं
शोभनं कृतं शोभनं कृतम्॥

कज्जललिप्तानन एषोऽस्मत्-
प्रतिवेशी किं ब्रवीतु संसदि।
निजकर्मफलास्वादं करोतु
भारतवीरैः शोभनं कृतम्॥

आयत्यामपि यद्यातङ्की
शान्तो न भवेद्दण्ड्योऽसौ स्याद्।
सेनयोद्घुष्य सुस्पष्टतया
शोभनं कृतं शोभनं कृतम्॥

भूधराकाशतोयेषु सदा
रक्षातत्परैः स्फूर्तवीरैः।
इतिहासं नूत्नं संविलिख्य
शोभनं कृतं शोभनं कृतम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आतङ्कपोषको निजपरिषदि
आस्ते किंकर्तव्यविमूढः।
विक्रमं सैनिकैः स्वं प्रदर्श्य
शोभनं कृतं शोभनं कृतम्॥

नेतारो रक्षत वाक्संयम-
मथ रक्षत भारतगरिमाणम्।
राष्ट्रस्वरेण सह वदत 'भटैः
शोभनं कृतं शोभनं कृतम्॥'

राष्ट्रस्वरेण काङ्क्षितं हि यत्
तत् पूरितमस्मद्वीरभटैः।
यैः स्थाने काले संविचार्य
शोभनं कृतं शोभनं कृतम्॥

(२९/०९/२०१६ तमे दिनाङ्के रात्रौ भारतीयसेनया कृतं शल्यचिकित्साक्रमणं (Surgical Strike) इत्यभियानं विज्ञाय प्रणीतेयं रचना)

रचनातिथिः - ०८/१०/२०१६

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi.

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दशमगुरुवरं नमामि

डॉ. रमाकान्त शुक्लः

सर्वं वंशं स्वकीयं बलिमकुरुत यो धर्मयज्ञस्य वह्नौ,
संख्ये चम्कौरसंज्ञे प्रकटितमतुलं येन शौर्यं च धैर्यम्।
प्रादाद् यो धर्ममार्गं सकलजनहितं खालसाख्यं पवित्रं,
तं श्रीगोविन्दसिंहं दशमगुरुवरं श्रद्धयाहं नमामि॥१॥

यस्याम्बा गूजरी देवी पिता तेगबहादुरः।
गोविन्दाय नमस्तस्मै सर्ववंशप्रदायिने॥२॥

दशमं गुरुमीडेऽहं धर्मरक्षार्थमागतम्।
पिता पुत्राश्च धीरेण येन धर्मार्थमर्पिताः॥३॥

सेनानी काव्यकर्ता च समाजस्य सुधारकः।
योऽन्यायस्य विरोधार्थं त्यक्तसर्वस्व आत्मवान्॥४॥

फतेहसिंहनामानं सिंहं जोरावरं तथा।
अपरावपि यः पुत्रौ धर्मरक्षार्थमार्पयत्॥५॥

बलिदानं पितुर्दृष्ट्वाप्यासीद्यो धर्ममार्गगः।
अन्यायोन्मूलनार्थं यः सदा जागरितोऽभवत्॥६॥

निर्बलान् बलिनः कृत्वा भीतान् कृत्वा तथाभयान्।
श्येनैः साकं खगा युद्धे योजिता येन सत्वरम्॥७॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शुभकर्माणि कर्तुं यो देवीं वरमयाचत।
युद्धात्पलायनं यस्य मतं नासीत् सुधर्मिणः॥८॥

कवीनां सारसर्वस्वं ज्ञानभक्तिक्रियात्मकम्।
ग्रन्थं यो गुरुरूपेण शिष्येभ्यो दत्तवान् गुरुः॥९॥

श्रीमद्गोविन्दसिंहस्य तस्य जन्ममहोत्सवे।
पञ्चाशदूर्ध्वत्रिदशते वर्ध्याप्यन्ते जना मया॥१०॥

रणे वीरगतिं प्राप्तान् सैनिकान् स्वसुतं च यः।
दृष्टवान् समया दृष्ट्या तस्मै स्युर्वन्दनानि नः॥११॥

शस्त्री शास्त्री च सेनानी धर्मरक्षाव्रती कृती।
साहित्यकर्ता यश्चासीत् तस्मै श्रीगुरवे नमः॥१२॥

●

विमुद्रीकरण-प्रश्नोत्तरम्

डा. रमाकान्त शुक्लः

कोपिनी प्रेयसी उवाच-

साहस्री पञ्चशती व्यवहारात्प्रच्युतास्ति यथा।
तद्वन्मच्चित्तादपि कितव! विमुद्रीकृतोऽसि त्वम्॥१॥

चाटुकारः प्रिय उवाच-

विश्वासं जित्वा ते पुनरपि हृदयं प्रविष्टः स्याम्।
द्विसहस्रात्मकमुद्रा यथा पुनर्विपणिमाविष्टा॥२॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

राजकवित्वाकांक्षा

डॉ. रमाकान्त शुक्लः

कविरुवाच-

राजकविः स्यामहमिति कांक्षां कुर्वे शुभे देहलि!
वद तव कोऽस्तीश्वर इति कुर्यां तस्य प्रशस्तिगानमहम्।

विद्युज्जलयोर्मूल्यं नो वर्धितमस्ति यत्कृपया।
तस्य प्रशस्तिगानं डिण्डिमघोषेण कुर्वेऽहम्॥१॥

प्रथमो ध्वनिरुवाच-

अहमस्मि मुख्यमन्त्री यस्य प्रयत्नैरिदं जातम्।
लब्ध्वा प्रभूतबहुमतमहमस्यां दिशि प्रयत्नशीलोऽस्मि॥२॥

द्वितीयो ध्वनिरुवाच-

इदमास्ते मम कार्यं जलविद्युत्पूर्तिकर्ताहम्।
दिल्लीनगरनिगम इति मम नाम न किं श्रुतं भवता? ३॥

तृतीयो ध्वनिरुवाच-

उपराज्यपालनामा दिल्लीसर्वोच्चशासकोऽहं वै।
केन्द्रीयसर्वकारः शासनकार्याय मां नियोजयति॥४॥

इष्टं राजकवित्वं यदि त्वदीयं कवे! तस्मात्।
राजप्रशस्तिगानं कुर्ववहितमानसेन त्वम्॥५॥

कविरुवाच-

देहलि! ब्रूहि को भर्ता तवास्ते प्राणरक्षकः?
महापौरो मुख्यमन्त्री महामात्योऽथवाऽपरः?॥६॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

देहली उवाच-

प्रभुरेवास्ति मे भर्ता स एव प्राणरक्षकः।
अजागलस्तनाः शेषे कालयापनतत्पराः॥७॥

चिकन्नगुनिया वा स्यात् डेंगू वा स्यान्महाज्वरः।
शूकरज्वरकोपो वा स्वयमायान्ति यान्ति च॥८॥

यानावरोधकष्टं वा पीडा नालावरोधजा।
मार्गभङ्गापघाता वा सह्या स्युः प्रभुलीलया॥९॥

वायुप्रदूषणं वास्ताम् ध्वनिदूषणमस्तु वा।
जलप्रदूषणं वा स्यात् स्वयमायान्ति यान्ति च॥१०॥

उत्कोचाचार आस्तां वा भ्रष्टाचारोऽथवा भवेद्।
केनाप्युन्मूलनीयो नो द्रष्टव्यस्तु पदे-पदे॥११॥

तर्कभट्टारकाः सर्वे सर्वे जनहितैषिणः।
सर्वे चासन्दिकाप्राणाः सांख्यपूरुषसन्निभाः॥१२॥

प्रभुरेवास्ति मे भर्ता प्रशस्तिं कुरु तस्य वै।
मत्क्रोडस्थजनानां यो रक्षकोऽस्ति स्वमायया॥१३॥

तस्य प्रशस्तिगानेन त्वं शान्तिं लप्स्यसे पराम्।
राजप्रशस्तिगानेन पश्चात्तापं त्वमाप्नुयाः॥१४॥

इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥१५॥

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतघोषगीतम् -

राष्ट्रभाषा संस्कृतम्

रमाकान्त शुक्लः

राष्ट्रभाषा संस्कृतम्
विश्वभाषा संस्कृतम्
लोकभाषा संस्कृतम्
सर्वभाषा संस्कृतम्॥1॥

ज्ञानभाषा संस्कृतम्
कर्मभाषा संस्कृतम्
भक्तिभाषा संस्कृतम्
योगभाषा संस्कृतम्॥2॥

शास्त्रभाषा संस्कृतम्
काव्यभाषा संस्कृतम्
नाट्यभाषा संस्कृतम्
शिल्पभाषा संस्कृतम्॥3॥

गद्यभाषा संस्कृतम्
पद्यभाषा संस्कृतम्
मिश्रभाषा संस्कृतम्
हृद्यभाषा संस्कृतम्॥4॥

नृत्यभाषा संस्कृतम्
गीतभाषा संस्कृतम्
कृत्यभाषा संस्कृतम्
वृत्तभाषा संस्कृतम्॥5॥

शोधभाषा संस्कृतम्
बोधभाषा संस्कृतम्
न्यायभाषा संस्कृतम्
सांख्यभाषा संस्कृतम्॥6॥

धर्मभाषा संस्कृतम्
अर्थभाषा संस्कृतम्
कामभाषा संस्कृतम्
मोक्षभाषा संस्कृतम्॥7॥

शैवभाषा संस्कृतम्
शाक्तभाषा संस्कृतम्
वैष्णवी वाक् संस्कृतम्
सात्वती वाक् संस्कृतम्॥8॥

जैनभाषा संस्कृतम्
बौद्धभाषा संस्कृतम्
आस्तिकानां संस्कृतम्
नास्तिकानां संस्कृतम्॥9॥

ब्रह्मभाषा संस्कृतम्
क्षत्रभाषा संस्कृतम्
वैश्यभाषा संस्कृतम्
कर्मिभाषा संस्कृतम्॥10॥

प्रीतिभाषा संस्कृतम्
नीतिभाषा संस्कृतम्
शूरभाषा संस्कृतम्
धीरभाषा संस्कृतम्॥11॥

प्रेमभाषा संस्कृतम्
हास्यभाषा संस्कृतम्
शोकभाषा संस्कृतम्
क्रोधभाषा संस्कृतम्॥12॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

वीरभाषा संस्कृतम्
भीतिभाषा संस्कृतम्
विस्मयाढ्यं संस्कृतम्
शान्तभाषा संस्कृतम्॥13॥

वैद्यभाषा संस्कृतम्
वेद्यभाषा संस्कृतम्
सूत्रभाषा संस्कृतम्
भाष्यभाषा संस्कृतम्॥14॥

वेदभाषा संस्कृतम्
आदिभाषा संस्कृतम्
उपनिषद्वाक् संस्कृतम्
भारतात्मा संस्कृतम्॥15॥

सूरिभाषा संस्कृतम्
नेतृभाषा संस्कृतम्
श्रमिकभाषा संस्कृतम्
संगणकवाक् संस्कृतम्॥16॥

सत्कलावाक् संस्कृतम्
साहितीवाक् संक्कृतम्
हर्षदा वाक् संस्कृतम्
तोषदा वाक् संस्कृतम्॥17॥

दृश्यभाषा संस्कृतम्
श्रव्यभाषा संस्कृतम्
प्राच्यभाषा संस्कृतम्
नव्यभाषा संस्कृतम्॥18॥

पाठ्ययमास्ते संस्कृतम्
लेख्यमास्ते संस्कृतम्
श्रव्यमास्ते संस्कृतम्
वाच्यमास्ते संस्कृतम्॥19॥

पूजनीयं संस्कृतम्
कीर्तनीयं संस्कृतम्
गोपनीयं संस्कृतम्
सेवनीयं संस्कृतम्॥20॥

तावकी वाक् संस्कृतम्
मामकी वाक् संस्कृतम्
तस्य भाषा संस्कृतम्
कस्य नास्ते संस्कृतम्॥21॥

सूक्तिसिन्धुः संस्कृतम्
युक्तिगेहः संस्कृतम्
विश्वबन्धुः संस्कृतम्
विश्वनीडं संस्कृतम्॥22॥

व्यासभाषा संस्कृतम्
न्यासभाषा संस्कृतम्
अस्ति सरलं संस्कृतम्
अस्ति सरसं संस्कृतम्॥23॥

नम्रतावाक् संस्कृतम्
कम्रतावाक् संस्कृतम्
मोहिनी वाक् संस्कृतम्
शोभना वाक् संस्कृतम्॥24॥

गर्जनावाक् संस्कृतम्
तर्जनावाक् संस्कृतम्
वर्जनावाक् संस्कृतम्
सर्जनावाक् संस्कृतम्॥25॥

पुष्पभाषा संस्कृतम्
वज्रभाषा संस्कृतम्
वह्निभाषा संस्कृतम्
नीरभाषा संस्कृतम्॥26॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वस्तिभाषा संस्कृतम्
शास्तिभाषा संस्कृतम्
आर्यभाषा संस्कृतम्
कार्यभाषा संस्कृतम्॥27॥

क्रान्तिभाषा संस्कृतम्
शान्तिभाषा संस्कृतम्
क्षान्तिभाषा संस्कृतम्
व्यक्तिभाषा संस्कृतम्॥28॥

सामभाषा संस्कृतम्
दामभाषा संस्कृतम्
भेदभाषा संस्कृतम्
दण्डभाषा संस्कृतम्॥29॥

घोषभाषा संस्कृतम्
रोषभाषा संस्कृतम्
तोषभाषा संस्कृतम्
कोशभाषा संस्कृतम्॥30॥

संस्कृतेर्वाक् संस्कृतम्
निर्भया वाक् संस्कृतम्
शक्तिभाषा संस्कृतम्
रक्षिणी वाक् संस्कृतम्॥31॥

स्वस्थभाषा संस्कृतम्
स्वच्छभाषा संस्कृतम्
श्रेष्ठभाषा संस्कृतम्
ऐक्यभाषा संस्कृतम्॥32॥

भावनावाक् संस्कृम्
प्रेरणावाक् संस्कृतम्
देशनावाक् संस्कृतम्
साधनावाक् संस्कृतम्॥33॥

बालकानां संस्कृतम्
नव्ययूनां संस्कृतम्
प्रौढनॄणां संस्कृतम्
वृद्धनॄणां संस्कृतम्॥34॥

प्रेयसी वाक् संस्कृतम्
श्रेयसीवाक् संक्कृतम्
ज्यायसीवाक् संस्कृतम्
नव्यसीवाक् संस्कृतम्॥35॥

सद्गुरोर्वाक् संस्कृतम्
शिष्यवाणी संस्कृतम्
संगणकवाक् संस्कृतम्
जालभाषा संस्कृतम्॥36॥

गौडभाषा संस्कृतम्
लाटभाषा संस्कृतम्
कैशिकीवाक् संस्कृतम्
भारतीवाक् संस्कृतम्॥37॥

ब्रह्मभाषा संस्कृतम्
जीवभाषा संस्कृतम्
मायिकी वाक् संस्कृतम्
जगद् भाषा संस्कृतम्॥38॥

द्वैतभाषा संस्कृतम्
अद्वया वाक् संस्कृतम्
सद्गुणावाक् संस्कृतम्
निर्मलावाक् संस्कृतम्॥39॥

मुस्लिमानां संस्कृतम्
क्रैस्तवानां संस्कृतम्
सिक्खभाषा संस्कृतम्
भारतानां संस्कृतम्॥40॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतेर्वाक् संस्कृतम्
सत्कृतेर्वाक् संस्कृतम्
उन्नतेर्वाक् संस्कृतम्
सद्गतेर्वाक् संस्कृतम्॥41॥

रक्तभाषा संस्कृत३म्
पीतभाषा संस्कृतम्
कृष्णभाषा संस्कृतम्
शुक्लभाषा संस्कृतम्॥42॥

स्कन्धभाषा संस्कृतम्
पर्वभाषा संस्कृतम्
अङ्कभाषा संस्कृतम्
सर्गभाषा संस्कृतम्॥43॥

पुण्यभाषा संस्कृतम्
गुण्यभाषा संस्कृतम्
युद्धभाषा संस्कृतम्
शुद्धभाषा संस्कृतम्॥44॥

नर्मभाषा संस्कृतम्
मर्मभाषा संस्कृतम्
वर्मभाषा संस्कृतम्
शर्मभाषा संस्कृतम् ॥45॥

मातृभाषा संस्कृतम्
भ्रातृभाषा संस्कृतम्
पित्र्यभाषा संस्कृतम्
मित्रभाषा संस्कृतम्॥46॥

भूमीभाषा संस्कृतम्
व्योमभाषा संस्कृतम्
वायुभाषा संस्कृतम्
सूर्यभाषा संस्कृतम्॥47॥

उत्तरावाक् संस्कृतम्
दक्षिणावाक् संस्कृतम्
पूर्वभाषा संस्कृतम्
वारुणीवाक् संस्कृतम्॥48॥

प्रत्नरत्नैः पूरितम्
नव्यकाव्यैः संस्कृतम्
भातु राष्ट्रे संस्कृतम्
भातु भूमौ संभृतम्॥49॥

आदिकविना सेवितं
नव्यकविभिः सेवितं
भातु राष्ट्रे संस्कृतम्
भातु भूमौ संस्कृतम्॥50॥

अन्वितेर्वाक् संस्कृतम्
संगतेर्वाक् संस्कृतम्
मित्रतावाक् संस्कृतम्
संवदध्वम् संस्कृतम्॥51॥

रचनातिथिः- 13.07.2017

●

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सुन्दरी सा

-डॉ.ऋषिराजपाठकः

मधुरमधुशाला, सुन्दरी सा।
मम हृदयशाला, सुन्दरी सा॥

निखिलजगज्जयिनी शुचिहासा।
सरलसुरबाला, सुन्दरी सा॥१॥

लोलविलोलविलोचनभाषा।
रदरुचिमराला, सुन्दरी सा॥२॥

हृदयहारिणी हरिणी रमणी।
मदभरितचाला, सुन्दरी सा॥३॥

मुखसरसिजसौन्दर्यसमृद्धिः।
नवरसरसाला, सुन्दरी सा॥४॥

यौवनमदसंगीतनर्तकी।
कृतमदनताला, सुन्दरी सा॥५॥

नयनयुगलशरचूर्णितहृदया।
भ्रकुटिकरपाला, सुन्दरी सा॥६॥

ऋषि'मपि हरति प्रणयनवबन्धा।
कलितकरमाला, सुन्दरी सा॥७॥

रचनातिथिः 15.4.2017

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

शनैः-शनैः आचार्यशुक्लस्य मनः लेखादि-लेखनाय तथा न संलग्नमभवत् यथा ग्रन्थप्रणयनाय। अनेन गद्यपद्यात्मिका नैकाः कृतयः भगवत्या भारत्या सपर्यायां समर्पिताः। अधस्तात् तत्कृतीनां संक्षिप्तः परिचयः प्रस्तूयते-

पद्यरचनाः

1. **गांधिगौरवम्**[1] (1960)- महात्मगांधिनः जन्मशताब्द्यवसरे प्रणीतेऽस्मिन् खण्डकाव्ये 125 पद्यानि सन्ति।

2. **लालबहादुरशास्त्रिचरितम्**[2] (1971)- इदं खण्डकाव्यं भारतस्य द्वितीयप्रधानमन्त्रिणं श्रीलालबहादुरशास्त्रिणं विषयीकृत्य रचितमस्ति।

3. **बँगलादेशः**[3] (1972)- प्रस्तुतं खण्डकाव्यं श्रीमत्या इन्दिरागान्धिमहाभागया स्वातन्त्र्यं लम्भितं बंगलादेशमुद्दिश्य विरचितमस्ति। अत्र 208 श्लोकाः सन्ति।

4. **भरतचरितामृतम्**[4] (1974)- अस्मिन् खण्डकाव्ये भरतस्य भ्रातृप्रेम वर्णितमस्ति।

5. **गीतमहावीरम्**[5] (1975)- अस्मिन् खण्डकाव्ये जैनधर्मस्य तीर्थङ्करस्य अहिंसाप्रतिष्ठापकस्य भगवतो महावीरस्य जीवनं संक्षिप्य वणितमस्ति।

6. **विभावनम्**[6] (1975)- ब्रह्मानन्दशुक्लशतकापरनामधेये काव्ये संस्कृतस्य विश्रुतकवेः आचार्यश्रीब्रह्मानन्दशुक्लस्य जीवनपरिचयमवलम्ब्य शतं पद्यानि सन्ति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

7. **इन्दिरायशस्तिलकम्**[7] (1976)- अस्मिन् काव्ये प्रधानमन्त्रिण: श्रीमत्या इन्दिरागान्धिमहाभागाया: यशोगाथा 134 पद्यै: वर्णिता।

8. **सुगमरामायणम्**[8] (1978)- अस्मिन् महाकाव्ये भगवतो रामचन्द्रस्य युगानुरूपम् चरितम् वर्णितम्।

9. **श्रीकृष्णचरितम्**[9] (1979)- भगवत: श्रीकृष्णस्य चरितम् अस्मिन् महाकाव्ये कविना वर्णितम्।

10. **कृष्णात्परं किमपि तत्त्वमहं न जाने**[10] (1985)- अस्मिन् काव्ये 108 पद्यानि सन्ति। प्रत्येकं पद्यान्ते 'कृष्णात्परं किमपि तत्त्वमहं न जाने' इत्यस्य मुकुटस्य प्रयोगोऽस्ति।

11. **नवभारतपुराणम्**[11] (1985)- अस्मिन् प्रबन्धकाव्ये पौराणिकशैल्या भारतस्य पराधीनतागता स्वातन्त्र्योत्तरं च दृष्ट्या आर्थिक्य:, धार्मिक्य:, सामाजिक्य:, नैतिक्य:, राजनीतिक्यश्च परिस्थितय: चित्रिता: सन्ति।

12. **भूवैभवम्**[12] (1986)- अस्मिन् काव्ये कविना संस्कृतस्य प्राचीनकवीनां विषये पद्यानि रचितानि। प्रत्येकं पद्ये एकैकस्य संस्कृतरचनाकर्तु: परिचय: प्रदत्तोऽस्ति।

13. **नूतनसत्यनारायणकथा**[13] (1987)- नूतनसत्यनारायणकथायां सत्यस्य माहात्म्यं व्यापहारिकी उपयोगिता च कविना वर्णिते।

गद्यरचना:

1. **संस्कृतप्रबन्धप्रभा**- अस्मिन् ग्रन्थे आचार्यशुक्लेन छात्रोपयोगिनां लघुकलेवराणां संस्कृतनिबन्धानां रचना कृता अस्ति। अयम् ग्रन्थ: प्रारम्भिक कक्षीय छात्राणां कृते सज्जीकृतोऽस्ति।

2. **प्रबन्धरत्नाकर:**[14] (1967)- प्रस्तुतो ग्रन्थ: उच्चस्तरीय: मौलिकश्चास्ति। अस्मिन् शास्त्रीयान्, सांस्कृतिकान्, राजनीतिकान्, सामाजिकांश्च विषयान् उद्दिश्य आचार्यशुक्लेन वैदुष्यपूर्णा: प्रबन्धा: प्रणीता:। अस्य उपयोगं देशस्य सहस्रश: विद्यार्थिन: कुर्वन्ति।

3. **नाट्यसंस्कृतिसुधा**[15] (1968)- अयम् ग्रन्थ: आचार्यशुक्लस्य पीएच. डी.-शोधप्रबन्धस्य सम्पादितम् संस्करणमस्ति।

4. **चारुचरितचर्चा**[16] (1977-78)- अयम् ग्रन्थ: अष्टसु भागेषु विभक्तोऽस्ति। प्रथमे भागे मनुयाज्ञवल्क्यादि ऋषीणां, द्वितीये भागे राम-सीता-भरत-मारुति-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कृष्ण-बुद्ध-महावीरादि-देवपुरुषाणां, तृतीये भागे भर्तृहरि-चैतन्य-कबीर-गान्धि-एन्ड्र्यूजप्रभृति-समाजसुधारकाणां, चतुर्थे भागे भीष्म-युधिष्ठिर-अशोक-शिवाजिप्रभृतीनां नृपाणां, पञ्चमे भागे शंकराचार्यादीनामाचार्याणां, षष्ठे भागे चाणक्य-आर्यभट्ट-मैथिलीशरणगुप्तप्रभृतिकवीनां, सप्तमे भागे राजाराममोहनराय-तिलकप्रभृति-स्वातन्त्र्यसेनानीनां राष्ट्रनेतॄणां च, अष्टमे च भागे सावरकर-अम्बेडकरादिमहापुरुषाणां जीवनस्य वृत्तान्तस्य वैशिष्ट्यस्य च हृद्यशैल्यां निबन्धनम् कृतमस्ति।

5. भारतस्वातन्त्र्यसंग्रामेतिहासः[17] (1981)- प्रस्तुतग्रन्थे ईष्टइण्डियाकम्पन्याः शासनात् 15अगस्त 1947 यावत् भारतवर्षस्य वर्णनं मनोहरगद्यशैल्यां कृतमस्ति।

6. रसदर्शनम्[18] (1983,1984)- अस्मिन् ग्रन्थे आचार्यशुक्लेन साहित्यशास्त्रीयं रसविषयकं संशोधनं विवेचनञ्च कृतमस्ति। अस्य रचना आचार्यशुक्लेन शास्त्रचूडामणिपण्डितयोजनान्तर्गतं कृता।

नाटकम्

1. अभिनवहनुमन्नाटकम्[19] (1982)- अस्मिन् रूपके कविनिष्ठं राष्ट्रभक्तिप्रेम व्यक्तमस्ति। भगवतो रामस्य परामाराधकस्य संसारोपकारकस्य च हनूमतः चरित्रं वर्णितमस्ति।

संपादिताः ग्रन्थाः

1. संस्कृतवैभवम्[20] (1969)- अयम् ग्रन्थः आचार्यश्रीब्रह्मानन्द-शुक्लाभिनन्दनग्रन्थरूपेण प्रकाशितोऽभूत्।

2. देववाणीदर्शनम्[21] (1982)- अयम् ग्रन्थः दिल्लीस्थ-देववाणीपरिषदा अनुष्ठितानां कार्यक्रमाणां अथ च तत्र प्रस्तुतानां आलेखानां परिचयं प्रस्तौति।

3. भारतस्य द्रष्टव्यानि स्थानानि- इयम् अप्रकाशिता रचना अस्ति।

एतदतिरिच्य अनेकाः मुक्तकरचनाः सन्ति या विभिन्नेषु माङ्गलिकेषु अवसरेषु प्रणीताः आसन्। स्वसमकालीने युगे संस्कृतस्य दयनीयां दशामवलोक्य तदुद्धाराय कार्यं कर्तुं समुद्यतानां कृते अनेकाः रचनाः आचार्यशुक्लेन प्रणीताः। यासाम् संकलनम् अद्यावधि ग्रन्थरूपेण न जातम्।

इत्थं आचार्यरमेशचन्द्रशुक्लस्य कर्तृत्वं विशालमस्ति। तस्य नवभारतपुराणम् अवलम्ब्य अद्यत्वे काशीहिन्दूविश्वविद्यालये शोधकार्यं प्रचलति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आयत्यां एतत्पंक्तिलेखिका विस्तरशः आचार्यशुक्लस्य कृतीरवलम्ब्य विचारयितुमिच्छति। अत्राहम् आचार्यशुक्लस्य विषये महाकविश्रीधरभास्कर-वर्णेकरस्य शब्दानुद्धतुर्मिच्छामि-

"संस्कृतसारस्वतं हि भारतीयानां परम्पराप्राप्तं दैवं दायं वर्तते। तस्य सम्यगध्ययनं, अध्यापनं, संरक्षणम्, संवर्धनं च वास्तविकं सरस्वतीसमभ्यर्चनं भवति। आचार्य श्रीरमेशचन्द्रशुक्लमहोदयैः स्वदेश-धर्म-संस्कृति-परम्परानिष्ठं गद्यपद्यात्मकं प्रभूतं संस्कृतसाहित्यं निर्माय ऐकान्तिकनिष्ठया समुपासिता भगवती सुरभारती।"[22]

सन्दर्भाः

1. **गांधीगौरवम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- संस्कृतपरिषद्, अलीगढ **संस्करणम्**-1969।

2. **लालबहादुरशास्त्रीचरितम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- अनिल प्रकाशन्, जैनपुरी, अलीगढ, **संस्करणम्**- प्रथमम्, 1971।

3. **बँगलादेशः- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- शारदा सदन, मुजफ्फरनगर **संस्करणम्**- प्रथमम्, 1972।

4. **भरतचरितामृतम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- शारदा सदन, मुजफ्फरनगर **संस्करणम्**- प्रथमम्, 1974।

5. **गीतमहावीरम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- शारदा सदन, मुजफ्फरनगर **संस्करणम्**- प्रथमम्, 1975।

6. **विभावनम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- शारदा सदन, मुजफ्फरनगर **संस्करणम्**- प्रथमम्, 1975।

7. **इन्दिरायशस्तिलकम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- शारदा सदन, मुजफ्फरनगर **संस्करणम्**- प्रथमम्, 1976।

8. **सुगमरामायणम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- देववाणीपरिषद्, दिल्ली, आर-6 वाणी विहार, नई दिल्ली-110059 **संस्करणम्**- प्रथमम्, 1978।

9. **श्रीकृष्णचरितम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- देववाणीपरिषद्, दिल्ली, आर-6 वाणी विहार, नई दिल्ली-110059 **संस्करणम्**- प्रथमम्, 1979।

10. **कृष्णात्परं किमपि तत्त्वमहं न जाने- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- देववाणीपरिषद्, **संस्करणम्**- प्रथमम्, 1985।

11. **नवभारतपुराणम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- देववाणीपरिषद्, दिल्ली, आर-6 वाणी विहार, नई दिल्ली-110059 **संस्करणम्**- प्रथमम्, 1985।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

 In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

12. **भूवैभवम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- दुर्गेश प्रकाशन, अलीगढ़ **संस्करणम्-** प्रथमम्, 1986।

13. **नूतनसत्यनारायणकथा- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- देववाणीपरिषद्, दिल्ली, आर-6 वाणी विहार, नई दिल्ली-110059 **संस्करणम्-** प्रथमम्, 1987।

14. **प्रबन्धरत्नाकरः- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- चौखम्बा **संस्करणम्-** प्रथमम्, 1967।

15. **नाट्यसंस्कृतिसुधा- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- देवशंकरशुक्ल, कृष्णापुरी, अलीगढ़ **संस्करणम्-** प्रथमम्, 1968।

16. **चारुचरितचर्चा- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- सुधाकमलग्रन्थालय, 263 उत्तरी गांधी कॉलोनी, मुजफ्फरनगर, 251001 **संस्करणम्-** प्रथमम्, 1977-78।

17. **भारतस्वातन्त्र्यसंग्रामेतिहासः- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- देववाणीपरिषद्, दिल्ली, **संस्करणम्-** प्रथमम्, 1981।

18. **रसदर्शनम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- देववाणीपरिषद्, दिल्ली, आर-6 वाणी विहार, नई दिल्ली-110059 **संस्करणम्**-प्रथमम्-1983, द्वितीयम्-1984।

19. **अभिनवहनुमन्नाटकम्- लेखकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- देववाणीपरिषद्, दिल्ली, आर-6 वाणी विहार, नई दिल्ली-110059 **संस्करणम्-** प्रथमम्, 1982।

20. **संस्कृतवैभवम्- सम्पादकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- संस्कृतपरिषद् अभिनन्दन समितिः, अलीगढ़ **संस्करणम्-** प्रथमम्, 1969।

21. **देववाणीदर्शनम्- सम्पादकः**-डॉ.रमेशचन्द्रशुक्लः, **प्रकाशकः**- देववाणीपरिषद्, दिल्ली, आर-6 वाणी विहार, नई दिल्ली-110059 **संस्करणम्-** प्रथमम्, 1982।

22. **आम्भृणीयम्**(आचार्य रमेशचन्द्रशुक्ल-अभिनन्दनग्रन्थ), सम्पादकः- डॉ.सत्यप्रकाश शर्मा प्रकाशिका आचार्यरमेशचन्द्रशुक्लाभिनन्दन समिति, अलीगढ़, 1983 में उद्धृत।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नवप्रकाशनचर्चा

संस्कृते प्रतिदिनमेव प्रायः काव्यरचना समीक्षा शोधश्च प्रवर्तत एव। विगतेषु वर्षेषु केचन ग्रन्थाः मद्दृष्टिपथमायाताः। तानवलम्ब्य सङ्क्षेपतोऽत्र किञ्चित् व्याहर्तुमीहे। एषु ग्रन्थेषु केचनात्यन्तप्रौढाः केचन साधारणजनग्राह्याः केचन च गूढाशयाः सन्ति। केचन ग्रन्थाः मौलिकाः केचन अनुवादरूपाः केचन च समीक्षारूपाः सन्ति। तत्कर्तृभ्यः प्रणम्य स्वविचारान् प्रस्तौमि।

वन्दनावितानम्[१] श्रीमता हरेकृष्णधूपालशर्मणा विरचितं वृन्दारकाणां, मातापित्रोः, देशभक्तानां वरपुत्राणां च शुभाभिनन्दनपरकं काव्यमस्ति। अस्मिन् श्रीसत्यसाईबाबावन्दनमपि वर्तते। एकसप्ततिशीर्षकेषु सङ्कलितानि पद्यानि कविनिष्ठं देवमातृपितृदेशमातृकावरपुत्रप्रभृतिविषयकं रतिभावमभिव्यञ्जन्ति। तोटक-शार्दूलविक्रीडित-वसन्ततिलक-भुजङ्गप्रयात-स्रग्धरा-प्रभृतिवृत्तैः विरचित-रचनाः पठनीयाः आस्वादनीयाश्च सन्ति। स्रग्धरावृत्तस्य सर्वाधिकप्रयोगः काव्ये दृश्यते। दिङ्मात्रमुदाह्रियते भारतभूमिवन्दनात्मकमेकं पद्यम्-

सत्यस्य रक्षां सततं विधातुं हिंसाविहीनां सरणिं सृजन्तीम्।
सम्यङ्मनुष्योचितधर्मधात्रीं वन्दे सदा भारतसत्यभूमिम्॥

(वन्दे सदा भारतजन्मभूमिम्/९ पृ.४४)

दामिनी पर्यस्फुरत्[२] डॉ. रामशंकर अवस्थिमहाभागेन विरचितेऽस्मिन् काव्ये त्रयोदशसर्गेषु भारतीयस्वातन्त्र्यसंग्रामो वर्णितः। क्रान्तिरणभेर्यनन्तरं केनिङ्गः चिन्ताकुलः सन् काशीप्रयागकर्णपुरदमनं करोति। अस्मिन्नेव क्रमे दिल्ली-लखनऊ-झांसी-काल्पी-ग्वालियरपतनं भवति। ततः हरगोविन्दमाण्डवीबलिदानं भवति। जनविद्रोहस्य, वासुदेवबलवन्तफडकेबलिदानस्य, नवचेतनायाः, शिकागोसर्वधर्मसम्मेलने विवेकानन्दस्य भाषणस्य, प्रेसस्वतन्त्रतासंघर्षस्य, चापेकरबलिदानस्य, उग्रवादोत्कर्षस्य, बंगविभाजनस्य, कांग्रेसविभाजनस्य क्रान्तिकार्यातंकवादस्य च चर्चां कृत्वा सती नारीति शीर्षके क्रान्तिवीरमातुः रामरक्ख्याः वर्णनं विहितम्। कविनास्मिन् काव्ये दोहा-चौपाई-पद्धतिरपि अङ्गीकृता। उदाहरणार्थम्-

हार्डिञ्जं नववाइसरायम्, रक्षितुमकरोद् भाग्यमुपायम्।
बममपातयद् रासबिहारी, बङ्गगतिं दृष्ट्वा प्रतिकारी।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भयमैक्षत भयदाता दर्वः, विवर्णास्यमासीद् बलगर्वः।।
बमविस्फोटेनानलं ज्वालामुखी ववाम।
रिपवे दत्वा भयतमः क्रान्तिबलश्चक्राम।। (पृ.२७०)

रात्रिर्गमिष्यती[3]त्यस्मिन् एकादशसर्गात्मके काव्ये कविना डॉ. रामशंकर अवस्थिना पन्नाधात्र्या बलिदानं वर्णितम्। सा उदयसिंहस्य रक्षार्थं स्वपुत्रस्य बलिं करोति। अन्ते च उदयसिंहः राज्यपीठासीनो भवति। रोलाप्रभृतिच्छन्दस्सु काव्यस्य रचना जाता। दिङ्मात्रमुदाह्रियते-

पीठासीनोऽभूदुदयः सूर्योदयकाले
शोभितमकरोद् पन्ना मुकुटं नृपसुतभाले।
अवतरणमङ्गलं चक्रे प्राप्नोत् सम्मानम्
राणा पुत्रोऽभूदभूत् सार्थकबलिदानम्।।

वनवैभवम्[4] डा.भारत-भूषणरथ-विरचिते वनवैभवम् इत्यस्मिन् काव्ये प्रकृतेर्वर्णनं विहितम्। षण्णाम् ऋतूनां वर्णनं कुर्वता कविना मालिनी-वंशस्थ-इन्द्रवज्रा-शार्दूलविक्रीडितप्रभृतीनि वर्णवृत्तानि प्रयुक्तानि चित्राण्यपि संयोजितानि। ऋतुवर्णनपरकेषु काव्येषु युवा कविरयं नूतनं प्राभृतम् संयोजयति। दिङ्मात्रमुदाह्रियते।

तरणि-किरणवारैः शोभते पूर्णचन्द्रः
पिबति मुदितचित्तश्चन्द्रिकास्ताश्चकोरः।
नयति शशधरोऽर्कात् तीक्ष्णरश्मीन् ददाति
तुहिनदिधितिराशिं सज्जनानां स्वभावात्।।

सौन्दर्यपञ्चाशिका[5] महामहोपाध्याय सनातन कवि श्रीरेवाप्रसाद-द्विवेदिकृता सौन्दर्यपञ्चाशिका एकपञ्चाशत्पद्यसंवलिता सौन्दर्यतत्त्वस्य निरूपणं करोति। गभीरचिन्तनस्य सुबोधतया अर्थावगमनाय कविना हिन्द्यनुवादोऽपि प्रदत्तः। सौन्दर्यशास्त्रस्य स्वरूपमत्र अवदाततया निरूपितम्। अन्ते च कविर्भणति यत्सौन्दर्यं वस्तुनिष्ठं सदपि प्रत्यगानन्दरूपं भवति-

सौन्दर्यं वस्तुनिष्ठं भवदपि भवति प्रत्यगानन्दरूपं
प्रत्यासीनश्च तस्मिन् भवति स भगवान् कोऽपि रासेश्वरोऽपि।
या गोप्यो यश्च कृष्णो भवति च यदिदं मण्डलं नर्त्तनं च
सौन्दर्यं सुन्दराणामयनमथ समाधित्सुषु प्रीतिकृत् तत्।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परिवर्तनकाव्यम्[६] डा.हेमचन्द्रबेलवालेन परिवर्तनकाव्ये त्रीणि शतकानि संकलितानि। परिवर्तनशतकम्, नवसृष्टिशतकम्, वानरराज्यशतकञ्च। परिवर्तनशतके युगानुसारं यत् परिवर्तनम् कविनानुभूतं तस्य वर्णनं वसन्ततिलकावृत्तेन तेन कृतम्। अन्ते च कविर्भणति-

सृष्टिर्नवास्ति भुवने विधिनिर्मिता या
आतंकवाद इति तत्र पतिः प्रसिद्धः।
जायाऽतिवृष्टिरखिले भुवने प्रसिद्धा
योगो द्वयोस्समभवत् प्रबलो धरायाम्॥

व्यङ्ग्यपूर्णे नवसृष्टिशतके काव्ये कविना जगतः आधुनिकपरिस्थितीनां सोत्प्रासं वर्णनं कृतम्। कविः कथयति यद् ब्रह्मणा या सृष्टिः कदाचित् सत्ययुगात् प्राग्विरचिता तत्र इदानीम् मानवेन अनेकानि कष्टानि समुत्पादितानि। आतंकवाद आधुनिकसंत्रासवादिनो जनस्य तादृशः कश्चन प्रयासोऽस्ति येन समस्तापि मानवता कम्पते सृष्टिश्च भीता दृश्यते। कविः परमेश्वरमिदानीन्तन-सृष्टेर्दुर्दशां वीक्षितुं प्रार्थयते। कविरत्र वक्ता संबोध्यश्च परमेश्वरः। भुजङ्गप्रयातेन वृत्तेन प्रणीते शतकेऽस्मिन् धरायाः पीडा अभिव्यक्ता अथ च तस्याः पीडायाः निवारणं काङ्क्षितम्। दिङ्मात्रमुदाह्रियते-

प्रकृत्याः स्वरूपं विचित्रैर्विचित्रै
प्रकारैः कृतं खण्डितं मानवेन।
प्रकृत्याश्रितो हि प्रकृत्यां हतोऽद्य
प्रपश्य स्वसृष्टिं विधातस्तदर्थम्॥

वानरराज्यशतके कथाशैल्यां कविना ग्रामेषु वानराणामातंकात् या भीतिः व्याप्तास्ति जनानाञ्च ग्रामेभ्यः नगरं प्रति यत् पलायनं भवति एतस्याः परिस्थितेः वर्णनं कृतम्। अस्मिन् शतके प्रबन्धात्मकता कविनापादिता। उपजातिवृत्तेन इदम् शतकम् विरचितम्। अन्ते च भगवन्तं श्रीरामं रामभक्तं हनुमन्तञ्च प्रार्थयते यत् ताभ्यां वानराणामातंकेन ग्रामवासिनां रक्षा करणीया-

हे राम! हे हेममृगानुगामिन्!
हे जानकीरक्षक! रामभक्त!
कौशल्यया शिक्षित आत्मशब्दैः
त्वं सर्वलोकाय सुखानि देहि॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विश्वेतिहासस्य तिथिक्रमः[७] डा.कृष्णनारायणपाण्डेयेन अस्यां पुस्तिकायां विश्वेतिहासस्य स्वसम्मतः तिथिक्रमः प्रदर्शितः। अस्मिन् क्रमे स्वायम्भु-मनु-नारद-वसिष्ठ-अँगिरा-प्रियव्रत-ध्रुव-आग्नीध्र-ऋषभ-पृथु-प्रह्लाद-विविधमन्वतरीय-सप्तर्षीणां तथा विविधवंशीयशासकानां प्रमुखघटनानाञ्च तिथिसंकेतपुरस्सरमुल्लेखः कृतः। भारतवर्षस्य विविधराज्यानां वैशिष्ट्यं लेखकेनोद्घाटितम्। अन्ते च धर्मं शरणं गच्छामि, गुरुवरं शरणं गच्छामि, स्नेहं शरणं गच्छामि, ज्ञानं शरणं गच्छामि, संघं शरणं गच्छामि, सत्यं शरणं गच्छामि, स्वास्थ्यं शरणं गच्छामि, विश्वं शरणं गच्छामि, ईश्वरं शरणं गच्छामि चेति शीर्षकेषु स्वचिन्तनम् जीवनदर्शनञ्च प्रस्तुतम्। दिङ्मात्रमुदाह्रियते-

स्नेह मिलन योगेन प्रकृति पूजनं सदा।
योगः जीवन विज्ञानम् विश्वधर्मः सनातनः॥

संरक्ष्या दुहिता सदा[८] डा.सत्यपालशर्मणा अस्मिन् नाटकसंकलने पञ्चरूपकाणां हिन्द्यनुवादसहितानां संकलनं कृतम्। पञ्चस्वपि नाटकेषु नारीशक्त्याः सम्मानम्, कन्यायाः पालनं च समर्थयति अथ च सुताभ्रूणहत्यायाः निन्दां करोति कविः। सर्वाण्यपि रूपकाणि अभिनेयानि सन्ति। पद्येषु समाजोपदेशः सुतरां व्यज्यते।

माता पृथ्व्यां श्रेष्ठा प्रेष्ठा
खादुच्चो वै तातः प्रोक्तः।
चित्रं! भ्रूणे पुत्रीहत्या
निन्द्याचारोच्छेदो भूयात्॥

सुदर्शनविजयम्[९] आचार्य मधुसूदनमिश्रेण सुदर्शनविजयनामके गद्यकाव्ये देवीभागवतस्य तृतीये स्कन्धे वर्णितं सुदर्शनस्य चरितं उपनिबद्धम्। ग्रन्थारम्भे पद्यमयं मङ्गलाचरणं कृत्वा कविः कथामवतारयति। ग्रन्थकर्त्रा क्वचित् दीर्घसमासाः क्वचिदल्पसमासाः प्रयुक्ताः। मध्ये प्रसङ्गानुरूपम् पद्यान्यपि प्रयुक्तानि संवादयोजनापि कृता। सुखान्तं गद्यकाव्यमिदं ग्रन्थकर्तुः प्रतिभां वर्णननैपुण्यञ्च सुतरां पिशुनयति। दिङ्मात्रमुदाह्रियते-

"तत्पश्चाच्च मन्त्रिणां प्रजानामनुरोधेन प्राप्तं पैतृकं राज्यं पालयितुं शुभे काले राज्याभिषेकं कारयित्वा गुरुमातृविप्रादीन् प्रणम्याशीर्वादमादाय पितृवद्राजसिंहासनं प्रभासयन् कुल- परम्परामनुपालयन्, समेषां प्राणिनां

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कल्याणं विचिन्तयन् सद्धर्म विजयी राजा सुदर्शनः सामन्तान्नृपान् विजित्य दिलीपरघुदशरथराम- कुशादिवच्चक्रवर्तिपदमलङ्कृत्य राज्यञ्चकार।"

महाकविर्बाणभट्टः[१०] डा.उदयनाथझा'अशोक' महाभागेन अस्मिन् गद्यकाव्ये विंशति अध्यायेषु महाकवेर्बाणभट्टस्य परिवारस्य, जातेः, सम्प्रदायस्य, जन्मनः, जन्मस्थानस्य, तत्समयस्य, शिक्षादीक्षादेः, मयूरकविना सम्बन्धस्य, व्यक्तित्वस्य, कर्तृत्वस्य, काव्यसौष्ठवस्य, शैल्याः, रसालंकारपाटवस्य, प्रकृतिचित्रणस्य, पूर्ववर्तिकवीनां प्रभावस्य, ग्रन्थानाञ्च परिचयः समीक्षणञ्च प्रादीयाताम्। भाषा प्रौढा प्राञ्जला च। ग्रन्थोऽयम् छात्राणां कृते बहूपयोगी वर्तते। दिङ्मात्रम् समुदाह्रियते गद्यांशः-

"वस्तुतः संस्कृतसाहित्ये गद्यकाव्यस्य चरमोत्कर्षः बाणस्यैव कृतिषु दरीदृश्यते। हर्षचरिते बाणस्याऽद्भुतवर्णनशक्तेः परिचयमवलोक्यते तत्तत्स्थानेषु। वेश-भूषाचार-विचार-सेना-संस्थान-राजगृहादीनां वर्णनं भवतु, प्रभाकरवर्द्धनस्य वर्णनं वा अथवा सिंहनादोपदेशः -यशोमत्याः वर्णनं, सर्वत्र बाणस्य वर्णनाशक्तेः दर्शनम्भवत्येव। महाराजहर्षदेवस्य चरित्रवर्णनेन तत्कालीनसामाजिकधार्मिक-राजनैतिकजीवनस्य परम्पराणाञ्च चित्रणेन बाणभट्टः ऐतिहासिककाव्यकारोऽपि विद्यते।"

(पृष्ठ सं.१६४)

काक्षेण वीक्षितम्[११] महराजदीन पाण्डेय 'विभाषेण' रचिते 'काक्षेण वीक्षितम्' इत्येतन्नाम्नि संस्कृतगजलकाव्यसंग्रहे संस्कृतगजलगीतयः हिन्द्यनुवादेन सह प्रकाशिताः। अस्मिन् परिवर्धितसंस्करणे पञ्च गजलगीतयः एकं गीतम् त्रीणि च मुक्तकानि नवीनानि सन्ति। शेषं द्वात्रिंशत् गजलगीतीनां संकलनं २००४तमे खैष्टेऽब्दे प्रकाशितात् प्रथमसंस्करणात् यथावत् समुद्धृतम्। कवेः रचनासु व्यञ्जनावैभवम्, सामाजिकचिन्तनम्, पद्यरचनानिर्माणकौशलञ्च आद्यन्तं साक्षात्कर्तुं शक्यते। दिङ्मात्रं पश्यन्तु-

याव पन्थास्तु दुर्गमस्स्तोकः
वामतः सर्पणे श्रमस्स्तोकः।
तत्र किं वाऽधिगतं यन्नेतः
प्राप्स्यते, मुदे स्याद् भ्रमस्स्तोकः॥

पं.दीनदयाल उपाध्यायचरितम्[१२] पण्डितमिथिलेशशर्मणा अस्मिन्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गद्यकाव्ये प्रसिद्धराजनीतिचिन्तकस्य अर्थशास्त्रिणः समाजसेविनश्च पण्डित दीनदयाल उपाध्याय महाभागस्य जीवनचरितं चिन्तनञ्च एकोनत्रिंशदध्यायेषु वर्णितम्। श्रीमदुपाध्यायस्य गुणवर्णनपरकाः श्लोकाः आदौ प्रदत्ताः। तदनन्तरञ्च तेषां विस्ताररूपेण उपाध्यायमहोदयस्य चिन्तनं, कर्तृत्वं, दर्शनं चरितञ्च वर्णितम्। संस्कृतमाध्यमेन ग्रथितं ग्रन्थं कदाचित् सर्वे जनाः न अवगच्छेयुः इति कृत्वा हिन्दीभाषानुवादोऽपि लेखकेन प्रदत्तः। दिङ्मात्रमुदाह्रियते-

राष्ट्रीयत्वस्य चाधारो भारतमातृका मम।
भूखण्डमात्रदेशः स्याद् मातृविहीनं भारतम्॥
मतं देयं सुपात्राय नार्थिने कोषपूर्तये।
सिद्धान्ताय मतं देयं न जनाय दलाय वा॥

आदौ प्रदत्ताः गुणश्लोकाः

त्यागी तपस्वी धीरश्च, सौम्यसुगुणान्वितः।
चन्द्रभान गढ़ीवासी, हरिरामसुपौत्रकः।
निज देशप्रेमभक्तिः, स्वदेश वस्तुधारणम्।
उद्देश्यमिदमेवासीद्, उपाध्यायमनस्विनः॥
ब्रह्मचारी जयेत् रोगान्, ब्रह्मचारी जयेज्जराम्॥
ब्रह्मचारिणमायान्ति, आयुर्विद्या यशो बलम्॥
गोसेवको देशभक्तः कर्मशीलो विचक्षणः।
शरीरेण मनुष्योऽपि वस्तुतो देव एव सः॥

मुम्बईनगर्याः सभायां निज ऐतिहासिकभाषणे पं.दीनदयाल उपाध्यायः 'एकात्ममानववादस्य' व्याख्यां प्रस्तुतवान् तदा तेन भावपूर्णशब्दैः निजव्याख्यानं समाप्तम्- विश्वज्ञानाधारे अद्यतनीय निज परम्पराधारे च एतादृशं भारतवर्षं रचयिष्यामः येन अस्माकं भारतदेशः गौरवपूर्णो भविष्यति। यत्र लब्धजन्मा जनः निजव्यक्तित्वं विकासयन् मानवेन सहैव न अपितु सृष्ट्या सह एकात्मवादं स्थापयित्वा नरात् नारायणो भवितुं समर्थो भविष्यति। एतद्रूपं नः संस्कृतेः शाश्वतमस्ति। चतुष्पथस्थिताय विश्वमानवाय एतदस्माकं दिग्दर्शननमपि अस्ति। प्रभो, अस्मभ्यं शक्तिं प्रयच्छ, वयमस्मिन्कर्मणि संलग्ना भवेम। एतद् मे निवेदनम्।'

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मानसी[१३] २०००तमे वैक्रमाब्दे भाद्र मासे कृष्णे पक्षे स्वजनन्याः श्रीमत्याः कैलाशीदेव्याः दिवङ्गमने श्रीविजयबहादुरत्रिपाठिनः मनः अशान्तमभवत्। मनस्तापमपाकर्तुं श्रीमता त्रिपाठिना काव्यं कर्तुं निश्चितम् पद्यानां द्विशती च रचिता। अस्मिन् काव्ये प्रसक्त्यानुप्रसक्त्या कविना स्व-परिचयोऽपि दत्तः, संस्कृतपण्डितानां मात्सर्यमपि वर्णितम्। समकालीन-महाकवीनां श्रीमदाजाद मिश्र-राधावल्लभ-अभिराजराजेन्द्रमिश्रादीनां गुणाः अपि संकेतिताः। स्वरचनायाः महिमाऽपि गीतः। दिङ्मात्रम् यथा-

ये मानसीं पठिष्यन्ति मनसा श्रद्धया जनाः।
सत्यं वदामि नंक्ष्यन्ति तेषां सर्वमनोव्यथाः॥
परदुःखानि संगृह्य स्वसुखानि वितीर्य च।
लीनो भव महानन्दे तीर्त्वा दुस्तरसागरम्॥

आहुतिः स्वातन्त्र्ययज्ञे[१४] डा.रामशंकर-अवस्थिना प्रणीतेऽस्मिन् काव्ये भारतवर्षस्य स्वातन्त्र्यसंग्रामे यैर्हुतात्मभिः स्वजीवनं बलिरक्रियत तेषां भावोद्दीपकवर्णनं कृतम्। षट्त्रिंशत् शीर्षकेषु अथ च अनेकेषु उपशीर्षकेषु कविना अतीतगौरवस्य चेन्नम्मायाः, झाँसीरानी लक्ष्मीबाय्याः, वीरकुँवरसिंहस्य, चन्द्रशेखर आजादस्य, ऊधमसिंहस्य, सुभाषचन्द्रबोसस्य, महात्मगाँधिनः च बलिदानस्य चर्चाऽत्र कृता। षोडशमात्रिक-चौपाईछन्दसः प्रयोगः कविनाऽत्र काव्ये रमणीयतयाकारि।

विस्मिलोऽशफाकुल्लारोशन-
राजेन्द्रा आसन् कारायाम्।
शूलं सोढुं पश्चात् पूर्वे,
कोष्ठेऽन्धे सोढुं परां व्यथाम्॥

राष्ट्रभक्तिभरितं काव्यमिदम् प्रत्येकं भारतीयेन पठितव्यम्।

श्रीशतस्तोत्री[१५] स्तोत्रकाव्य-परम्परायां श्रीचित्रकूटतुलसी-पीठाधीश्वराणां जगद्गुरुरामानन्दाचार्याणां रामभद्राचार्यमहाराजानां 'श्रीशतस्तोत्री' काञ्चन नूतनां विच्छित्तिं दधाति। इयं प्रौढिपरम्परां पालयन्त्यपि नवनवप्रयोगानाचरति। भक्तिभावस्य अविरलधारास्यामाद्यन्तं प्रवहति। अलङ्कृतिरप्याद्यन्तव्यापिनी। द्रुतविलम्बितसदृशाणि लघुकलेवराणि शार्दूलविक्रीडितस्रग्धरासदृशाणि च विशालकलेवराणि वर्णवृत्तानि यथावसरमत्र

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रयुक्तानि सन्ति। पञ्चाशत्प्रायेषु छन्दःसु पञ्चकसप्तकाष्टक-दशकैकादशी-द्वादशी-षोडशक-शतकादि स्तोत्राणि प्रणीय श्रीस्वामिपादैः देवर्षिदेशिकसद्भक्त-लोकविभूतीनां सारस्वती सपर्या कृता। क्वचिद् द्वयोश्छन्दसोर्मेलनेन गीतिर्विरचिता। प्रतीयते यत्स्तोत्रकारस्य पुरः शब्दाः अर्थाः गुणालङ्काररीतयः छन्दांसि च अभीष्टभावपुष्ट्यर्थमहमहमिकया परापतन्ति।

स्तोत्रकारेण समुद्गयमकस्य प्रासादिकतया द्रुतविलम्बितवृत्ते कथं कृतः इति निभालयन्तु रसिकाः-

हरिमहं रघुनाथमिमं भजे हरिमहं रघुनाथमिमं भजे।
हरिमहं रघुनाथमिमं भजे हरिमहं रघुनाथमिमं भजे॥
हरिमयं रघुनाथमुपास्महे हरिमयं रघुनाथमुपास्महे।
हरिमयं रघुनाथमुपास्महे हरिमयं रघुनाथमुपास्महे॥

स्तोत्रकारो वाग्देवतावतारोऽस्ति। स विविधच्छन्दसोर्मेलनेन ससङ्गीतं गेयानां भक्तिभावभरितानां गीतीनां विरचने सिद्धहस्तोऽस्ति। दिक्पाल-हरिपद-मात्रावृत्तयोर्मेलनेन मन्दाकिन्याः स्तुतिं कुर्वाणः स स्तोतव्यायाः स्वरूप-वैशिष्ट्यं महिमानं च सम्यगभिव्यनक्ति-

मन्दाकिनि त्वदीयं, तटमास्पदं मदीयम्।
सलिलं सुखावहन्ते, सुजलं मलापहन्ते॥
सीतारामपदाम्बुजपूतं, धत्से शीतलवारि,
लक्ष्मणमहितं कश्मलरहितं जन्ममृत्युभयहारि॥
पावनसुधासमानं सुर-मुनि-निपीयमानम्।
सलिलं सुखावहन्ते, सुजलं मलापहन्ते॥

कपिः कूर्दते शाखायाम्[१६] युवकविना ऋषिराज-जानीमहाभागेन बालोपयोगिनीनां पञ्चत्रिंशत्संख्याकानां कवितानां संकलनम् अस्मिन् पुस्तके कृतम्। त्रयोदशसंख्याका रचनास्ति- 'कपिः कूर्दते शाखायाम्'। इमाम् रचनाम् प्रामुख्येण स्वीकुर्वन् रचनाकारः ग्रन्थस्य शीर्षकं निश्चिनोति। सरलसरलासु प्रसादगुणोपेतासु रचनासु बालानां प्रवृत्तिः सुशका स्यात्। कविना पशुपक्षिणां, देवानां अथ च वृक्षाणां मुखेन आत्मपरिचयः दापितः। संवत्सरस्य परिचयोऽपि बालानां सामान्यज्ञानपरिवर्धकोऽस्ति। दीपावलीपर्वणो वर्णनं कवेः सांस्कृतिकपरिचयं व्यनक्ति। ऋतूनां वर्णनमपि चेतोहरं ज्ञानदायकञ्चास्ति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चक्रवालयमकस्य छाया अनेकत्र द्रष्टुं शक्यते। प्रथमपङ्क्त्याः अन्ते प्रयुक्तं पदं अग्रिमपङ्क्तेरादौ प्रयुञ्जानः कवी रचनाचमत्कारं प्रस्तौति। रचनायाः सद्यः स्मरणमपि द्रढयति। दिङ्मात्रम् यथा-

कपिः कूर्दते शाखायाम्।
शाखा नमति नदीजले।
नदीजले स्पन्दन्ते मत्स्याः।
मत्स्याः सन्ति मत्स्यगृहे।
मत्स्यगृहं मे गृहकक्षेऽस्ति।
गृहकक्षे वातायनमस्ति.....।
वातायनात् दृश्यन्ते वृक्षाः।
वृक्षाणां सन्ति बहुशाखाः।
शाखायां ननु कपिः कूर्दते।

शिशुस्वान्तम्[१७] इत्यत्र श्रीगीतासुब्बारावकृततेलुगुभाषानिबद्धानां कथानां डॉ. के. वरलक्ष्मीकृता संस्कृतानुवादाः सन्ति। पञ्चाशत्कथासु बालमनोविज्ञानानुकूलाः सरलसंस्कृतनिबद्धाः कथाः सन्ति। शिक्षाप्रदा इमाः सर्वा अपि कथाः। 'नूतनमित्रम्' इत्यस्यामन्तिमकथायां मर्मस्पर्शिकथानकं निबद्धम्। विद्यालयगमनात् विरताय सन्दीपाय कश्चन पुरातनपत्राणि चिन्वन् सुधाकरनामबालः उपदिशति यत् तेन विद्यालयमवश्यं गन्तव्यम्, सुधाकरश्च सन्दीपस्य नूतनं मित्रं भवति। दिङ्मात्रमुदाह्रियते-

मम माता दिवङ्गता। लारीयानस्य अधः प्रमादवशात् पतित्वा मृता। मम पिता मां बहिष्कृतवान्। मां पाठयितुं कोऽपि नास्ति। किन्तु तव माता अस्ति। ससुखं विद्याभ्यासं कुरु! नो चेत् अहमिव त्वमवि पुरातनपत्राणि चित्वा जीवनं यापयेः। चल तावत्... विद्यालयं त्वां प्रापयामि' इति वदन् सुधाकरः विद्यालयं सन्दीपं प्रापयत्। विद्यालयं प्रविशन् सन्दीपः सुधाकरम् आपृष्टवान्।

कः सः बालः? इति अपरः छात्रः अपृच्छत्।

मम नूतनमित्रम् इति सन्दीपः उत्तरं प्रादात्।

साहसे श्रीः[१८] अस्यां पुस्तिकायां 1. साहसे श्रीः, 2. अन्नपूर्णायाः वृत्तम्, 3. श्रीनिवासस्य गाथा, इत्येतासु कथासु साहसस्य अन्येषां च

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मानवीयगुणानां माहात्म्यं कथाव्याजेन प्रदर्शितमस्ति। मूलतेलुगूकथाकारः श्रीगीतासुब्बारावः, संस्कृतानुवादकर्त्री च डॉ. के. वरलक्ष्मी अस्ति। सरलसंस्कृतेन निबद्धा एताः कथाः झटिति हृदयं स्पृशन्ति। दिङ्मात्रं सम्वादमेकं पश्यन्तु-

भवतु काफीं पिबामः। आगम्यताम्! .... असूचयत् वसन्तः। छिन्नोरुकस्य कुड्मलं निष्कास्य अन्तःस्थात् गूढस्यूतात् द्वे रूप्यके स्व्यकरोत्।

'काफीं न पिबामि।' अब्रवीत् आदित्यः।

अन्योक्तिनिर्झरः[१९] डॉ.अरविन्दकुमारतिवारी प्रणीते अन्योक्तिनिर्झरे 108 पद्येषु अनुष्टुप्-वसन्ततिलका-द्रुतविलम्बित-शार्दूलविक्रीडित-तोटकप्रभृतिवृत्तेषु अन्योक्तयः विरचिताः। निर्वापितप्रदीपक-पद्मस्थितकीट-चन्द्र-मेघ-भ्रमर-अरविन्द-प्रदीप-शुक-हंस-वटवृक्ष-शीत-कोकिल-सूर्य-पयोद-धरा-कवि-मयूरप्रभृतीनवलम्ब्य अन्योक्तयः हृद्याः प्रतिभान्ति। दिङ्मात्रमुदाह्रियते-

लोके कामयसे सखे यदि सुखं धान्यं यशो मानितां
त्यक्त्वा हंसकुलं वयस्य मनसा सेवस्व भो वायसम्।
यस्याग्रे गरुडोऽपि हन्त डयते नो खे खगेशः कलौ
नो गायन्ति पिका वसन्तसमये गानं प्रमत्ताः प्रियम्॥

काव्यसञ्चयनम्[२०] डॉ.सीतानाथ-आचार्यशास्त्रिणा विरचिते काव्यसञ्चयने गद्यपद्यात्मिकाः रचनाः संकलिताः सन्ति। वन्दनात्मिकाः अभिनन्दनात्मिकाः, साम्प्रतिकसमाजस्थितेः प्रतीकभूताः, पत्रात्मिकाः, जीवनचरितात्मिकाः, शोकगाथात्मिकाः अन्याश्च रचनाः कवेः हार्दं भावं प्रकटयन्ति। ग्रन्थादौ ग्रन्थकारस्य शिष्यैः तस्मै समर्पितम् अभिनन्दनपत्रमपि संयोजितमस्ति। कवेः हास्यव्यङ्ग्यप्रियतापि प्रत्यक्षीकर्तुं शक्यते। पेचकमवलम्ब्य प्रणीतेषु पद्येषु इयम् द्रष्टुम् शक्यते-

उत्सेधे जीर्णहर्म्यस्य निभृते तमसावृते।
पत्रगुच्छसमाकीर्णे शाखान्ते वा वने तरोः॥
स्थानेष्वेतादृशेष्वेव तमःप्रायेषु संवसन्।
देहविच्छिन्नहृत्पिण्डसदृशः प्रतिभासितः॥
छादितो बहुभिः पक्षैर्दिवालोकभयान्वितः।
लक्ष्मीदेव्याा वाहनोऽसौ पेचको रौति कर्कशम्॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लक्ष्मीलाभतपस्यायाः कौशलं सूचयन्निव।
तमः प्रायो निशाकालो लक्ष्मीलाभे शुभावहः॥
चौर्यञ्च लुण्ठनञ्चैव रेलकक्षाविभाजनम्।
इत्यादीनि सहस्राणि कर्माणि प्रचलन्त्यहो॥
लक्ष्मीलाभानुकूलानि कालेऽवतमसे सदा।
स्थाने काले तमःप्राये पेचकस्येव लोचनम्॥
येषां देदीप्यते तेषां लक्ष्मीलाभो भवेद्ध्रुवम्।
लक्ष्मीदेव्याः कृपा धन्या वित्तवन्तो भवन्ति ते॥
तमःप्रायं बहिःस्थानं केवलं नात्र कारणम्।
चेतसस्तामसी वृत्तिरप्यत्र हेतुरुत्तमः॥

परीवाहः[२१] बलरामशुक्लप्रणीते संस्कृतकवितासंग्रहे 'परीवाहे' प्रणामपद्धति-शृङ्गारागार-विविधविषय-पण्डितप्रशंसा-समस्यापूर्ति- मुक्तक-च्छाया-सुश्लोकसंग्रहेति सप्तसु विभागेषु पृथ्वी-रथोद्धता-आर्या-हरिणी-वसन्ततिलका-वियोगिनी-द्रुतविलम्बित-वंशस्थ-शिखरिणी-इन्द्रवज्रोपेन्द्र-वज्रोपजाति-स्वागता-अनुष्टुप्-शालिनी-स्रग्विणी-मालिनी-सवैया-मञ्जुभाषिणी-दोधक-पुष्पिताग्राप्रभृतिवृत्तेषु विविधविषयानवलम्ब्य हृद्यानि पद्यानि संकलितानि। कवेः छन्दोधिकारः श्लाघ्यः। दिङ्मात्रमुदाह्रियते-

कुसुमसमयाकारं प्रायो विभाति सुयौवनं
सपदि समयाघातैः सर्वे गलन्ति बलादयः।
परिणमति वार्धक्यं देहो, नु दुःखपरम्परां
कथमु विमृशन् यायाद्धैर्यं स्थिरामथ निर्वृतिम्॥

द्राक्षावल्ली[२२] द्राक्षावल्लीति शीर्षके संस्कृतगजलगीतिसंकलने षड्विंशति कवीनां गजलाख्या रचना डॉ.हर्षदेवमाधवेन संगृहीताः। तेनात्र भट्टमथुरानाथशास्त्रि-जानकीवल्लभशास्त्रि-बच्चूलालअवस्थिज्ञान-जगन्नाथपाठक-रमाकान्तशुक्ल-अभिराजराजेन्द्रमिश्र-पुष्पादीक्षित- महेशझा-हरिदत्तशर्म-राधावल्लभत्रिपाठि-हर्षदेवमाधव-भाग्येशज्झा-विन्ध्येश्वरीप्रसादमिश्र 'विनय'-महराजदीनपाण्डेय' विभाष'-कौशलेन्द्रपाण्डेय-बनमालीबिश्वाल-इच्छारामद्विवेद' प्रणव'- जनार्दनप्रसादपाण्डेय' मणि'-रामविनयसिंह-नारायणदाश-कौशलतिवारी-प्रवीणपण्ड्या-राजकुमारमिश्र-बलरामशुक्ल-संस्कृतामिश्रा-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

ऋषिराजजानिनां कवीनां रचनाः प्रस्तुताः। ग्रन्थादौ संस्कृतगजलकाव्यमवलम्ब्य माधवेन भूमिका लिखिता अन्ते च कवीनां संक्षिप्तः परिचयः आंग्लभाषामाध्यमेन संयोजितः। गजलगीतिकायाः वैशिष्ट्यं निरूपयन् माधवो भणति-

नेत्रे तिर्यक् कृत्वा गच्छति हृदयं हृत्वा गजलगीतिका।
मधुमधुरं द्राक्षासवपात्रं याति गृहीत्वा गजलगीतिका॥
वक्रोक्तिरसपूर्णविलासा यथोचितालङ्काररभूषिता।
वाग्बाणैर्ननु स्थिता सभायां मनांसि विद्ध्वा गजलगीतिका॥

राजस्थानीयदेववाणीवाङ्मयम्[२३] डॉ.रामदत्तशर्मणा राजस्थानीय-देववाणीवाङ्मयम् इत्यस्मिन् ग्रन्थे राजस्थाने प्रणीतानां गद्यपद्यरूपक-शास्त्रीयकाव्यादीनां सोदाहरणपरिचयः प्रदत्तः। महाकवेर्माघस्य शिशुपालवधम्, अज्ञातकर्तृकस्य पृथ्वीराजविजयम्, चन्द्रशेखरस्य सुर्जनचरितमहाकाव्यम्, रणछोडभट्टस्य राजप्रशस्तिमहाकाव्यम्, सदाशिवनागरस्य राजरत्नाकरम्, गंगारामस्य हरिभूषणम्, बालकृष्णदीक्षितस्य अजितचरित्रम्, भट्टजगजीवनस्य अजितोदजयम्, भट्टजगजीवनस्य अभयोदयम्, श्रीकृष्णभट्टस्य ईश्वरविलास-महाकाव्यम्, सीतारामपर्वणीकरस्य जयवंशमहाकाव्यम्, श्रीकृष्णभट्टस्य कच्छवंशमहाकाव्यम्, पण्डितसूर्यनारायणस्य मानवंशमहाकाव्यम्, बिहारीलालशास्त्रिणः कूर्मवंशमहाकाव्यम्, रघुनन्दनशर्मणः श्रीतुलसीमहाकाव्यम्, गुलाबचन्द्रशर्मणः कर्णचरितामृतमहाकाव्यम्, विद्याधरशास्त्रिणः हरनामामृतम-हाकाव्यम्, गोपीकृष्णव्यासस्य शम्भुसम्भवं, नित्यानन्दशास्त्रिणः श्रीरामचरिताब्धि-रत्नं, शिवगोविन्दत्रिपाठिनः गान्धिगौरवं चावलम्ब्य संक्षिप्तचर्चा कृता। लेखकेन सप्तसु अध्यायेषु महाकाव्यान्यतिरिच्य खण्डकाव्यानि, रीतिकाव्यानि, गद्यकाव्यानि रूपकाणि शास्त्रीयकाव्यानि चावलम्ब्य विचारः कृतः। सप्तमेऽध्याये संस्कृतविषयकमनुसन्धानम् अवलम्ब्य सूचना प्रदत्ता।

एकविंशशताब्द्याः राजस्थानस्य संस्कृतसाहित्यम्[२४] डॉ. कमलाकान्तबालाणः एकविंशशताब्द्याः राजस्थानस्य संस्कृतसाहित्यम् इत्यस्मिन् ग्रन्थे समकालीनानां संस्कृतरचनाकाराणां परिचयं दत्तवान्। द्वादशाध्यायेषु लेखकेन प्रमुखकवीनां परिचयः, ग्रन्थानां वर्गीकरणं, विविधकाव्यरूपाणां परिचयः, पत्रपत्रिकासु प्रकाशितप्रकीर्णकाव्यानां परिचयः एकविंशशताब्द्या प्रथमदशके प्रकाशितानां ग्रन्थानां काव्यानाञ्च सूची प्रदत्ता। देवर्षिकलानाथशास्त्रि-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हरिरामाचार्य-पद्मशास्त्रि-मोहनलालपाण्डेय-ताराशंकरपाण्डेयप्रभृतीनां षष्टिसंख्याकानां कवीनां पञ्चदश महाकाव्यानां दश गद्यकाव्यानां सप्त नाट्यकाव्यानां तथा च शताधिकग्रन्थानां काव्यानाञ्च सूचिः प्रदत्ता। विविध सूचनाप्रदं इदम् पुस्तकम् आधुनिकसंस्कृतकाव्ये रुचिं निदधतां जनानां कृते उपयोगि अस्ति।

श्रीमद्भगवद्गीताधर्मदर्शनभाष्यम्[२५] अस्मिन् ग्रन्थे प्रसिद्धचिन्तकेन डॉ.गिरिधारीलालचतुर्वेदिना विशदतया हिन्दुधर्मरहस्यम् अभिव्यक्तुं श्रीमद्भगवदगीतायाः भाष्यं कृतम्। स्वल्पैरेव शब्दैरस्य ग्रन्थस्य परिचयो दातुं न शक्यते। पाठकैः स्वयं ग्रन्थोऽनुशीलनीयः। दिङ्मात्रम् ग्रन्थस्यैकोंऽशः प्रस्तूयते-

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः

यज्ञशिष्टान्न से पाप मुक्ति : 'यज्ञशिष्ट' का अर्थ है, यज्ञ का अवशिष्ट अन्न, यज्ञ में आहुतियाँ देने के बाद जो अन्न बचा रहता है उसे कहते हैं 'यज्ञशिष्ट' इस अवशिष्ट अन्न को जो खाता है वह हुआ 'यज्ञशिष्टाशी' यज्ञशिष्टाशी होकर जीने वाला, अर्थात् यज्ञ के बचे हुए अन्न से जीवन निर्वाह करने वाला समस्त पापों से मुक्त हो जाता है, यह पंक्ति का शाब्दिक अर्थ हुआ, उससे अन्न को यज्ञशेष बना कर खाना चाहिए, यह विधि प्राप्त होती हे

(पृ.२०४)

आख्यायिका(संस्कृत-राष्ट्रभाषा कथासंग्रहः)[२६] डॉ.रामदत्तशर्मणा आख्यायिकेति कथासंग्रहे पञ्चविंशति संस्कृतकथाः संगृहीताः तासां कथानां राष्ट्रभाषारूपान्तरमपि संयोजितम्। लेखकस्य विश्वासोऽस्ति यदस्य कथासंग्रहस्य पाठेन पाठकानां कृते तत्सौविध्यं सेत्स्यति येन जीवनस्य विभिन्नयथार्थस्य परिस्थितीनाञ्च सम्यगवबोधार्थं अवसरो लभ्येत। कथासु अनेकत्र स्वानुभूतस्य वस्तुनः वर्णनं लभ्यते। हास्यव्यङ्ग्यबोधोऽपि दृश्यते। कथम् नियुक्तिमण्डल-सदस्याः स्वपरिचितानामुपकारं कुर्वन्ति कथञ्च वञ्चकाः रेलयानेषु जनान् मादकद्रव्यार्पणद्वारा मुष्णन्ति कथञ्च चतुरजनाः स्वप्रयुक्तं कारयानम् अन्येषां कण्ठे योजयन्ति इत्यादि सर्वं लोकवृत्तम् एतासु आख्यायिकासु लब्धुं शक्यते। प्रत्येकं आख्यायिकायाः आदौ एकम् सुभाषितपद्यम् लेखकेन संयोजितम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दिङ्मात्रमुदाह्रियते-

अद्यतनयुगे यस्य जनस्य पार्श्वे षट् ककाराः- १.'कनक' २. 'कारयानम्' ३.'कामिनी' ४.'कादम्बिनी' ५.'कुक्कुरः) ६. कोठी-बृहद् भवनं न सन्ति तस्य किमपि महत्त्वं न अस्ति। मम पार्श्वे तु कार्यानुरूपं कनकं, कारयानम्, बृहद्भवनस्य स्थाने हाउसिंग बोर्ड द्वारा निर्मितं खण्डहरं भवनं अस्ति। त्रयाणां ककाराणां सुखं आप्नुवम्। (पृष्ठ सं.८८)

शनैः शनैः बालगीतावलिः[२७] डॉ.सम्पदानन्दमिश्रेण शनैः शनैः इत्यस्मिन् पुस्तके बालगीतानि संकलितानि। सर्वाण्यपि गीतानि बालाः सुखेन गातुम् शक्नुवन्ति। सर्वेष्वपि गीतेषु बालमनोनुगुणः विषयः प्रतिपादितः। भाषा नितान्तं सरला सुबोधा च। सर्वाण्यपि गीतानि अन्त्यानुप्रासयुक्तानि सन्ति अतश्च सुगमतया कण्ठस्थीकरणीयानि। दिङ्मात्रम् यथा-

घड घड घड घड गर्जति मेघः।
टरर टरर टर रोदिति भेकः॥
छनन छनन छन रणति शिञ्जिनी।
झनन झनन झन क्वणति किङ्किणी॥
टनन टनन टन नदति घण्टिका।
भण भण भण भण भणति मक्षिका॥
वदति झरर झर रुचिरनिर्झरः।
वहति सरर सर मन्दसमीरः॥
टप टप टप टप याति घोटकः।
नृत्यति थथथै थथै नर्तकः॥

पलायितः चणकः[२८] तेलगूभाषायाः सुप्रसिद्धलेखकस्य श्रीमतः गीतासुब्बारावस्य **पारिपोयिनबठानि** इत्यस्याः बालकथायाः संस्कृतेन अनुवचनं के.वरलक्ष्मीमहोदयया कृतम्। बालानां कृते सुगमतया बोद्धव्यस्य वस्तुनः अत्यन्तं सरलया संस्कृतगिरा उपनिबन्धनम् अत्र दृश्यते। दिङ्मात्रम् यथा-

रेलयानं वेगेन गच्छति। बुभुक्षा अपि जायते। अहम् उपाविशम्। मम ग्रामः ताडेपल्लिगूडेम्। मम तातः प्राथमिकविद्यालये प्रधानाचार्यः। सर्वे मां 'चणकः' इति आह्वयन्ति। मम वास्तविकं नाम बहु दीर्घम्। अहं तदा नववर्षीयः................दशवर्षीयः वा आसम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतभक्तमाला[२९] दाधीचवंशावतंसेन आचार्य-पण्डित-श्रीनथमलशास्त्रिणा नाभाजिकृतस्य व्रजभाषानिबद्धस्य भक्तमालकाव्यस्य संस्कृतभाषया काव्यमयं रूपान्तरणं विधाय संस्कृतसाहित्यस्य श्रीवृद्धिर्विहिता। "संस्कृतभक्तमालेति" व्यपदेश्यस्यास्य काव्यमयभाषान्तरणस्य सोपज्ञभागवती-टीकासहितं प्रकाशनं श्रीमता दाधीचमहोदयेन 2072तमे वैक्रमेऽब्दे पण्डितमाली-रामदाधीचस्मृतिसंस्कृतसेवाशोधसंस्थानतः कृतम्। इदं काव्यमयं रूपान्तरणं झटित्येव सहृदयानां चेतांसि स्पृशति। अनेन व्रजभाषया अपरिचिता अपि संस्कृतज्ञा भक्तमालस्य रसास्वादने क्षमा भविष्यन्तीत्याशासे। दिङ्मात्रं यथा-

भक्त भक्ति भगवन्त गुरु चतुर नाम वपु एक।
इनके पद वन्दन किये नाशत विघ्न अनेक॥

संस्कृतरूपान्तरणं

भक्तश्च भक्तिर्भगवान् गुरुश्च नाम्नां चतुर्णां वपुरेकमेव।
एतत्पदाम्भोरुहवन्दनेन शाम्यन्ति विघ्नाः सकला जगत्याम्॥

असमा वाङ्मञ्जरी[३०] भारतस्य पूर्वोत्तरप्रान्तस्य प्राचीनस्य प्राग्ज्योतिषस्य कामरूपस्य अद्यतनस्य असमप्रदेशस्य वा काव्यपरम्परा सुप्राचीनाऽस्ति। तत्र 1858तः 1966पर्यन्तम् उत्पन्नानां पञ्चषष्टिकवीनां असमीयाभाषायां प्रणीतानां शतसंख्याकानां कवितानां संस्कृतभाषया काव्यरूपान्तरम् विधाय डॉ.दीपककुमारशर्मणा महदुपकृतः संस्कृतपाठकवर्गः। सर्वासामपि रचनानां मूलभाषायां प्रदत्तं शीर्षकमपि कोष्ठकेषु प्रदत्तम्। ग्रन्थादौ भूमिकाभागे आचार्यशर्मणा ग्रन्थस्य विषये उपयोगिनी सूचनात्मिका सामग्री प्रदत्ता। ग्रन्थान्ते च सर्वेषामपि पञ्चषष्टिकवीनां संस्कृतभाषामाध्यमेन संक्षिप्तः परिचयः प्रदत्तः। कस्यचिदपि काव्यरूपान्तरस्य साफल्यम् तदैव सिद्ध्यति यदा मूलकाव्यस्यानुपलब्धावपि काव्यरूपान्तरेणैव काव्यार्थावगमो भवेत्। असमावाङ्मञ्जर्यां संकलिताः संस्कृतरचनाः मूलानुपस्थितावपि तदर्थमवबोधयन्ति। दिङ्मात्रम् यथा कुमारी शीर्षकस्य अयमंशः-

जलकुमारी त्वं स्थलकुमारी त्वं
त्वमेव कानने कुसुमकुमारी,
नलिनदलशोभा शेफाल्याः कोमलता
त्वमेवान्विष्यति त्वमेव स्मरन्ती। (पृ.४६)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

बलाका[३१] नगेन्द्रनाथचक्रवर्तिना रवीन्द्रनाथठाकुरकृत बलाकाकाव्यस्य संस्कृतरूपान्तरम् बलाका शीर्षकेणैव कृतम्। पञ्चचत्वारिंशति संख्याका कविता अस्मिन् काव्ये बांग्लातः संस्कृतेऽनूदिताः। दिङ्मात्रम् यथा-

देहस्याकुलता मम वाणीं कां वक्तुमिच्छति?
एतन्मम ततो हेतोर्नूतनं वसनं खलु॥
अपि केनापि दृश्यते नवं तन्मे हृदि स्थितम्।
ऊर्मिस्तस्य नवीनस्य पतिता वसने नवे॥
कृत्वाभ्यक्तं ममाङ्गानि भूता सा भृशमुच्छला।
देहगानस्य तानवत् वक्षसि सा धृता मया॥

स्वामी विवेकानन्दः[३२] अस्मिन् ग्रन्थे निमाईसाधनबोसेन कृतस्य बांग्लाभाषायां प्रणीतस्य 'स्वामी विवेकानन्द' इत्यस्य ग्रन्थस्य सरिताकृष्णशास्त्रि-महाभागया संस्कृतानुवादः कृतः। युगपुरुषस्य स्वामिनः विवेकानन्दस्य चरितमवलम्ब्य नैके गद्यपद्यात्मकाः ग्रन्थाः संस्कृते समुपलभ्यन्ते किन्त्वस्मिन् ग्रन्थे स्वामिनो विवेकानन्दस्य चरितवर्णनेन साकं तस्य लेखानां उद्बोध नानाञ्च अंशाः अपि उद्धृताः सन्ति। निमायीसाधनबोसमहोदयेन स्वग्रन्थेन बंगभाषाभाषिणः पाठकाः उपकृताः। परन्तु अनेन संस्कृतानुवादेन सम्पूर्णे जगति स्थिताः संस्कृतपाठकाः उपकृताः। अनुवादस्य भाषा सहजसुबोधा वर्तते। दिङ्मात्रम् यथा-

यदि धर्मसंसदा जगत् किमपि प्रदर्शनीयम् अस्ति तर्हि तद् एतद् अस्ति- पवित्रता, विशुद्धता, दयालुता, इत्येताः जगतः कस्याश्चित् क्रैस्तमतसंस्थायाः अनन्यसाधारणी सम्पत्तिः नास्ति, अपि तु एकैकया अपि व्यवस्थया श्रेष्ठतमचरित्रवतां पुरुषाणां, श्रेष्ठतमचरित्रवतीनां महिलानां च निर्माणं कृतम् अस्ति। एतादृशेषु प्रमाणेषु सत्सु अपि यदि कश्चन स्वस्यैव मतस्य जीवनविषये, अन्येषां विनाशस्य च विषये स्वप्नं पश्यति तर्हि अहं तस्य विषये हृदयतलतः करुणाम् अनुभूय तं निर्देष्टुम् इच्छामि यत् विरोधं सोढ्वा अपि सर्वस्यापि मतस्य ध्वजे अचिरादेव लिखितं भविष्यति- 'साहाय्यं क्रियतां युद्धं न', 'आत्मसात्करणं स्यात्, न विनाशनम्', 'चित्तैक्यं शान्तिः च स्यात्, न वैमत्यम्।'

(पृष्ठ सं. ११५)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कालं न निद्रापयाणि[३३] एन.गोपीमहाभागेन विरचितं तेलुगुभाषानिबद्धं 'कालान्नि निद्र पोनिव्वनु' इति शीर्षकं कवितासंकलनं जी.एस.आर.कृष्णमूर्तिना कालं न निद्रापयाणि इति शीर्षकेण संस्कृतेनानूदितम्। सर्वा अपि रचना मुक्तच्छन्दसि विरचिताः सन्ति। कालं न निद्रापयाणि इत्येका रचना अत्र संकलितास्ति या कवितासंकलनस्य शीर्षकत्वेनापि गृहीता। अस्यां रचनायां कालस्य महत्त्वं रेखाङ्कितम्। अनुवादस्य भाषा सहजा सुबोधा च वर्तते। यथा-

कालस्य जागरणमेव/ जीवितम्/ तर्हि समुद्रस्य सङ्गतिः/ सागरः कदापि न म्रियते/ क्षणमेव यथा स्तब्धं भवति/ पुनः उत्पूर्य चन्द्रं समानेतुकामो भवति/ चन्द्रे बहुवारं धावितेऽपि/ न घर्षितो भवति/ कौमुदीगन्धः प्रसरत्येव/ तारासु कतिवारं स्पृष्टासु छिन्ना न भवन्ति किल/ सुमानीव विकसन्ति/ मनुष्यपरिमल एव जीवितम्/ कालपत्रे/ कालातीतमश्या लेखने/ जातस्य चित्रस्यैव नाम/ मनुष्यः (पृष्ठ सं.७९,८०)

साहित्याकादमीद्वारा पुरस्कृतस्य तेलुगु' कवितासंग्रहस्य अनेन संस्कृतानुवादेन संस्कृतज्ञाः नूनमेवोपकृता भविष्यन्ति। किन्तु 'मे जाता' इत्यादौ वाक्यारम्भे मे इत्यस्य प्रयोगः उद्वेगं जनयति।

पितामहपौत्रयोः लघुकथासंग्रहः[३४] साहित्याकादमीपुरस्कृतस्य लक्ष्मीनाथवेजबरुवाकृतस्य असमीयभाषारचितस्य "काकादेउताआरुनातिल'रा" इत्याख्यस्य लघुकथासंग्रहस्य नलिनीदेवीमिश्रमहाभागया 'पितामहपौत्रयोः लघुकथासंग्रहः' इति शीर्षकेण संस्कृतानुवादः कृतः। यथा हितोपदेशे पञ्चतन्त्रे च बालोपयोगिन्यः कथाः संगृहीतास्तथैव अत्रापि बालानाम् परोक्षोपदेशार्थं कथाः संकलिताः सन्ति। 1913तमे ख्रिष्टाब्दे रचिताः एताः कथाः अद्यापि बालानां कृते प्रासङ्गिक्यः सन्ति। कथादौ पितामहपौत्रयोः संक्षिप्तः संवादो भवति यः कथायां सूत्रधार इवाभाति। संस्कृतभाषा सरलाऽस्ति असमीय-कथाकथनशैली संस्कृतस्येवास्ति यस्याः निदर्शनं एतेन अनुवादेन जायते। दिङ्मात्रम् यथा-

यदा पितुः शिरदहनकर्म समाप्तं जातं तदा सः महाचौरपुत्रस्तान्, छेदकान् तदेवान्नं भोजयित्वा प्रेषितवान्। तत्पश्चात् गृहं प्रत्यागत्य तेन मातुः पुरतः सर्वमेतद् यदा विवृतं तदा माता हृष्टा अभूत्। (पृष्ठ सं.१६)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

गुरुवाणी[३५] डॉ.एस.रङ्गनाथमहाभागेन गुरुवाणी इत्यस्मिन् आङ्ग्लभाषानिबद्धे ग्रन्थे गुरोः भगवतः श्रीधरस्वामिनः उपदेशाः प्रियपद्यानि च संस्कृतानुवादेन साकं संकलितानि।

Bhagavan Sridhara Swami as Sakshi [३६] अस्मिन् ग्रन्थे विविधग्रन्थानां साक्षित्वप्रतिपादकाः श्लोकाः आङ्ग्लभाषानुवादेन साकं समुद्धृताः। दिङ्मात्रं यथा-

परिपूर्णः परात्माऽस्मिन् देहे विद्याधिकारिणि।
बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते॥ (५.३)

The all full supreme Self residing as the Witness of the mind in this boby which is qualifed to get knowledge and is shining therein is called the "I'

(पृष्ठ सं.४७)

शास्त्रपरिचयः[३७] डॉ.रामपालशुक्लेन शास्त्रपरिचयः इत्यस्मिन् ग्रन्थे शास्त्राणां परिभाषा वेदानां, ब्राह्मणानां, आरण्यकानाम्, उपनिषदाम्, उपवेदानां, वेदाङ्गानां, कल्पसूत्राणां, व्याकरणस्य, निरुक्तस्य, ज्यौतिषशास्त्रस्य, दर्शनशास्त्रस्य, वैशेषिकदर्शनस्य, योगदर्शनस्य, मीमांसायाः, वेदान्तदर्शनस्य, साहित्यशास्त्रस्य, अलङ्कारसम्प्रदायस्य, वक्रोक्तिसम्प्रदायस्य, रामायणस्य, नाट्यशास्त्रस्य, धर्मशास्त्रस्य, अर्थशास्त्रस्य च संक्षिप्तः सप्रमाणश्च परिचयः प्रदत्तः। अस्य ग्रन्थस्य अध्ययनेन छात्राणामुपकारः स्यादेव। दिङ्मात्रं यथा-

अथ किन्नाम शास्त्रम्? कतिविधञ्च तत्?, का उपयोगिता तेषां चेति सर्वं ध्यातव्यमिति तत्रोच्यते- 'शिष्यते अनेन' इति व्युत्पत्या शासु अनुशिष्टौ धातोः ष्ट्रन प्रत्ययान्तेन शास् धातुना शास्त्रशब्दस्य साधुत्वम्, अपि च शास्ति च त्रायते च तच्छास्त्रम्। संस्कृतस्य अनेकै आचार्यैः विषयेऽस्मिन् निर्दिष्टम्-

'यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम्।
अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तत्॥'

(मध्वभाष्य १.१.३) (पृष्ठ सं.१५)

गुलिका[३८] डॉ.कौशलतिवारिप्रणीते गुलिकेति कवितासंग्रहे एकोनपञ्चाशत् कवितानां संकलनं वर्तते। मुक्तच्छन्दोभिः ग्रथितासु कवितासु

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कवेः लोकदर्शनं चिन्तनं भावना विशिष्टाऽनुभूति विलक्षणा चाभिव्यक्तिश्च द्रष्टुम् शक्यते। दिङ्मात्रम् यथा-

गुलिका न जानाति यत्
किं भवेत्
तस्या लक्ष्यम्?
सा तु चलति
तव सङ्केते
त्वया रचितं
गन्तव्यं प्रति।। (पृष्ठ सं.३४)

महाबोधिद्रुमविजयम्[३९] प्रफुल्लगडपालेन महाबोधिद्रुमविजयम् इत्यस्मिन् खण्डकाव्ये महाबोधिवृक्षस्य माहात्म्यं इतिहासश्च प्रायः अनुष्टुपवृत्तेन अवर्णिषाताम्। बोधगयास्थस्य श्रीलंकास्थस्य च महाबोधिवृक्षस्य इतिहासः प्रस्तुतः। 282 पद्येषु काव्यमिदम् पूर्णतां याति। दिङ्मात्रम् यथा-

बोधिवृक्षस्य मूलस्य पुराकथा पुनश्शुभा।
कथ्यतेऽत्र सविस्तारं महामङ्गलदायिनी।। (पृष्ठ सं.३६)

वाग्विलासिनी[४०] युवराजभट्टराई वाग्विलासिनी इत्यस्मिन् काव्ये विविधदेवतानां स्तुतिपरकाणां रचनानां संकलनं विहितवान्। कविः अष्टसु शीर्षकेषु सरस्वत्याः चण्डिकायाश्च स्तुतिरकरोत्। चतुःषु शीर्षकेषु स्वराष्ट्रगौरवं, संस्कृकाव्यकलाम्, मित्रस्य महत्त्वम्, देशस्य अतीतगौरवं च गीतवान्। कवेः प्रियं छन्दः पञ्चचामरम् अस्ति तदनु तोटकं तस्य प्रियं छन्दः एतदतिरिच्य वसन्ततिलका अपि तस्य अभ्यस्तं छन्दः। कविना सर्वेषां पद्यानां हिन्दीभाषानुवादोऽपि पाठकानां सौकर्यार्थं प्रदत्तः। दिङ्मात्रमुदाह्रियते-

सुराजहंसपृष्ठराजिते! विपञ्चिनादिते!
सुदिव्यसामगीतसक्तमानसे! बुधानते!।
कवित्वशक्तिदेऽपवर्गदेऽशुभाऽपहारिके!
प्रदेहि शारदे! नु शेमुषीं सुसेवकाय मे।। (पृष्ठ सं.३५)

नमोनिर्वाचनम् (मोदीविजयपञ्चशती)[४१] आचार्यो रेवाप्रसादद्विवेदी युगमहाकविरूपेण संस्कृतजगति सुप्रसिद्धः एव। तस्य 75सर्गात्मकं स्वातन्त्रसम्भवं नाम महाकाव्यं 1857ई. तः 2011ई. यावत्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भारतस्य संक्षिप्तं ऐतिह्यं काव्यात्मकतया प्रस्तौति। जुलाई 2014तमे खैष्टैऽब्दे नमोनिर्वाचनम् पञ्चशतपद्यात्मकं विलिख्य कविना स्वातन्त्र्यसम्भवस्य एकाशीतिसर्गात्मकता सुसाधिता। 2015तमे खैष्टेऽब्दे अत्र मनाक् परिवर्तनम् विधाय प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः कार्यकालस्य सप्तमासोपलब्धिरपि संकेतिता। काव्यमिदम् कविना भारतरत्नाय श्रीअटलविहारीबाजपेईवर्याय समर्पितम्। काव्यमिदम् संस्कृतमहाकवेः लोकावेक्षणम् लोकाभिमुख्यत्वञ्च सम्यक् संसूचयति। अत्र नरेन्द्रमोदिवर्यस्य निर्वाचनस्य प्रत्यक्षपश्येन वर्णनं अथ च विजयानन्तरं तस्य सत्कार्याणां वर्णनं कविन कृतम्। दिङ्मात्रम् यथा-

केन्द्रीयानपि मन्त्रिणो निजवशे संतस्थुषो यो व्यधात्
नीत्यायोगतया च विश्रुतिमदात् यो योजनायोगकम्॥
सोऽयं मोदिमहोदयो नियमिताचारोऽधुना लक्ष्यते
सम्राजा तुलितःस्वतन्त्रिततया ख्यातेऽपि राष्ट्रे स्वके॥

(पृष्ठ सं. १०९, पद्य सं.५१५)

काव्यस्यान्ते कविः इत्थं शुभं कामयते-

यावद् वर्षति वारि वारिदघटा भूमीतले, किंशुकाः
प्रोद्यन्नूतनकोरकाः कनकितं कुर्वन्ति यावन्नभः।
यावत् संस्कृतभारती परतमां विद्यां निधत्तेऽपरां
यद्वत् तावदियं नरेन्द्रविजयश्रीर्जायतां सुस्थिरा॥

(पृष्ठ सं. १११, पद्य सं.५२३)

चारुवसन्तीयम्[४२] वसुदेवहिण्डी इत्यस्मिन् प्राकृत गद्यकथाप्रबन्धे चारुदत्तस्य कथा निबद्धास्ति। विदुषामतमस्ति यत् वसुदेवहिण्डी गुणाढ्यप्रणीतायाः बृहत्कथायाः(वड्ढकहायाः) जैनरूपान्तरम् वर्तते। इयं कथा जिनसेनकृते संस्कृतभाषानिबद्धे हरिवंशपुराणेऽपि विस्तरशः उदीरिता अस्ति। कन्नडभाषारचितेषु आदिगुणवर्म-कर्णपार्य-बन्धुवर्म-नागराज-महाबलसाळव-मंगरसप्रभृतीनां कवीनां काव्येष्वपि पल्लविता पुष्पिता च। गौरवान्विते वणिक्कुले लब्धजनिश्चारुदत्तः गणिकायां वसन्तितिलकायां अनुरक्तः वंशकीर्तिं पांसुलीकृत्य निर्गतिको भवति। धर्मपत्न्या हृदयौदार्येण सः वसन्ततिलकां द्वितीयपत्नीरूपेणाङ्गीकरोति देशविदेश-यात्रां कृत्वा पुनरपि सः गृहमायाति। अन्ते च पुत्रकलत्रसौख्यं भुक्त्वा वैराग्यं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रयते। प्रा.हं.प.नागराजय्य:(हं.प.ना) इमाम् कथाम् सुललिततया कन्नडभाषाया-मतिरमणीयतया ग्रथितवान्। अस्य संस्कृतरूपान्तरं डा.एच.वि.नागराजराव् महोदय: सफलतया रमणीयतया च विहितवान्। रूपान्तरकार: कन्नडस्य संस्कृतस्य च समानाधिकारी विद्वान्। स्थाने स्थाने रूपान्तरकारेण मुक्तच्छन्दोनिबद्धस्य मूलकाव्यस्य मुक्तछन्दसा साकं संस्कृतवर्णवृत्तैरपि अनुवाद: कृत:। दिङ्मात्रमुदाह्रियते-

इत्युक्त्वा खचराधिपो बहुविधामूल्यानि वस्तूनि वै
राशीकृत्य पुरो न्यधात्पुनरपि प्रेक्ष्याखिलं निश्चल:।
चारु: स्मेरमुखाम्बुजो निगदति स्मालं न मेऽत्र स्पृहा
धीमान् वाञ्छति नैव वित्तनिचयं चारित्रवान् संयमी॥

परिषदा 16.10.2016तमे दिनांके रमालये ऊनत्रिंशः पण्डितराज-महोत्सवः सम्मानितः। 'पण्डितराजसम्मानः-2016' डा. जनार्दनप्रसादपाण्डेय 'मणि' महाभागाय प्रदत्तोऽभूत्। अपरिहार्यकारणै श्री 'मणि' महाभागो दिल्लीमागन्तुं नापारयत् अतः राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे साहित्यविभागे सहायकाचार्येण डा. अजयकुमारमिश्रेण तत्पक्षतः सम्मानः स्वीकृतः। समारोहस्य मुख्यातिथिना डा. रामशरणगौडेन, परिषदध्यक्षेण महासचिवेन च सम्मिश्रतयायं सम्मानः समर्पितः। अस्मिन्नवसरे डा. चन्द्रभूषणझामहाभागेन रमाकान्तप्रणीतस्य पण्डितराजीयस्य पण्डितराजजगन्नाथप्रणीतायाः गंगालहर्याश्च स्वोपज्ञं मैथिली-रूपान्तरं श्रावितम्। रम्या पण्डितराजस्य पद्यानि श्रावितवती। सञ्चालनं डा. ऋषिराजपाठकेन कृतम्।

अस्मिन्नवसरे सारस्वतातिथेः पद्मश्रीविभूषितस्य आचार्यरवीन्द्रनागरस्य-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आध्यक्ष्ये कविगोष्ठी अप्यायोज्यत यत्र डा. बलरामशुक्ल:, डा. चन्द्रभूषणझा:, डा. ऋषिराजपाठक:, रमाकान्तशुक्ल:, श्रीविनोदबब्बरश्च काव्यपाठमकुर्वन्। अस्मिन्नवसरे डा. ऋषिराजप्रणीतस्य कवितासंकलनस्य 'आद्योन्मेषस्य' श्रीमत्या रमाशुक्लया प्रणीतस्य 'सर्वशुक्लोत्तरा हिन्दी में' इत्यस्य ग्रन्थस्य च लोकार्पणमप्यभूत् (विस्तरार्थं द्रष्टव्य:- 'संस्कृतसंवाद:' 6/9(129) 'नवम्बर 2016 त: 15 नवम्बर पर्यन्तम्, पृ.1,2)

परिषदा 13.12.2016 तमे दिनांके एकचत्वारिंश: स्थापनादिवससमारेह: रमालये सम्मानित:। मुख्यातिथिरूपेण अयोध्यावास्तव्य: डा. देवीप्रसादपाण्डेय: 'दीप'महोदय: समुपस्थित:। तेन वेदानां विषये महत्वपूर्णा चर्चा कृता, अथ च स्वकीया: संस्कृत-हिन्दी-रचना: श्राविता:। डा. महोदयोऽद्यत्वे वेदानां भाष्यकर्मणि व्यापृतोऽस्ति। सारस्वतातिथिरूपेण राष्ट्रियसंस्कृतसंस्थाने वेदविभागाध्यक्षाचार्य आचार्य: मनोजमिश्र: वेदानां महत्त्वं सनातनप्रासंगिकतां च प्रत्यचीपदत्। अस्मिन्नवसरे डा.राकेश 'रवि' महाभागस्य मुख्यातिथित्वे डा. सुधीकान्त-भारद्वाजस्याध्यक्ष्ये च बहुभाषा-कविगोष्ठी अप्यायोज्यत। परिषदुपाध्यक्षा श्रीमती रमाशुक्ला समारोहस्याध्यक्ष्यं सहसचिव: डा.ऋषिराजपाठकश्च सञ्चालनमकरोत्।

अस्मिन्नवसरे परिषत्पक्षत: दिवंगतानां परिषत्सदस्यानां श्रीमत्या विद्याशर्ममहोदयाया:, आचार्यश्रीधरवासिष्ठमहाभागस्य, डा. रामसुरेशपाण्डेयस्य स्मृतौ एकमिनटात्मकं मौनमपि सर्वैर्धारितम्।

समीक्ष्यकाले परिषदा अष्टादशग्रन्थानां प्रकाशनं कृत्वा संस्कृतवैदुष्येन रचनाधर्मितया च संस्कृतलोक: परिचितोऽक्रियत। इमे ग्रन्था: परिषदा प्रकाशिता:–

१. **बीसवीं शताब्दी के उत्तरार्ध में आधुनिक संस्कृत नाटक : एक अध्ययन** - डा. कल्पना द्विवेदी
२. **निस्यन्दिनी (द्वितीय सं.)** - डा.जनार्दन प्रसाद पाण्डेय 'मणि'
३. **श्रीस्वामिविवेकानन्दचरितम् और विश्वभानु** - डा. रवीन्द्रनागर:
४. **आशा-द्विशती** - डा. रमाकान्तशुक्ल:
५. **सर्वशुक्लोत्तरा हिन्दी में** - श्रीमती रमा शुक्ला
६. **मम जननी** - रमाकान्तशुक्ल:
७. **समष्टि:** - राधावल्लभ त्रिपाठी
८. **आर्यार्णव** - डा. शिवदत्त शर्मा चतुर्वेदी

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

९. **राजधानी-रचनाः** - डा. रमाकान्त शुक्लः
१०. **श्रीहीरकप्राभृतम् (प्रथमखण्ड)** - प्रधानसम्पादक, डा.इच्छारामद्विवेदी
११. **श्रीहीरकप्राभृतम् (द्वितीयखण्ड)** - प्रधानसम्पादक, डा.इच्छारामद्विवेदी
१२. **श्रीहीरकप्राभृतम् (तृतीयखण्ड)** - प्रधानसम्पादक, डा.इच्छारामद्विवेदी
१३. **श्रीहीरकप्राभृतम् (चतुर्थ खण्ड)** - प्रधानसम्पादक, डा.इच्छारामद्विवेदी
१४. **मुनिसुतायन** - डा. शैलकुमारी तिवारी
१५. **आद्योन्मेषः** - डा. ऋषिराज पाठकः
१६. **पुराणवैभवम्** - डा. कल्पना द्विवेदी
१७. **मुद्रा और चारी** - डा. कल्पना द्विवेदी
१८. **शैव उपनिषद्** - डा. गोकुलेन्द्र नारायण देव गोस्वामी

द्वे पुस्तके मुद्रणाधीने स्तः-

१. **योग-विभूति-विमर्शः** - डा. अभिनव शुक्लः
२. **श्रीशिवराज्योदय-सहजबोध (सर्गद्वयात्मकहिन्द्यनुवादसहितम्)** - डा. अभिनवशुक्लः

परिषदः कृते आनन्दवर्धकाः समाचाराः अपि प्राप्ताः। परिषदः आजीवन सदस्य आचार्य राधावल्लभत्रिपाठी राष्ट्रपतिसम्मानप्रमाणपत्रेण सत्कृतो जातः। परिषदः आजीवनसदस्या डा. शशितिवारी राष्ट्रपतिसम्मानप्रमाणपत्रेण उ.प्र. संस्कृतसंस्थानस्य विशिष्टपुरस्कारेण अन्यैश्च तैश्च-तैश्च पुरस्कारैः सम्मानिता। प्रो. 'अभिराज' राजेन्द्र मिश्रः 'विश्वभारती'पुरस्कारेण भारतेन्दुसम्मानेन अन्यैश्च पुरस्कारैः सम्मानितो जातः। उ.प्र. संस्कृतसंस्थानेन अर्वाचीनसंस्कृतस्य सम्पादनार्थं रमाकान्तशुक्लः नारदपुरस्कारेण सम्मानितः। वैफ्ट संस्था 11.12.2013तारिकायां रमाकान्त शुक्लं कविकुञ्जरविरुदेनेनालङ्कृतवती। परिषत्प्रकाशिताः ग्रन्थाः 'सर्वशुक्लोत्तरा', 'मम जननी', 'अर्याणर्वः', 'उत्तरप्रदेशसंस्कृतसंस्थानेन विशिष्ट-सम्मानैः सभाजिताः। एतत्पंक्तिलेखकः डा. रवीन्द्रनागरश्च भारतस्य महामहिमराष्ट्रपतिना 'पद्मश्रीः' सम्मानेन अलंकृतौ। अस्मै जनाय काशीस्थ अखिलभारतीयविद्वत्परिषद् 'महामहोपाध्याय' विरुदमदात्। अखिलभारतीय-प्राच्यविद्यासम्मेलनस्य उपाध्यक्षपदेऽस्य जनस्य सर्वसम्मत्या चयनं जातम्। विद्याभूषणट्रष्टेन अस्मै जनाय 'साहित्यमहोदधि'रिति अलंकरणं प्रदत्तम्। डा. शशिप्रभाकुमारमहाभागा राष्ट्रपतिसम्मानप्रमाणपत्रेणालंकृता अथ च मानद डी.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लिट्. उपाधिना अलंकृता। डा. ऋषिराजपाठक आकाशवाणी-दूरदर्शनयोः कार्यक्रमान् सम्पादितवान् प्रस्तुतीश्च दत्तवान्। तस्मै 'पीएच.डी' शोधोपाधिरपि दिल्लीविश्वविद्यालयेनादीयत. लखीमपुरखीरी-कुरुक्षेत्र-हरिद्वारादिषु तस्य काव्यपाठो भाषणानि चायोज्यन्त। तस्य 'आद्योन्मेषः' नाम कवितासंकलनं प्रकाशितम्। डा. शैलकुमारी तिवारीमहाभागाया 'मुनिस्तुतायन' काव्यं प्रकाशितम्।

देववाणी-परिषदस्त्रैमासिकं पत्रमर्वाचीनसंस्कृतम् सततं प्रकाश्यते। अस्य नवशतपृष्ठात्मकः चत्वारिंशद्वर्षपूर्त्यङ्कः 36/1-40/4 संयुक्ताङ्कः (141-158) 15.07.2014तमे दिनांके प्राकाश्यं गतः, यस्य औपचारिकं लोकार्पणं भारतीयसंस्कृतपत्रकारसंघेन 07.08.2014 तमे दिनाके 'प्रेस क्लब सभागारे समायोजितेऽभवत्। आचार्यश्रीधरवासिष्ठः, सांसदः श्री शान्ताकुमारः प्रधानसम्पादकः रमाकान्तशुक्लस्तथा चान्ये महानुभावा अंकेऽस्मिन् स्वहस्ताक्षराणि अंकयित्वा शुभकामनाः प्रकटितवन्तः। नवीनतमोऽङ्कः प्रकाशनाधीनोऽस्ति।

भारतस्य केन्द्रीयसर्वकारेण 2015तमे वर्षे मानिते संस्कृत-दिवस समारोहे देववाणी-परिषदा सहकारः कृतः।

दुःखोदन्ता अपि परिषदा लब्धाः। अस्य आजीवनसदस्याः आचार्याः श्रीनिवासरथवर्याः, श्रीमती विद्या शर्मा, आचार्य श्रीधरवासिष्ठः, डा. रामसुरेश पाण्डेयश्च दिवं प्रयाताः। एते परिषदा सश्रद्धं स्मर्तव्याः सन्ति।

देववाणी-परिषदा संस्कृतस्य प्रचार-प्रसारार्थं यथाशक्ति प्रयत्यते। विगतवर्षद्वयान्तराले भारतसर्वकारस्य संस्कृतदिवसायोजनेऽनया सहकारः क्रियते। 2013तमे खैष्टैब्दे परिषदा राष्ट्रियसंस्कृतसंस्थानस्य केन्द्रीयविश्वविद्यालयत्वस्य कृते प्रस्तावः परितः। तद्विषये भारतसर्वकारेण उपवेशनत्रयमपि आयोजितम्। किन्तु संस्कृतस्य महारथिभिरेवास्मिन्विषये उदासितम्। विगतपञ्चवर्षेषु आचार्य-इच्छारामद्विवेदमहोदयानाम् आध्यक्ष्ये परिषदा उल्लेखनीया प्रगतिः कृता। कार्यसमित्या सर्वैः सदस्यैरस्या प्रगत्यै महत्त्वपूर्णं योगदानं कृतं क्रियते च। परिषदा बहु कृतम्, बहु च कर्तव्यतया तिष्ठति।

देववाणी-परिषद इदानीन्तनपरिचयदानार्थमेकस्य ग्रन्थस्यावश्यकता अनुभूयते। आचार्यश्रीरमेशचन्द्रशुक्लेन, डा. ब्रजमोहनचतुर्वेदिना, आचार्य सीताराम-चतुर्वेदिना, आचार्यवेदानन्दझावर्येण, डा. राजेन्द्रमिश्रेण, डा. बच्चूलाल-अवस्थिना, डा.राधावल्लभत्रिपाठिना, डा. उमाकान्तशुक्लेन, डा. रामकरणशर्मणा,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आचार्येण इच्छारामद्विवेदिना च अध्यक्षत्वेन परिषदग्रे नीतास्ति। श्रीमत्या रमा-शुक्लया बहुधा कार्यवाहकमाध्यक्ष्यं निर्व्यूढम्। एतेषां कार्यकाले किं किं कार्यं परिषदा कृतमित्यस्योल्लेखो ग्रन्थरूपेण क्रियते चेत्तर्हि जिज्ञासूनामुपकारः स्यात्।

पुनश्च देववाणी-परिषदः कार्यक्रमाणां शतशो ध्वनिपट्टिका एतत्पंक्तिलेखकस्य सकाशे विद्यन्ते यासु आचार्यबदरीनाथशुक्लः, श्रीचारुदेव-शास्त्रिः, पं. पी.एन.पट्टाभिरामशास्त्रिः, डा. मण्डनमिश्रः, डा. गौरीनाथशास्त्रिः, डा. प्रभाकरनारायणकवठेकरः, डा. जयमन्तमिश्रः, पं. आद्याचरणझाः, आचार्यः श्रीनिवासरथः, आचार्यः वि.वेंकटाचलः, डा. भास्कराचार्यत्रिपाठी, डा. कृष्णकान्तशुक्लः, डा. कमलेशदत्तत्रिपाठी, डा. पुष्पादीक्षितवर्या, डा. 'अभिराज' राजेन्द्रमिश्रः, डा.जगन्नाथपाठकः, डा. हरिश्चन्द्ररेणापुरकरः, पं. ओगेटीपरीक्षितः शर्मा, डा. लीनारस्तोगी, डा. उमाकान्तशुक्लः, डा. विष्णुकान्तशुक्लः, डा. रामविनयसिंहः, डा. जनार्दनप्रसादपाण्डेय'मणि', डा. रहसबिहारीद्विवेदी, डा. इच्छारामद्विवेदी, डा. नलिनी शुक्ला, डा. रामकृष्णशर्मा, पं. बटुकनाथशास्त्रीखिस्ते, डा. शिवदत्तचतुर्वेदः, डा. विन्धेश्वरीप्रसादमिश्रः 'विनय', डा. दीपकघोषः, श्रीसुन्दरराजः ,श्रीस्वामिनाथः, वी.कण्णनः प्रभृतीनां विचाराः कविताश्च ध्वन्यंकितास्तिष्ठन्ति।

अद्यत्वे 'आडियो-कैसिट युगं' समाप्तम्। टेपरिकार्डरयन्त्राणि कालातीतानि जातानि। यदि कश्चित्प्रयत्नः ध्वनिपट्टिकानां कम्प्यूटरप्रवेशार्थं भवितुं शक्येत तर्हि विद्वद्वचनानां ध्वनिरूपेण संरक्षणं कदाचित् भवेत्। यदि परिषदा एतदर्थं किमपि कर्तुं विचार्य ते तर्हि सकलाऽपि सामग्री अनेन जनेन समर्पयितुं शक्यते।

देववाणी-परिषदः पार्श्वे स्थानं नास्ति। इदानीं यावत् श्रीमत्या रमा शुक्लाया आवासे रमालये अस्या गतिविधयः प्राय आयोज्यन्ते। स्थायि-स्वतन्त्रस्थानार्थमपि प्रयत्ना अपेक्ष्यन्ते।

पुनश्च स्थाने स्थाने परिषदः शाखा अपि स्थापयितुं शक्यन्ते येन संस्कृतय समुचित प्रचार-प्रसारार्थं सुगमतया प्रभावितया च कार्यं कर्तुं शक्येत।

अयं जन आत्मानं धन्यं मन्यते यदनेन सर्वैरपि अध्यक्षैः सह देववाणी-परिषदः महासचिवत्वेन सेवां कर्तुमवसरः प्राप्तः।

अद्य 24.12.2016 तारिकायां 36-40तमं यदिदं वार्षिकाधिवेशनं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

समायोज्यते तस्योद्घाटनसत्रे कामरूपवेदाध्ययनमण्डलसचिवाय श्रीमते डा. गोकुलेन्द्रनारायणदेवगोस्वामिमहाभागाय, डा.चन्द्रभूषणझामहाभागाय, श्रीविनोद-बब्बरमहाभागाय डॉ.नोदनाथमिश्राय च परिषदो मान्यसदस्यता प्रदास्यते। अथ च डा. गोस्वामीप्रणीतस्य 'शैवोपनिषद्' इति ग्रन्थस्य लोकार्पणमपि करिष्यते-इत्यस्ति प्रमोदावहो विषयः आबालवृद्धानामत्र सहकारोऽस्तीति हर्षप्रकर्षविषयः।

उद्घाटनसत्रानन्तरं कार्यसमिति-निर्वाचनमण्डल-साधारणसभा-निर्वाचितकार्यसमितिसमज्या अपि भविष्यन्ति।

अस्मिन्नवसरे ते सर्वेऽपि जनाः परिषत्पक्षतो धन्यवादैः सभाज्यन्ते ये केनापि प्रकारेण परिषदो बलसंवर्धनं कुर्वन्ति। ये परिषत्प्रकाशितान् ग्रन्थान् पुस्तकालयार्थं नैकप्रयोगार्थं वा क्रीणन्ति, ये वा विना मूल्यं स्वाध्यायार्थं ग्रन्थान् स्वीकुर्वन्ति, ते सर्वेऽपि धन्यवादार्हाः। ये जना ग्रन्थप्रकाशनार्थमार्थिकं सहयोगं कुर्वते तेऽपि धन्यवादार्हाः। ये च ग्रन्थान् क्रीत्वा छात्रेषु जिज्ञासुषु वा वितरन्ति तेऽपि धन्यवादार्हाः।

याभिः संस्थाभिः कार्यक्रमनिष्पादनार्थं परिषदे स्थानं सुलभीक्रियते ता अपि धन्यवादैः सभाज्यन्ते। राष्ट्रियसंस्कृतसंस्थानेन श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठेन च अनेकधा परिषदे कार्यक्रमायोजनार्थं स्वकीयपरिसरे स्थानं प्रदत्तम्। आभ्यां धन्यवादाः प्रदीयन्ते। संस्कृतवाणी', 'संस्कृतसंवादः', 'संस्कृतवर्तमानपत्रम्', 'सुधर्मा', 'संस्कृतसम्भाषणसंदेशः', 'राष्ट्रकिंकरः' 'दैनिकजागरण' च प्रभृतीनां पत्राणां सम्पादकैः परिषदः कार्यकलापाः औदार्येण प्रकाशिताः इति ते धन्यवादैः सभाज्यन्ते।

यत्प्रभापटलोद्भासा भासतेऽद्यापि भारतम्।
दिव्यं तत्संस्कृतज्योतिरासंसारं प्रकाशताम्॥

24 दिसम्बर 2016
रमालयः, आर-6 वाणीविहारः,
नई दिल्ली ,110059

रमाकान्त शुक्लः
महासचिवः,
देववाणी-परिषद्,दिल्ली

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

देववाणी-परिषद्वार्ता

१. सोल्लासं समामानितः २९तमः पण्डितराजमहोत्सवः

देववाणीपरिषदा 16.10.2016 तमे दिनाङ्के प्रातः 10वादनतः एकवादनपर्यन्तं 'रमालयः आर-6 वाणीविहारः नवदेहली - 110059' इत्यत्र समायोज्यत। कार्यक्रमस्य शुभारम्भः डॉ.जगन्नाथमठकृतेन लौकिकमङ्गलाचरणेन ऋषिराजपाठककृतेन सामगानेन चाभूत्। अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण डॉ.रामशरणगौडः, सारस्वतातिथिरूपेण पद्मश्रीविभूषितः आचार्यः रवीन्द्रनागरः, अध्यक्षत्वेन श्रीमती रमाशुक्ला चोपातिष्ठन्। 2016तमवर्षीयपण्डितराजसम्मानः राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य साहित्यविभागाध्यक्षाय आचार्याय विश्रुतकवये काव्यशास्त्रिणे च डॉ.जनार्दनप्रसादपाण्डेयाय 'मणये' प्रादीयत, किन्तु अपरिहार्यकारणवशादनागतस्य तस्य प्रतिनिधिभूतेन तत्रस्थसहायकाचार्येण डॉ.अजयमिश्रेण स्वीकृतः। डॉ.चन्द्रभूषणझाः पण्डितराजजगन्नाथ-कृतगङ्गालहर्याः डॉ.रमाकान्तशुक्लप्रणीतस्य पण्डितराजीयनाटकस्य च स्वोपज्ञं मैथिलीरूपान्तरं प्रस्तुतवान्। देववाणीपरिषदा प्रकाशितस्य श्रीमत्या रमाशुक्लया प्रणीतस्य च 'सर्वशुक्लोत्तरा; हिन्दी में' इति ग्रन्थस्य लोकार्पणं मुख्यातिथिना डॉ.रामशरणगौडेन तथा च डॉ.ऋषिराजपाठक-प्रणीतस्य 'आद्योन्मेषः' इत्याख्यस्य कवितासंकलनस्य समुन्मीलनं डॉ.रमाकान्तशुक्लमहोदयेन कृतम्। आचार्यरवीन्द्रनागरस्य आध्यक्ष्ये आयोजितायामस्यां कविगोष्ठ्यां डॉ.रमाकान्तशुक्लेन उर्याक्रमणं ततश्च सञ्जातं प्रत्याक्रमणं (surgical strike) चावलम्ब्य क्रमशः 'आक्रमणं कुरु' 'शोभनं कृतम्' चेति कविताद्वयी श्राविता। डॉ.बलरामशुक्लेन 'श्रीकृष्ण!', 'प्रेमवैदग्धी' इति च कविताद्वयी पठिता। डॉ. ऋषिराजपाठकेन 'श्रीहनुमदष्टकं' गीतम्, श्रीविनोदबब्बरेण च एकविंशशताब्द्याः सन्ततिपरम्परां प्रति व्यङ्ग्यरचनाः श्राविताः। अत्र हि सुरुचिशुक्ला, चिरागरतड़ाः, श्रीमती रमाशुक्लामहोदया, श्रीयोगेशशर्मा, श्रीप्रवीणरायः, डॉ.जगन्नाथमठः च पण्डितराजजगन्नाथविरचितानां केषाञ्चन श्लोकानां पाठं कृतवन्तः। कुमारीस्वस्तिः 'राष्ट्रध्वजं नमामि' इति संस्कृतगीतिं गीतवती तथा च श्रीगणेशप्रसादविद्यालङ्कारः 'बृहत्तरं भारतम्' इति गीतिम् अगायत्। डॉ. ऋषिराजपाठकेन सुष्ठु सञ्चालितेऽस्मिन् कार्यक्रमे

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

समागतेभ्यः सर्वेभ्यः धन्यवादज्ञापनं परिषदः आजीवनसदस्यया श्रीमत्या उर्मिलनागरमहाभागया विहितम्।

२. देववाणीपरिषदः ४१तमः सङ्कल्पनादिवससमारोहः

परिषदा 21.08.2016 तमे दिनांके एकचत्वारिंशः संकल्पनादिवसः 'रमालये' सम्मानितः। यत्र मुख्यातिथिरूपेणोपस्थितस्य हरियाणासंस्कृत-अकादम्युपाध्यक्षस्य डा. श्रेयांशकुमारद्विवेदिनः परिषत्पक्षतोऽभिनन्दनमक्रियत। डा. द्विवेदिना संस्कृतपद्यमयभाषणं प्रदत्तम्। विशाखापट्टनतः सम्प्राप्तेन सुवर्ण-कंकणद्वयसम्मानितेन डा.पी.टी.जी.वी.रंगाचार्यालुमहोदयेन बालोपयोगिनी संस्कृत-रचना श्राविता। डा.चन्द्रभूषणझावर्येण संस्कृतपत्रकारितामवलम्ब्य भाषणं प्रदत्तम्।

३. देववाणीपरिषदः ४१तमः स्थापनादिवससमारोहः

नवदेहली। 'वेदाः परमात्मनो निःश्वासभूताः, परमात्मना वेदाः लोकोपकाराय रचिताः।' इतीमे विचाराः देववाणीपरिषदः एकचत्वारिंशत्तमस्य स्थापनादिवससमारोहस्य उद्घाटनसत्रे सारस्वतातिथिरूपेण भाषमाणेन राष्ट्रियसंस्कृतसंस्थानस्य, वेदविभागाध्यक्षेण आचार्यमनोजकुमारमिश्रेण प्रकटिताः।

देहल्याः पश्चिमस्यां दिशि वाणीविहारस्थे रमालये १३-१२-२०१६तमे दिनाङ्के आयोजिते समारोहेऽस्मिन् मुख्यातिथित्वेन समुपस्थितेन डॉ. देवीप्रसाद-पाण्डेयद्वीपेन सारगर्भितं वैदुष्यपूर्णं च भाषणं प्रस्तुतवता वैदिकवाङ्मयस्य नैकासां विशेषतानामुद्घाटनपुरस्सरं कथितं यद् अद्य वेदानामभिप्रायं प्रतिजनं प्रापयितुमनिवार्यम्। एतदेव अभिलक्ष्य डॉ. पाण्डेयवर्याः अद्यत्वे वेदभाष्यकर्मणि व्यापृताः सन्ति। समारोहस्याध्यक्ष्यं विदधत्या देववाणी-परिषद उपाध्यक्षया श्रीमत्या रमादेवीशुक्लया स्वागतपुरस्सरमतिथयः ऊर्णावस्त्रैः सत्कृताः। परिषदो महासचिवेन आचार्यरमाकान्तशुक्लमहोदयेन संस्कृतस्य प्रचाराय प्रसाराय च विहितानां परिषत्प्रयासानां परिचयो दत्तः। अत्रावसरे साहित्यवितरणं, श्लोकपाठः, छन्दःप्रश्नमञ्चः, वेदपाठः, स्वरचितसंस्कृतहिन्दी-काव्यपाठः, देववाणी-परिषदा त्रिंशद्वर्षेभ्यः प्राग् आयोजितस्य अखिलभारतीयसंस्कृतकविसम्मेलनस्य च आंशिकानुश्रवणमभूत्। यत्र प्रो. श्रीनिवासरथः, अभिराजराजेन्द्रमिश्रः, आचार्य-रमाकान्तशुक्लश्च स्वकीयं काव्यपाठं प्रस्तुवन्।

द्वितीयसत्रे तरुणैः प्रौढैः च कविभिः स्वसंस्कृतहिन्दीरचनाः प्रस्तुताः। अत्रावसरे मुख्यातिथिरूपेणोपस्थितेन शतद्वयाद् अपि अधिकग्रन्थानां रचयित्रा

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

हिन्दी-ऊर्दू-आंग्लकविना डॉ. राकेशरविणा आचार्यरमाकान्तशुक्ल- प्रणीतानां 'आशाद्विशती-भारतजनताहम्-आक्रमणं कुरु' इत्येतासां कवितानां हिन्द्यनुवादाः त्रिवेणीशीर्षकमुखेन प्रस्तुताः। एतद् अतिरिच्य तेन प्रेरणादायिन्यः स्वीयाः मौलिकरचनाः अपि श्राविताः। कविगोष्ठ्याः अध्यक्षत्वेन विराजमानेन महर्षिदयानन्दविश्वविद्यालयस्य संस्कृतविभागस्य प्राक्तनाध्यक्षेण आचार्य-सुधीकान्तभारद्वाजेन संस्कृतस्य साम्प्रतिकयूनां स्वागतं कुर्वता शुभकामनाः व्याहताः। कविगोष्ठ्याम् ऋषिराजपाठकेन स्वदेशभक्तिपरकरचनाः, गवीशद्विवेदिना देववाणीवन्दना गरुडदण्डकाश्च, शुभम् इत्यनेन सैनिकसम्मानश्लोकाः, ललितपाण्डेयार्षेयेण देशभक्तिपूर्णरचनाः, योगेशशर्मणा, प्रियङ्कया च स्वकविताः प्रस्तुताः। श्यामाप्रसादमुखर्जीमहाविद्यालयस्य संस्कृत-विभागे सहायकाचार्यभूतया डॉ. पूजाशर्मणा आचार्यरमाकान्तशुक्लप्रणीता 'सुरभारती विजयते' इति रचना सामूहिकरूपेण प्रस्तुता। अत्रावसरे राष्ट्रकिंकरसम्पादकाय श्रीविनोदबब्बराय परिषदा प्रकाशितो ग्रन्थः प्रादीयत।

४. देववाणीपरिषदः ३६-४० तमं संयुक्तं वार्षिकाधिवेशनम्

24.12.2016 तमे दिनांके आर-6 वाणी विहारः, उत्तमनगरम्, दिल्ली-110059 इत्यत्र देववाणीपरिषदः 37-40 तमं संयुक्तं वार्षिकं अधिवेशनमभूत्। तत्र प्रथमे उद्घाटनसत्रे ऋषिराजपाठककृतसामगानानन्तरं परिषन्महासचिवैराचार्यरमाकान्तशुक्लमहोदयै स्वागतभाषणपूर्वकं मुख्यातिथिरूपेण समागतानां दिल्लीसंस्कृताकादमीसचिवानां डा. जीरामभट्टमहाभागानाम् ऊर्णावस्त्र-प्रदानेन स्वागतं कृतम्। एतदनु कामरूपवेदध्ययनमण्डलसचिवानां डा. गोकुलेन्द्रनारायणदेवगोस्वामीनां ग्रन्थस्य 'शैव उपनिषद्' इत्यस्य लोकार्पणमभूत्। देववाणीपरिषदा च विद्वच्चतुष्टयं स्वमान्यसदस्यताप्रदानेन सत्कृतम्। राष्ट्रिय-संस्कृतसंस्थानस्य प्राक्तनपरीक्षाधिकारिभ्यो डा. नोदनाथमिश्रमहोदयेभ्यः, कामरूपवेदाध्ययनमण्डलसचिवेभ्यो डा. गोकुलेन्द्रनारायणदेवगोस्वामिभ्यः, सेन्स्टीफन्स्महाविद्यालय संस्कृतविभागे उपाचार्यपदमलंकुर्वाणेभ्यो डा.चन्द्रभूषणझा-महोदयेभ्यः, राष्ट्रकिंकरसम्पादकेभ्यश्च श्रीविनोदबब्बरमहोदयेभ्यः ऊर्णावस्त्रं सदस्यता च प्रदत्ता। तदनु मान्यसदस्यानां संक्षिप्तवक्तव्यपूर्वकं श्लोकपाठोऽप्यभूत्। रम्या-शिवाङ्गी-वरदशुक्ल-प्रियंवदाशर्म-योगेशशर्मपद्मनाभद्विवेदिप्रभृतिभिः श्लोकपाठः कृतः। मुख्यातिथिभाषणं डा.जीतरामभट्टमहादयेन कृतम्,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आचार्येच्छारामद्विवेदिप्रणवमहाकविभिः अध्यक्षीयभाषणं प्रस्तुतम्, अथचान्ते परिषदुपाध्यक्षया धन्यवादवचनं प्रस्तूय उद्घाटनसत्रं सम्पन्नतां प्रापितम्।

अस्मिन् क्रमे डा. सरोजव्यासः, डा. सुकेशशर्मा, डा. कौशल्या-भारद्वाजश्च स्वहिन्दीकविताः पठितवत्यः। डा. सुधांशुचतुर्वेदी, डा.सुधीकान्त-भारद्वाज, डा. कीर्तिकान्तशर्मा च स्वविचारान् प्रस्तुवन्तः।

एतदनु कार्यसमित्युपवेशनपुरतः परिषन्महासचिवैः आचार्य रमाकान्तशुक्लमहोदयैः परिषदः 25.12.2011 तः 14.12.2016 पर्यन्तं वार्षिकविवरणं प्रस्तुतम्। तदनु निर्वाचनमण्डलोपवेशने परिषदः नूतनकार्यसमितेः सदस्यानां निर्वाचनं सञ्जातम्। अधिवक्ता श्रीमनोजशर्मा निर्वाचनाधिकारी आसीत्। सर्वसम्मत्या निर्वाचनमित्थमभूत् –

संरक्षकः– प्रो.रामकरणशर्मा, आचार्य इच्छारामद्विवेदी, श्रीमती रमाशुक्ला, **अध्यक्षः**– डा.रमाकान्तशुक्लः, **उपाध्यक्षः**– प्रो.सुधीकान्तभारद्वाजः, **महासचिवः**– डा.ऋषिराजपाठकः, **सहसचिवः**– श्री योगेशशर्मा, **कोषाध्यक्षः**– श्रीमती पूनमचतुर्वेदी, **सदस्याः**– डा.चन्द्रभूषणझा, डा.सरोजव्यासः, डा.सुकेशशर्मा, डा.कीर्तिकान्तशर्मा, डा.चन्द्रमौलिशुक्लः, डा.अनिलमुद्गलः।

५. देववाणीपरिषदा आयोजिता साहित्यिकसङ्गोष्ठी

नवदेहली। ०२.०३.२०१७तमे दिनाङ्के आर८६ वाणीविहारः, उत्तमनगरम्, दिल्ली ११००५९ इत्यत्र एका साहित्यिकगोष्ठी अन्वष्ठीयत। ऋषिराजपाठककृतेन ऋग्वेदीय-मङ्गलाचरणेन प्रारब्धायामस्यां गोष्ठ्यां विद्वत्कविरूपेण आचार्यमहेश-झामहाभागाः समुपस्थिताः अभूवन्। तत्र वरदशुक्लः, रम्या शुक्ला, मनीषपाण्डेयश्च श्लोकपाठं स्तोत्रपाठं चाकुर्वन्। तदनु परिषत्सहसचिवेन श्रीमता योगेशशर्मणा वधूसंस्कृतशिक्षणमित्याख्यं स्वरचितं लघुसंस्कृतनाटकं पठितम्। एतदनु आचार्यमहेशझामहोदयेन प्रकृतिगीतप्रभृतीनि नैकानि स्वरचितानि गीतानि गीतानि। ऋषिराजपाठकेन च वासन्तिकी होलीगीतिः मिश्रकाफीरागे प्रस्तुता। परिषदध्यक्षेण आचार्यरमाकान्तशुक्लेन महाकविकालिदासप्रणीतस्य रघुवंशस्य केचित् स्वध्वन्यङ्किताशाः यन्त्रमुखेन श्राविताः स्वीयमाध्यक्ष्यं च निर्व्यूढम्। परिषत्संरक्षकत्वेन श्रीमत्याः रमाशुक्लायाः सान्निध्ये गोष्ठीयं सुतरां प्रवर्तिता।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

६. देववाणीपरिषदः ४२तमः सङ्कल्पनादिवससमारोहः

देववाणी-परिषदः द्विचत्वारिंशत्तमः सङ्कल्पनादिवससमारोहः 21.08. 2017तमे दिनाङ्के आर-6, वाणीविहारः, नईदिल्ली-110059 इत्यत्र समायोजितम्। मुख्यातिथिरूपेण जामियामिलियाइस्लामियाविश्वविद्यालयस्य संस्कृतविभागाचार्याध्यक्षः डॉ.गिरीशचन्द्रपन्तमहाभागः समुपस्थितः। परिषदः 135तमं ग्रन्थरूपेण प्रकाशितं श्रीजी.एस.श्रीनिवासमूर्त्तिना प्रणीतं चन्द्रिका नाम कवितासङ्कलनं सोपचारं लोकायार्पितवान्। सारस्वतातिथिरूपेण जामियामिलियाइस्लामियाविश्वविद्यालयस्य संस्कृतविभागे आचार्यः डॉ.जयप्रकाशनारायणः समारोहमलंकृतवान्। बैंगलूरुतः चन्द्रिका काव्यकर्त्रा श्रीजी.एस.एस.मूर्तिना प्रेषितः ध्वन्यङ्कितः संदेशोऽपि यन्त्रमाध्यमेन समारोहे प्रसारितोऽभूत्। अस्मिन्नवसरे साहित्यवितरणं, विद्वदभिनन्दनं, वेदपाठः, श्लोकपाठः, स्वरचितकाव्यपाठः चेत्यादीनि अनुष्ठानि सम्पन्नानि। सत्यार्थग्रोवरेण 'भाति मे भारतम्' इत्यतः सप्ततिः पद्यानि कण्ठस्थीकृत्य अंशतः प्रस्तुतानि। अवसरेऽस्मिन् देववाणीपरिषदः संरक्षिका श्रीमती रमाशुक्ला च अध्यक्षाः डॉ.रमाकान्त-शुक्लः अन्ये च पदाधिकारिणः समुपस्थिताः आसन्। श्रीविनोदबब्बरः, डॉ.मैत्रेयी, श्रीराजेशकौशिकः, अन्ये च विद्वांसः स्वविचारान् प्रस्तुतवन्तः। रामजीलालपालीवालवेदवेदाङ्गविद्यालयस्य छात्राः वैदिकमङ्गलाचरणं श्रीनिवाससंस्कृतविद्यापीठच्छात्राः शान्तिपाठं च अकुर्वन्। कार्यक्रमस्य संचालनं परिषन्महासचिवेन डा.ऋषिराजपाठकेन धन्यवादज्ञापनञ्च सहसचिवेन श्रीयोगेशशर्मणा कृतम्। **(डा. ऋषिराज पाठकः)**

21.08.2017तमे दिनाङ्के श्रीजी.एस.श्रीनिवासमूर्तिप्रणीतायाः चन्द्रिकायाः लोकार्पणं कुर्वाणाः श्रीमती रमाशुक्ला, डॉ.रमाकान्तशुक्लः, डॉ.गिरीशचन्द्रपन्तः, डॉ.जयप्रकाशनारायणः, डॉ.ऋषिराजपाठकः, श्रीविनोदबब्बरश्च

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतजगद्वार्ता:

१. संस्कृतक्षेत्रे कृतभूरिपरिश्रमाणामेकादशविदुषां सम्माननम्

नवदेहली। दिल्लीसंस्कृताकादम्या 27.07.2017तमे दिनाङ्के संस्कृतक्षेत्रे कृतभूरिपरिश्रमेभ्य: एकादशविद्वद्भ्य: संस्कृतसाहित्यसेवासम्माननं प्रदत्तम्। सम्मानितेषु विद्वत्सु हरिद्वारस्य प्रो. वेदप्रकाशशास्त्रिण:, डॉ. लक्ष्मीश्वरझामहोदया:, उत्तराखण्डत: डॉ. सुधारानीपाण्डेया, वाराणसीत: प्रो. भागीरथप्रसादत्रिपाठिन:, हरिद्वारत: प्रो. महावीरप्रसाद–अग्रवालमहोदया:, देहलीत: प्रो. महेशप्रसादसिलोडी–महाशया:, वाराणसीत: डॉ. दीनानाथपाण्डेया:, तथा च असमत: डॉ. गोकुलेन्द्रनारायणदेवगोस्वामी अवर्तन्त।

२. सम्पन्नम् अखिलभारतीयं संस्कृतविद्वत्सम्मेलनम्

कर्णाटक:। कर्णाटकीयश्रवणबेलगोलश्रीक्षेत्रे २०१७तमवर्षीयस्य जूनमासस्य सप्तमाष्टमनवमदिनाङ्केषु सम्पन्नं जैनसंस्कृतसाहित्यस्यस्य विविधपक्षेषु तेषां विकासाय कृतं जैनाचार्याणां योगदानाधारितम् अखिलभारतीयसंस्कृत-विद्वत्सम्मेलनम्। उद्घाटनसमारोहस्य अध्यक्षा: प्रो.अभिराजराजेन्द्रमिश्रा:, मुख्यातिथय: आचार्यरमाकान्तशुक्ला:, कुलपतय: प्रो.पद्माशेखरमहोदया आसन्। समारोहस्य विविधप्राविधिकसत्राणाम् अध्यक्षता प्रो.राधामाधवदाशै:, प्रो.गङ्गाधर-पण्डामहाभागै: डॉ. एस.रंगनाथन्वर्यै:, प्रो. प्रेमसुमनजैनै:, समापन-समारोहस्याध्यक्षता प्रो. पीयूषकान्तदीक्षितैश्चानुष्ठितम्।

३. प्राविधिकसंस्कृतशैक्षिकोपरणनिर्माणविषयककार्यशाला

लखनवु:। लखनवुस्थ–उत्तरप्रदेशसंस्कृतसंस्थानम्, कर्णपुरस्थ-विक्रमजीतसिंहमहाविद्यालय: चेत्यनयो: संस्थयो: संयुक्ततत्त्वावधाने १८.०५. २०१७दिनाङ्कत: २०.०५.२०१७दिनाङ्कपर्यन्तं त्रिदिवसीया प्राविधिकसंस्कृत-शैक्षिकोपरणनिर्माणकार्यशाला समायोजिता, यत्र मुख्यातिथित्वेन एतत्स्थानसांसद: सम्माननीय: डॉ.मुरलीमनोहरजोशी अवर्तत। कार्यशालाया: प्रशिक्षक: मुम्बईत: समायात: शिक्षाविभागस्य आचार्य: प्रो.मदनमोहनझावर्य: आसीत्।

४. 'संस्कृतसाहित्ये राष्ट्रियभावना' इति विषये राष्ट्रियसङ्गोष्ठी समायोजिता

हल्द्वानीस्थस्य कुमाऊविश्वविद्यालयस्य संस्कृतविभागेन हरियाणा-ग्रन्थाकादम्या चेत्यनयो: संयुक्ततत्त्वावधाने 'संस्कृतसाहित्ये राष्ट्रियभावना'

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इत्यमुं विषयमाधारीकृत्य द्विदिवसीया राष्ट्रिया संगोष्ठी समायोजिता। अत्र मुख्यातिथित्वेन डॉ. अभिराजराजेन्द्रमिश्रमहाभागः, डॉ. महावीरअग्रवालमहोदयः, डॉ. विनयविद्यालंकारः, प्रो. एसपीएसमेहतामहोदयः प्रभृतयः विद्वांसः स्वविचारान् प्रास्तुवन्। त्रिषु सत्रेषु विभाजिते कार्यक्रमे नवत्यधिकानि शोधपत्राणि पठितानि।

५. सुसम्पन्नो डॉ.वीरेन्द्रकुमारभट्टाचार्य-जन्मशताब्दीसमारोहः

कोलकाता। नवदेहलीस्थ-साहित्याकादमी, नरेन्द्रपुरस्थ-रामकृष्णमिशन-आवासीय-स्वयंशासित-महाविद्यालयः चेत्यनयोः संयुक्ततत्त्वावधाने 22.04.2017तमे दिनाङ्के डॉ.वीरेन्द्रकुमारभट्टाचार्यजन्मशताब्दीसमारोहमभिलक्ष्य अखिलभारतीयपरिसंवादः आयोजितः।

६. अष्टदिवसात्मिका व्याकरणविभागीया कार्यशाला समायोजिता

नवदेहली। 2017तमवर्षस्य मार्चमासस्य २४-३१दिनाङ्केषु नागेशभट्ट-विरचितवैयाकरणसिद्धान्तलघुमञ्जूषाग्रन्थम् अभिलक्ष्य अष्टदिवसात्मिका कार्यशाला समायोजिता। अभिनवपाणिनयः श्रीमन्तः प्रो.रामयत्न- शुक्लमहाभागाः ग्रन्थग्रन्थिविभेदनपुरस्सरं विशेषतः आदिमं प्रकरणं समपाठयन्।

७. पद्मश्री-डॉ.मण्डनमिश्रस्मारकव्याख्यानमाला सम्पन्ना

नवदेहली। 10.03.2017तमे दिनाङ्के देहल्यां पद्मश्री-डॉ.मण्डनमिश्र-स्मारकव्याख्यानमाला सुसम्पन्ना। तत्र व्याख्यानमालायां परानन्दतीर्थमहाराजैः श्रीमतः मण्डनमिश्रस्य अवदातं यशः वैदुष्यञ्च, प्रो.एस्.आर्.भट्टमहाभागैः दर्शनविषयकं व्याख्यानम्, कुलपतिभिः प्रो.रमेशकुमारपाण्डेयमहोदयैः डॉ. मण्डनमिश्राणां संस्कृतसामाजिकक्षेत्रयोः योगदानं च वर्णितम्।

८. विज्ञानभवने संस्कृतनाटिकायाः भव्यमञ्चनम्-

नवदेहली। देहलीसंस्कृताकादम्या विज्ञानभवने समायोजिते अखिलभारतीयसंस्कृतच्छात्रसम्मेलने पी.जी.डी.ए.वी.सान्ध्यमहाविद्यालयस्य अध्यापकेन श्रीयोगेशशर्मणा निर्देशितं विरचितं च 'वधूसंस्कृत-शिक्षणम्' इत्याख्यस्य संस्कृतनाटकस्य भव्यमञ्चनम् अभवत्।

९. संस्कृतं सङ्गणकञ्चेति विषये सङ्गोष्ठी

नवदेहली।'भारतीयवैद्युतिकी एवं सूचनाप्रौद्योगिकी' इत्यस्य सहयोगेन दिल्लीविश्वविद्यालयस्यस्य पीजीडीएवीसान्ध्यमहाविद्यालये 'संस्कृतं सङ्गणकञ्चेति' विषयमधिकृत्य ३१.०३.२०१७दिनाङ्के एकदिवसीया राष्ट्रिया संगोष्ठी समायोजिता।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

१०. समायोजितं संस्कृतगुरुकुलीयसम्मेलनम्

नवदेहली। पश्चिमविहारस्थ-श्रीमहावीरसंस्कृतमहाविद्यालये २५.०२.२०१७तमे दिनाङ्के डा.गोस्वामिगिरधारीलालशास्त्रिप्राच्यविद्याप्रतिष्ठानद्वारा संस्कृतगुरुकुलीयसम्मेलनम् आयोजितम्।

११. भारतीयविद्यानामध्ययनं स्थितिश्च वैश्विकपरिप्रेक्ष्ये

नवदेहली। भारतीयविद्याभवनस्य देहलीकेन्द्रे वेव्ससंस्थया २३.०२.२०१७दिनाङ्के 'भारतीयविद्या- वैश्विकपरिप्रेक्ष्ये' इत्यस्मिन् विषये एका सङ्गोष्ठी समायोजिता। प्रो.भूदेवशर्मा, डॉ.कोनरार्डइल्स्टवर्यः (बेलजियम्), डॉ. मनोहरशिण्डेवर्यः (अमेरिका), प्रो.दीप्तित्रिपाठीवर्या च स्वव्याख्यानं प्रदत्तवन्तः।

१२. धर्मशास्त्रीयपरम्परायां मानवीयमूल्यानां चिन्तनम्

जयपुरम्। राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे ०५.०२.२०१७तमे दिनाङ्के राजधर्मविषयिणी एका सङ्गोष्ठी समायोजिता। अत्र हि प्रो. वेङ्कटरमणहेगडेवर्यः प्रो.सुदेशकुमारशर्मा, डॉ.कमलनयनशर्मा, प्रो.प्रकाशपाण्डेयः, प्रो.राजेन्द्रमिश्रः प्रभृतयः नैके विद्वांसः स्वकीयं सारगर्भं वक्तव्यमकार्षुः।

१३. श्रीरामानुजाचायार्णां सहस्राब्दीमहोत्सवः

नवदेहली।दि.सं.अकादमीश्रीनिवाससंस्कृतविद्यापीठयोः संयुक्ततत्त्वावधाने 05.02.2017दिनाङ्के समाचारिते श्रीरामानुजसहस्राब्दीमहोत्सवे मुख्यातिथित्वेन सम्प्राप्ताः श्रीबालकृष्णचार्यस्वामिनः श्रीभाष्यकाराणां श्रीरामानुजाचार्याणां जीवनं, शिक्षां तथा च तत्प्रतिपादितसिद्धान्तान्) आधारीकृत्य विविधतथ्यानि प्रकाशितवन्तः।

१४. श्रीला.ब.शा.रा.सं.विद्यापीठस्य दीक्षान्तमहोत्सवः

नवदेहली। ०९.०१.२०१७तमे दिनाङ्के विद्यापीठस्य षोडशदीक्षान्त-महोत्सवः समाचरितः, यत्र आतिथ्येन विराजमानाः आसन् शिक्षाराज्यमन्त्रिणः डॉ.महेन्द्रनाथपाण्डेयवर्याः, श्रीकार्ष्णिस्वामिगुरुशरणानन्दमहाशयाश्च। तत्र हि 'महामहोपाध्यायः' उपाधिना श्रीजी.महाबलेश्वरभट्टवर्याः, डॉ. चिरावुरिः श्रीरामशर्मवर्याश्च विभूषिताः। 'वाचस्पत्यु'पाधिना श्रीविश्वमूर्तिशास्त्रिणः सम्मानिताः।

१५. संस्कृतसंस्कृत्योः स्याद्विशेषावधानम्

वाराणसी। 23.10.2016दिनाङ्के रामनाथचौधरीशोधसंस्थाने अखिल-भारतीयविद्वत्परिषदलङ्करणसमारोहः समायोजितः। मुख्यातिथिना केन्द्रीयराज्य-शिक्षामन्त्रिणा डॉ.महेन्द्रनाथपाण्डेयेन प्रो.गौतमपटेलाय भारतीश्रीसम्मानम्, पद्मश्रीडॉ.रमाकान्तशुक्लाय महामहोपाध्यायसम्मानम्, प्रो.जगमोहनसिंहराजपूताय

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शिक्षाविशारदसम्मानम्, प्रो.अशोककुमाराय महर्षिचरकपुरस्कार:, प्रो.अर्कनाथचौधरीवर्याय पाणिनिपुरस्कार:, प्रो.पीयूषकान्तदीक्षिताय न्यायपञ्चाननपुरस्कार:, प्रो. नीलिमासिन्हावर्यायै साहित्यसरस्वतीसम्मानं च प्रदत्तानि।

१६. प्रो.रामयत्नशुक्लाय संस्कृतगौरवपुरस्कार:

नवदेहली। संस्कृतभवने अखिलभारतीयसंस्कृतसाहित्यसम्मेलनेन समाचरिते संस्कृतविद्वत्सम्मानसमारोहे मुख्यातिथिना केन्द्रीयमन्त्रिणा डॉ.महेन्द्रनाथपाण्डेयवर्येण प्रो.रामयत्नशुक्लाय संस्कृतगौरवपुरस्कार:, प्रो.उमा.सी.वैद्यवर्यायै संस्कृतश्रीपुरस्कार: डॉ.शिवशङ्करमिश्राय संस्कृतभूषणपुरस्कारश्च प्रदत्ता:।

१७. सर्वेऽपि मोक्षाधिकारण: - डॉ. अनिलमाहेश्वरी

नवदेहली। वेव्स इति संस्थाया: तत्त्वावधाने विशेषव्याख्यानमधिकृत्य एका परिचर्चा 08.10.2016तमे दिनाङ्के समायोजिता। अमेरिकादेशस्य आचार्य: डॉ.अनिलमाहेश्वरी मुख्यवक्तृत्वेन उपस्थित: आसीत्। सभायां नैके विद्वांस:, विशेषज्ञा: वैज्ञानिकाश्च उपस्थिता: आसन्।

१८. केन्द्रीयविद्यालयानां प्रतियोगिता

नवदेहली। द्वारकास्थ-केन्द्रीयविद्यालये अगस्तमासस्य २९-३०तमयो: दिनाङ्कयो: संभागीयप्रतियोगितासु संस्कृतश्लोकगायन-संस्कृतप्रश्नमञ्च-हिन्दीकाव्यपाठप्रभृतय: नैका: प्रतियोगिता: आयोजिता:। अत्र निर्णायकत्वेन महाकवि: डॉ.रमाकान्तशुक्ल:, डॉ.छविकृष्णार्य:, डॉ.धर्मेन्द्रकुमार: च अवर्तन्त।

१९. संयुक्तराष्ट्राधिकारपत्रस्य संस्कृतभाषायाम् अनुवाद:

अखिलभारतीयसंस्कृतपरिषद: सचिवेन डॉ. जितेन्द्रकुमारत्रिपाठिना संयुक्तराष्ट्रस्याधिकारपत्रस्यानुवाद: कृतोऽस्ति। संयुक्तराष्ट्राधिकारपत्रं षट्सु आधिकारिकभाषास्वपलभ्यते।

२०. नरेन्द्रपुरे संस्कृतस्नातकविभागस्य उद्घाटनं संस्कृतदिवससमारोहश्च

कलिकाता। नरेन्द्रपुरे १७.०८.२०१६ तमे दिनाङ्के नरेन्द्रपुरस्थ-रामकृष्णमिशनावासीयस्वयंशासितमहाविद्यालयस्य संस्कृतविभागेन संस्कृतस्नातकविभागस्य उद्घाटनं विहितं तत्साकमेव सस्कृतदिवससमारोहश्च महता आडम्बरेण परिपालित:।

२१. अखिलभारतीयसंस्कृतच्छात्रसम्मेलनम्

नवदेहली। दिल्लीसंस्कृताकादम्या ३०.०३.२०१७तमे दिनाङ्के विज्ञानभवने 'त्रिदिवसीयम् अखिलभारतीयसंस्कृतच्छात्रसम्मलेनमायोजितम्। अस्मिन् सम्मेलने विभिन्नप्रदेशेभ्य: उपद्वादशशतं छात्रा: उपस्थिता आसन्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

२२. हरियाणासंस्कृताकादम्यां कविसम्मेलनम्

हरियाणाराज्यस्य स्वर्णजयन्त्यवसरे हरियाणासंस्कृताकादम्या 19.03. 2017तमे दिनाङ्के पञ्चकूलायां अखिलभारतीयसंस्कृतकविसम्मेलनमायोजितम्। यत्राध्यक्षरूपेण डॉ.रमाकान्तशुक्लवर्यः मुख्यातिथिरूपेण अभिराजराजेन्द्र-मिश्रश्चोपस्थितौ आस्ताम्। अकादम्याः उपाध्यक्षरूपेण डॉ.श्रेयांशद्विवेदिमहाभागेन कवीनां पद्यात्मकं स्वागतं विहितम्। पञ्चविंशतिः कविभिः स्वरचनाः पठिताः।

२३. संस्कृतपत्रकारिताविषया राष्ट्रिया सङ्गोष्ठी

दिल्लीतः प्रकाश्यमानस्य संस्कृतसंवादः इति पाक्षिकपत्रस्य पञ्चवर्ष-पूर्त्यवसरे 5.11.2016तमे दिनाङ्के संस्कृतपत्रकारिताविषयिणी राष्ट्रियसङ्गोष्ठी समायोजिता यत्र प्रो.सत्यव्रतशास्त्रिवर्यः, डॉ.रमाकान्तशुक्लवर्यः, डॉ.मनोजमिश्रः, डॉ.श्रेयांशद्विवेदी चान्ये विद्वांसः संस्कृतपत्रकारिताविषयकं व्याख्यानं प्रदत्तवन्तः। सम्पादिकया श्रीमत्या मञ्जूशर्मवर्यया प्रबन्धसम्पादकेन श्रीवेदप्रकाशशर्मणा च समागतानां अतिथीनां स्मृतिचिह्न-स्मारिकाप्रदानेन स्वागतं विहितम्।

२४. अखिलभारतीयप्राच्यविद्यासम्मेलनस्य ४९तमाधिवेशनं सोमनाथे

अखिलभारतीयप्राच्यविद्यासम्मेलनस्य 49तमम् अधिवेशनं श्रीसोमनाथसंस्कृतविश्वविद्यालये 08.05.2018तः प्रारप्स्यते। अध्यक्षीयभाषणं डॉ.चन्द्रकान्तशुक्लः विधास्यति।

२५. सप्तदशसंस्थाभिः समायोजितः दिल्ल्यां संस्कृतसप्ताहसमारोहः

4.8.2017तः 11.08.2017पर्यन्तं दिल्ल्यां संस्कृतसप्ताहसमारोहः सम्मानितः। अस्मिन्नवसरे 09.08.2017तारिकायां विशिष्टसमारोहः आयोजितः मुख्यातिथिना शिक्षाराज्यमन्त्रिणा डॉ.महेन्द्रनाथपाण्डेयेन श्रीभाग्येशवासुदेवझा, डॉ.आर.वि.एस.एस.अवधानुलुवर्यः, डॉ.मुरलीनन्दीवर्यश्च विशिष्टसंस्कृत-सेवाव्रतिसम्मानेन विभूषिताः।

२६. दिल्ली-संस्कृत-अकादम्या राष्ट्रिय संस्कृतकविसम्मेलनमायोजितम्

12.08.2017तमे दिनांके नवदिल्ल्यां दिल्लीसंस्कृताकादम्या स्वातन्त्र्यपर्वावसरे राष्ट्रियसंस्कृतकविसम्मेलनमायोजितम्। अकादम्याः सभागारे समायोजितेऽस्मिन् सम्मेलने पञ्चविंशतिप्रायैः कविभिः स्वरचनाः प्रस्तुताः। डॉ.जगदीशप्रसादसेमवालः, डॉ.दलबीरसिंहः, डॉ.वागीशदिनकरः, डॉ.बलदेवानन्द-सागरः, डॉ.प्रवेशसक्सेना, डॉ.आभाझा, डॉ.रामसुमेरयादवः, डॉ.भागिरथिनन्दः, तथाऽन्ये कवयः रचनाः पेठुः। डॉ.रमाकान्तशुक्लेन राष्ट्रभाषा संस्कृतम्,

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विश्वभाषा संस्कृतम् इतीयं रचना सर्वैरपि श्रोतृभिः साकं सामूहिकतया गीता। आध्यक्ष्यम् अकादम्याः उपाध्यक्षेण डॉ.गणेशदत्तशर्मणा, संचालनं अकादमीसचिवेन डॉ.जीतरामभट्टेन युवराजभट्टराईमहाभागेन च कृतम्। मुख्यातिथिरूपेण विधायकः श्रीविशेषरवि समुपस्थाय संस्कृतस्य माहात्म्यं प्रतिपादितवान्।

२७. डॉ.दीपककुमारशर्मणे पुनरपि कुलपतिकार्यकालः

01.07.2017तमे दिनांके असमप्रान्ते नलवारिनगरे स्थितस्य कुमारभास्करवर्मा संस्कृत एण्ड एन्सिएन्ट स्टडीज यूनिवर्सिटि इत्यस्य विश्वविद्यालयस्य कुलपतिना डॉ.दीपककुमारशर्मणा पुनरपि कुलपतिकार्यकालः लब्धः। तेन 01.07.2017तमे दिनांके कार्यभारः स्वीकृतः। डॉ.शर्मा कुशलप्रशासकः सन् संस्कृतस्य ख्यातः कविरपि अस्ति। तस्मै बहुभिर्विद्वद्भिः वर्धापनसन्देशाः प्रहिताः।

२८. डॉ.सर्वनारायणझा दरभंगासंस्कृतवि.वि.कुलपति संवृत्तः

02.05.2017तमे दिनांके राष्ट्रियसंस्कृतसंस्थानस्य आचार्यः सर्वनारायणझा कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयस्य कुलपतिः सञ्जातः।

२९. श्रीधरभास्करवर्णेकरजन्मशताब्दोत्सवः शुभारब्धः

श्रीधरभास्करवर्णेकरजन्मशताब्दोत्सवस्य शुभारम्भः 18.07.2017दिनांके संजातः। अवसरेऽस्मिन् आवर्षं विविधकार्यक्रमाः आचरयिष्यन्ते इति शताब्दमहोत्सवसचिवेन श्रीमंगेशजाशीवर्येण सूचितम्। डॉ.पंकजचान्दे, श्रीरामखाण्डवेवर्यः, डॉ.लीनारस्तोगीवर्या प्रभृतयः श्रीधरभास्करवर्णेकरमहोदयस्य संस्कृतसाहित्ये योगदानमिति विषये स्वकीयान् विचारान् प्रकटीकृतवन्तः।

२९. संस्कृतदिवसमुपलक्ष्य कार्यक्रमाः

संस्कृतदिवसमुपक्ष्य अस्मिन् वर्षे नैके कार्यक्रमाः प्रचालिताः। संस्कृतसप्ताहे विविधाभिः संस्थाभिः देशस्य नैकस्थलेषु संस्कृतस्य प्रचाराय प्रसाराय च पदयात्रा, वाहनयात्रा, शोभायात्रा, फेसबुक-यूट्यबादिसामाजिक-सञ्चारमाध्यमेषु संस्कृतकविसंगोष्ठ्याः सजीवप्रसारणम्, शाकापणेषु संस्कृतेन परिचालनम्, मेट्रो-बस-रेलयानस्थानकेषु संस्कृतस्य पुस्तकवितरणञ्चेत्यादयः कार्यक्रमाः आचरिताः।

(आचार्यजीवनशर्मा)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विश्वसंस्कृतसम्मेलनस्य सप्तदशमधिवेशनम्

विश्वसंस्कृतसम्मेलनस्य सप्तदशमधिवेशनं कनाडादेशे व्हेंकूवरनगरे यूनिवर्सिटि ऑफ ब्रिटिश कोलम्बिया इत्यत्र 9-13.07.2018 तारिकासु सम्पत्स्यते। सम्मेलनस्य द्वितीयपरिपत्रे तद्विषयिणी विस्तृता सूचना दत्ता। विशदतया ज्ञातुम् द्रष्टव्यम्-Email- wsc2018@ubcsanskrit.ca,दूरभाष सं.- +1 604 822 0011 website- sttp://wsc.ubcsanskrit.ca द्वितीय परिपत्रे विद्युल्लेखा अक्लूजकर-माधव देशपाण्डे महाभागाभ्यां रमणीयश्लोकैः व्हेंकूवर नगरस्य अभिरामा शोभापि वर्णिता एते श्लोकाः सहृदयानां मनोमोदार्थं साभारं समुद्ध्रियन्ते-

भूमिर्यत्र सुशान्तसागरवृता सोष्मप्रवाहैर्युता
वृक्षाच्छादितपर्वतैः परिवृता पर्यजन्यपूर्णा सदा।
नानादेशजनैः समेत्य नगरं यत्स्थापितं वर्धितम्
क्रीडास्थानमिदं समस्तजगतो व्हेंकूवरं सुन्दरम्॥

वनकुहरगिरिश्रीः शोभते चित्रवर्णा
हरिणशशकशावाः शाद्वले केलिमग्नाः।
द्विजकुलकलनादैः वृक्षराजिः सचेता
बहुविधजनशब्दैर्वीथयो नादपूर्णाः॥

वनकुहरनिवासी प्रायशः शान्तिशीलः
स्मितवदनसमेतः पान्थसेवाप्रवीणः।
पदपथगमने स्याद् यानमार्गे भवेद्वा
सकलजनसुखार्थ्या क्रीडते कर्मयोगी॥

गिरिजा शारदा लक्ष्मीः गिरिसागरसंगमे।
क्रीडार्थं मिलिता भान्तिः विदुषां तोषदाः सदा॥

विद्यार्थी लभते विद्यां क्रीडार्थी क्रीडनं तथा।
सर्वे मनोरथाः पूर्णाः व्हेंकुवरनिवासिनाम्॥ (विद्युल्लेखा अक्लूजकरः)

वनपूर्वकुबेरनामकं पुरमस्त्युत्तरदिग्विभूषणम् ।
गिरिवारिधिसन्निधौ स्थितं सकलानन्दकरं सुविश्रुतम्॥

रमया रमतेऽत्र भारती सुमनोभिः समुपासिता सदा।
विदुषामिह संगमोऽस्तु वः सुखदः संस्कृतवाग्विवर्धनः॥ (माधव देशपाण्डे)

(हिमांशुजोशी)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रद्धाञ्जलयः

28.09.2016तमे दिनाङ्के आचार्यः श्रीधरवासिष्ठः गुरुग्रामे कीर्तिशेषस्सञ्जातः। आचार्यवासिष्ठः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य प्राक्तनः कुलपतिरासीत्। तेन संस्कृतशिक्षाक्षेत्रे महती भूमिका निर्व्यूढा। स देववाणीपरिषदि बहुवारं मुख्यातिथित्वेन सहभागितामकरोत्।

2. 28.09.2016तमे दिनाङ्के जयपुरे डॉ.प्रभाकरशास्त्री दिवङ्गतः। श्रीशास्त्रिणा अर्वाचीनसंस्कृतसाहित्यं पत्रपत्रिकासाहित्यञ्चावलम्ब्य ग्रन्थाः लेखाश्च लिखिताः।

3. 24.11.2016तमे दिनाङ्के अर्वाचीनसंस्कृतस्य परामर्शदाता किञ्च देववाणीपरिषदः सदस्यो डॉ.रामसुरेशपाण्डेयः यशश्शेषः संवृत्तः। डॉ.पाण्डेयः साङ्ख्यशास्त्रस्य प्रतिष्ठितो विद्वान् आसीत्। 31.07.2017तमे दिनांके तस्य धर्मपत्नी श्रीमती भानुमती पाण्डेयाऽपि दिवं प्रयाता।

4. 07.01.2017तमे दिनाङ्के आचार्यरामानुजदेवनाथन् ऐहिकलीलां समाप्य श्रीवैकुण्ठे भगवत्सायुज्यं प्राप्तवान्। आचार्यो देवनाथन् राष्ट्रियसंस्कृतसंस्थानस्य प्राचार्यः आचार्यः कुलसचिवश्च भूत्वा जयपुरस्थ-जगद्गुरुरामानन्दाचार्य-राजस्थानसंस्कृतविश्वविद्यालयस्य यशस्वी कुलपतिरासीत्। देववाणीपरिषदः उत्सवेषु तस्य उपस्थितिः गोरवाधायिका आसीत्। अर्वाचीनसंस्कृते तस्य दण्डकरचनाः प्रकाशिताः सञ्जाताः। नैकग्रन्थकर्ता स अनेकैर्पुरस्कारैरपि सम्मानितोऽभूत्।

5. 08.03.2017तमे तारिकायां सुप्रसिद्धः कविः डॉ.जगन्नाथपाठकः यशश्शेषः सञ्जातः। तेन अनेके ग्रन्थाः प्रणीताः। स राष्ट्रपतिसम्मानितः साहित्याकादमीसम्मानितश्चासीत्। देववाणीपरिषदा आयोजिते संस्कृतकवि-सम्मेलने तेन सहभागिता निर्व्यूढा।

6. 05.06.2017तमे दिनाङ्के प्रो.एन.एस.रामानुजताताचार्यः ऐहिकलीलां समाप्य श्रीवैकुण्ठे भगवत्सायुज्यं प्राप्तवान्। सर्वतन्त्रस्वतन्त्रः श्रीताताचार्यः तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य आद्यकुलपतिरासीत्।

अर्वाचीनसंस्कृतपक्षतः एतेभ्यः सर्वेभ्योऽपि सप्रणामं श्रद्धाञ्जलयः समर्प्यन्ते। **(सम्पादकः)**

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

परामर्शदातृ-मण्डलम्

१. 'अभिराज' डा० राजेन्द्र मिश्रः
२. डा० उमाकान्त शुक्लः
३. डा० विष्णुकान्त शुक्लः
४. डॉ० हरिनारायणदीक्षितः
५. डा० किरण टण्डन
६. डा०इच्छाराम द्विवेदी 'प्रणवः'
७. डॉ० राधावल्लभत्रिपाठी
८. डॉ० गिरीशचन्द्रपन्त

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

ग्राहकशुल्कम् -वार्षिकं (भारते) रु० १००.००
वार्षिकं (विदेशेषु) यू०एस० डालराः २०

डाकव्ययः - यदि रजिस्टर्डडाकद्वारा अर्वाचीनसंस्कृतस्य सर्वेऽप्यंकाः प्रेष्येरन्
भारते - रु० १००.०० ● विदेशेषु यू०एस० डालराः 40
अस्याङ्कस्य मूल्यम् रु० १००.००

विगतांकानां (Back Volumes) प्रतिवर्षम् मूल्यम् रु० १००/- २० डालरा वा। देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कम् 'अर्वाचीनसंस्कृतम् (Arvacheenasanskritam) इत्यंकितेन दिल्ल्यां/ नवदिल्ल्यां प्रदेयेन बैंकड्राफ्टेन/धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते :-

सम्पादकः, अर्वाचीनसंस्कृतम्, देववाणी-परिषद्, दिल्ली, आर-6, वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)

Address- Editor, Arvacheenasanskritam, R-6, Vani Vihar, New Delhi-110059.

Bank Details : ARVACHEENA SANSKRITAM, A/c **No.** 10483482159, **Bank Name :** State Bank of India, Uttam Nagar Brnach, New Delhi, **IFSC Code :** SBIN0001679

लेखकान् प्रति निवेदनम्

आयत्यां केवलं **'वाकमैनचाणक्य'** फोण्टे चक्रिकायां (C.D.) 7"×4" आकारे देवनागरीलिप्यां मुद्रितैव सामग्री अर्वाचीनसंस्कृते प्रकाशनाय स्वीकृता स्यात्। लेखकाः कृपयास्मिन् विषये अवधानपरा भूत्वा अर्वाचीनसंस्कृतं कृतार्थयन्तु। छायाप्रतिलिप्यां प्रेषिता सामग्री प्रकाशनाय स्वीकृता न स्यात्। किञ्च संस्कृतजगद्वार्तासु केवलं संस्कृतभाषानिबद्धमेव वृत्तं प्रकाशनाय विचारणीयं भवेत्। **-सम्पादकः।**

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

ग्रन्थाकः	ग्रन्थः लेखकः	मूल्यम्
६४.	लक्ष्मीशतकम् (डा० वरदाचार्य कण्णन्)	रु० ६०.००
७५.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) छात्र संस्करण	रु० ३५.००
११०.	श्रीधर भास्कर वर्णेकर-कृत श्रीशिवराज्योदयम् महाकाव्य का साहित्यशास्त्रीय अध्ययन (डा० अभिनव शुक्ल)	रु० ८००.००
११२.	आयुर्वेदशास्त्रस्य परिप्रेक्ष्ये सत्याग्रहनीतिकाव्यस्यानुशीलनम् (डा० चन्द्रमौलि शुक्लः)	रु० ३५०.००
११३.	सर्वशुक्लोत्तरा (कवितासंग्रहः) (डा० रमाकान्त शुक्लः)	रु० ५००.००
११४.	भाति मे भारतम् (गुजरातीभाषानुवादः) (डा० मनसुख पी.पटोलिया)	रु० १००.००
११७.	कथाञ्जलिः (मूलहिन्दीलेखकः- डा योगेन्द्रनाथ शुक्लः) (संस्कृतनुवादकर्त्री- डा. अर्चना जोशी)	रु० २००.००
११८.	'श्रीस्वामिविवेकानन्दचरितम्' और 'विश्वभानुः'(डा. रवीन्द्र नागर)	रु० ५००.००
११९.	आशाद्विशती (डा० रमाकान्त शुक्लः)	रु० २००.००
१२०.	सर्वशुक्लोत्तराः हिन्दी में (श्रीमती रमा शुक्ला)	रु० ५००.००
१२१.	मम जननी (डा० रमाकान्त शुक्लः)	रु० २००.००
१२२.	समष्टिः (राधावल्लभत्रिपाठी)	रु० २००.००
१२३.	आर्याणवः (आचार्य शिवदत्त चतुर्वेदी)	रु० १०००.००
१२७.	श्रीहीरकप्राभृतम् (प्रथमखण्डः) (प्रो.इच्छारामद्विवेदी)	रु० १०००.००
१२८.	श्रीहीरकप्राभृतम् (द्वितीयखण्डः) (प्रो.इच्छारामद्विवेदी)	रु० १०००.००
१२९.	श्रीहीरकप्राभृतम् (तृतीयखण्डः) (प्रो.इच्छारामद्विवेदी)	रु० ६००.००
१३०.	श्रीहीरकप्राभृतम् (चतुर्थखण्डः)(प्रो.इच्छारामद्विवेदी)	रु० २०००.००
१३२.	योग विभूति विमर्श (डॉ.अभिनव शुक्ल)	रु० २००.००
१३३.	श्रीशिवराज्योदय-सहजबोध(डॉ.अभिनव शुक्ल)	रु० २५०.००
१३४.	आद्योन्मेषः(डा. ऋषिराजपाठकः)	रु० २५०.००
१३५.	चन्द्रिका (काव्यसंकलनम्) (जि.एस.श्रीनिवासमूर्तिः)	रु० २००.००
१३६.	नवयौवनदिग्दर्शनम् (नौ जवानः एक बानगी) (पण्डित विष्णुकान्तशुक्लः)	रु० ३००.००

Our Bank Details:

DEVAVANI PARISHAD, DELHI
A/c No.: 10483627083
Bank: State Bank of India
Branch: Uttam Nagar, New Delhi
Branch Code : 01679
IFSC Code: SBIN0001679

देववाणी-परिषद्, दिल्ली
आर-६ वाणी विहारः,
नई दिल्ली-११००५९ फोन- २८५६१८४६
DEVAVANI PARISHAD, DELHI
R-6, Vani Vihar, New Delhi - 110059.
Phone: +91 9560532392, 011 28561846
devavanipd@gmail.com

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन 'मयूर एण्टरप्राइज़ेज़, डब्ल्यू. जेड. 3, तिहाड़ गाँव, नई दिल्ली-110018' इति मुद्रणालये मुद्रापयित्वा 'आर-6, वाणी विहारः, नई दिल्ली-110059' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (संस्कृतपत्रकारितासार्धशताब्दीपूर्तिविशेषांकः 15 जुलाई 2017 ई० 159 अतिरिक्ताङ्कः) प्रधानसम्पादकः डा० रमाकान्तशुक्लः। प्रकाशनतिथिः21.08.2017, अस्यांकस्य मूल्यम् १००.००/- रुपये।

D/ F/Doc / Dr R K Shukla

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

(Book Parichaya)